TRIVANDRUM SANSKRIT SERIES.

NO XXXV.

THE MAṆISÂRA

(ANUMÂNAKHAṆḌA)

OF

GOPÎNÂTHA



EDITED

BY

T GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts

TRIVANDRUM

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS

1914

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३५.

मणिसारः

(अनुमानखण्डः)

श्रीगोपीनाथविरचितः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कोल्लम्वर्षम् १०८९, क्रिस्ताब्दः १९१४

SAIN
GOPIGAN

PREFACE.

BHARATIYA VIDYA BHAVAN
S.N. 738

The Manisara gives a description of the subject matter Tattva chintamani, the well known work on Nyaya of Gangesopadhyaya, and the Anumanakhanda of this work is now placed before the public The Pratyaksha Khanda of the work is referred to in this volume by the word प्रत्यक्षमणिसार but this has not come to our hands, while the Sabda Khanda obtained by us is incomplete The edition of Anumanakhanda is based on two palm leaf manuscripts, one of which (marked क) in Malyalam character belongs to Panthalam Palace, and it is incomplete and somewhat incorrect The other manuscript (marked ख) lent by Mr. Sakti Sastrial of Avikkudi is in Tamil Grantha character, and complete and correct

The author of the Manisara is Gopinatha The colophon in the Tarkabhashaprakasika, a commentary on Tarkabhasha of Kesavamisra namely सोमसुतकुलसमुद्रतमहोपाध्यायभवनाथकुमारसुतगोपीनाथविरचितायां तर्कभाषाप्रकाशिकायां" shows that the commentary was written by a Gopînâtha, son of Bhavanathakumâra The author of the Manisara and of Tarkabhashâprakasika might be identical, for in dealing with the subject Arthapatti (अर्थापत्ति) in Tarkabhasha prakasika, the author says —"अर्थापत्तिर्नप्रमाणमानाभावात्। यथा चैतत् तथा प्रतिपादितं मणिसारे that is, the subject has been explained by him in Manisara

Gopînâtha often refers to Pakshadharamisra, the author of Aloka a commentary on Tattvachintamani, and Pakshadharamisra who is the same as Jayadeva the author of the play called Prasannaraghava lived in the 16th Century A D The father of Sankaramisra the author of Kanadarahasya and other works on Nyaya is known as Bhavanatha If the Bhavanatha mentioned by Gopînâtha be identical with the father of Sankaramisra, Gopînâtha might then be a contemporaneous kinsman of Sankaramisra The latter (Sankaramisra) is the fourth in the succession of the pupils of Vasudeva Bhattâchârya the fellow student of Jayadeva, and might therefore be placed a century later than Jayadeva

Trivandrum

T. GANAPATI SÂSTRÎ



निवेदना ।

एष श्रीगङ्गेशोपाध्यायेन प्रणीतस्य **तत्त्वचिन्तामणि**नाम्नो न्यायग्रन्थस्य सारप्रतिपादको **मणिसारो** नाम, यस्यायमनुमानखण्ड इदानीं प्रकाश्यते । अनुमानखण्डे प्रत्यक्ष**मणिसार**शब्देन* तत्र तत्रास्य प्रत्यक्षखण्ड स्मर्यते । किन्त्वसौ नोपलब्धोऽस्माभि । शब्दखण्डस्त्वस्मद्वशेऽस्ति । पर तु सोऽसमग्र । अनुमानखण्डस्य सशोधनाधारभूतानुभावादर्शौ । तत्रैक **पन्तलराज**सम्बन्धी केरलीयलिपिरसमग्रो नातिशुद्ध क सज्ञ । अन्यस्तु **आयक्कुटि शक्ति**शास्त्रिस्वामिक समग्र शुद्धो द्रमिलग्रन्थलिपि ख सज्ञ ।

अस्य प्रणेता श्री**गोपीनाथः** । **केशव**मिश्रकृतायास्तर्क**भाषा**या व्याख्याया **तर्कभाषाप्रकाशिका**या ' सोमसुतकुलसमुद्भूतमहोपाध्याय**भवनाथ**कुमारसुत**गोपीनाथ**विरचिताया **तर्कभाषाप्रकाशिका**या प्रमाणपरिच्छेद समाप्त " इति सविशेषणो यो **गोपीनाथः** कीर्त्यते, स एवायमिति प्रतिभाति, यस्मात् **तर्कभाषाप्रकाशिका**या स्वकर्तव्यतया प्रसक्तमर्थनिरूपण स **मणिसारे** कृत मन्यते । तत्र ह्यर्थापत्तिविचारे स एवमाह — " अर्थापत्तिर्न प्रमाण, मानाभावात् । यथा चैतत् तथा प्रतिपादित **मणिसारे** " इति । एष **मणिसारे पक्षधर**मिश्र **तत्त्वचिन्तामणि**व्याख्यानस्यालोकस्य कर्तार बहुश स्मरति । **पक्षधर**मिश्र इति **जयदेव**मिश्र एवोच्यते । तमेव **प्रसन्नराघव**नाटकस्यापि कर्तार वदन्ति । स च केस्ताब्दीये षोडशे शतके स्थित इति प्रसिद्धम् । कणादरहस्यादिकर्ता **शङ्कर**मिश्रस्य पिता कश्चन **भवनाथः** श्रूयते । अय **गोपीनाथ**निर्दिष्टद् **भवनाथाद्** यदि न भिन्न, तर्हि **गोपीनाथेन शङ्कर**मिश्रस्य समकालेन दायादेन भवितव्यम् । **शङ्कर**मिश्रस्तु **जयदेव**सहाध्यायिनो **वासुदेव**भट्टाचार्यसार्वभौमस्य शिष्यपरम्पराया चतुर्थो गण्यत इति **जयदेवा**च्छतावरवर्षात्प्राचीन सम्भाव्यते ।

अनन्तशयनम्

त. गणपतिशास्त्री.

* समग्र पृष्ठ दृश्यताम्



॥ श्रीः ॥

गोपीनाथविरचितः

मणिसारः ।

अनुमानखण्डः ।

सङ्गतिग्रन्थः ।

क्रीडाकोपकषायमायतमपाकर्तुं नते शङ्करे
सद्यः स्मेरचमूरलाञ्छनकलासम्पर्कसङ्कोचिताः ।
मावष्टम्भसुरारिसङ्घविविधाहङ्कारकूटच्छिदो
रुद्राणीचरणारविन्दरचयो विघ्नं विनिघ्नन्तु नः ॥

निर्गलितं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्ततस्तनुते ॥

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावमङ्गत्या प्रत्यक्षानन्तरमनुमानं निरूप्यते । यद्यपि लिङ्गपक्षव्याप्त्यादिज्ञानानामनुमितिरूपत्वनियमेऽनवस्थाप्रसङ्गेन प्रत्यक्षरूपत्वमङ्गीकरणीयमेव । अतीन्द्रियसाध्यकादिस्थलेऽपि परम्परया प्रत्यक्षापेक्षित्वमिति यथा, तथानुमित्युपनीतप्रत्यक्षे अदृष्टद्वारा जन्यप्रत्यक्षमात्रे चानुमितेरप्युपजीव्यत्वमस्तीति तन्निरूपणमेव प्रथममस्तु । तथाप्यनुभवत्वव्याप्याया यज्ञातेः प्रमाणविभाजकत्वं, तदवच्छिन्न एवोपजीव्यत्वमिह विवक्षितम् । अस्ति चानुमितित्वावच्छिन्ने प्रत्यक्षस्य तथात्वं, न तु प्रत्यक्षत्वावच्छिन्नेऽनुमितेरपि, ईश्वरप्रत्यक्षे तदभावात् । एवमनुमितिकरणस्य व्याप्त्यादिज्ञानस्यापि प्रत्यक्षोपजीवकतानियम एव, न तु प्रत्यक्षकरणस्यापि तदुपजीवकत्वं नियतं, श्रोत्रादौ तदभावादिति । वस्तुतस्तु प्रत्यक्षानुमानयोरुभयोरप्युपजीव्योपजीवकभावादुभयत्रापि सङ्गतिरस्तु । न चैवमनुमाननिरूपणस्यापि प्राथमिकत्वापातः । निरूपणप्राय-

म्यस्येच्छाधीनतया सङ्केत्यनियम्यत्वात् । सङ्केतेश्च पूर्वापरमन्थैकवाक्यतामात्रप्रयोजकत्वात् । अन्यथा दश दाडिमानीतिवद् उपेक्षणीयतापत्तेः । यद्वा आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयः सङ्गतिः । तच्च यद्यपि कारणत्ववत् कार्यत्वमपि, कारणे निरूपिते किमस्य कार्यमिति जिज्ञासावत् कार्ये निरूपिते किमस्य कारणमिति जिज्ञासाया अपि भावात्, तथापि निरूपणप्राथम्ये इच्छैव नियामिकेत्युक्तम् । एवमनुमानोपमानयोरप्युपजीव्योपजीवकभाव एव सङ्गतिः । लाघवज्ञानसहकारेण गवयपदस्य गवयत्वविशिष्टे शक्तिज्ञानमेव ह्युपमितिः । सा च शक्तेः पूर्वं ज्ञाने सति स्यात । तज्ज्ञानं च नानुमानमन्तरेण, शक्तेरीश्वरेच्छाया अतीन्द्रियत्वात् । तथा चोपमितित्वावच्छिन्नोपजीव्यत्वमेव तत्रापि नियामकमिति क्वचिदनुमानस्यापि तदुपजीवकत्वे न दोषः । यद्वा सङ्केतेरुभयसाधारण्येऽपि प्रागुक्तरीत्या अनुमाननिरूपणप्राथम्यमिति दिक् ॥

इति सङ्गतिग्रन्थः ।

अथानुमितिलक्षणम् ।

'तत्रानुमितिकरणत्वमनुमानत्वम् । अनुमितिश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमि'ति मणिकृत । नन्विह क समासः । न तावद् व्याप्तिविशिष्टपक्षधर्मश्चेति द्वन्द्वः । प्रमानुमित्यव्याप्तेः । वास्तवपदार्थभेदस्थल एव तस्य भावात् । अत्र च तदभावात् । न च ज्ञाप्यपदार्थभेदे द्वन्द्व इत्यपि । तथा सत्यसमवात् । परामर्शस्याभेदावगाहितयान्योन्यभेदानवगाहित्वात् । नापि कर्मधारयः । तथा सति भ्रमानुमित्यव्याप्तेः । कर्मधारयस्य पदार्थभेद एव भावात् । तत्र च तदभावात् । अत एव न षष्ठीतत्पुरुषोऽपि । भ्रमानुमित्यव्याप्तेर्दुष्परिहरत्वादिति ।

अत्र पक्षधरमिश्राः—द्वन्द्व एव समासः । न चोक्तदोषः । पदार्थभेद इव पदार्थतावच्छेदकभेदेऽपि तस्य साधुत्वात् । प्रयोगानुरोधेन व्याकरणस्मृतिप्रवृत्तेः । तस्य चोभयत्र दर्शनात् । अन्यथा नीलघटयोरभेदः संसर्ग इत्यादौ

न पुरस्कार इति वाच्यम् । तथाप्येकत्र धर्मिणीत्यत्रैकत्व वास्तव वा ज्ञात वा विवक्षितम् । नाद्य ।भ्रमानुमित्यव्याप्ते । नान्त्य । परामर्श धर्म्यैक्यभाने मानाभावेनासभवात् । किञ्च, एतद्विशेषणे दत्तेऽपि पक्षतासहकृतत्वविवक्षाया आवश्यकत्वेन तत एवोक्तसमूहालम्बनाति व्याप्तिवारणमिति किमुक्तविशेषणेनेति ।

अत्रेद प्रतिभाति — नहि वय पदार्थतावच्छेदकभेदत्वेन द्वन्द्वसाधुता ब्रूम , येन द्वन्द्वापवाद(त्वा)नुपपत्ति स्यात । किन्तु पदज्ञानजन्यप्रतीतिविषयभेदत्वेन । तच्च विशेष्यविशेषणभेदसाधारणमिति विशेष्यभेदादेकशेषस्थलेऽपि द्वन्द्वप्रसक्तो सरूपेत्यादिसूत्रेण तदपवादात् । सवो द्वन्द्व इत्यत्र सर्वपद सकुचितमेव । द्वित्व चानन्वितमेव । द्विवचन प्रयोगसाधु(त्व)मात्र धर्म्यैक्यस्थले । यद्वा अवच्छेदकान्वय्येव तत् । विशेष्यान्वयस्यात्सगिकत्वात् तस्य च बाधकेन निरासात् । न चैकत्रापि दण्डिपुरुषावित्यादिप्रसङ्ग । साधुत्वे इष्टापत्ते । पूर्वाप्रयोगाच्च न प्रयोग इति । कर्मधारयोच्छेदोऽपि नास्ति । पदार्थभेदविवक्षाया तत्रैव च पदार्थतावच्छेदकभेदविवक्षाया कर्मधारयद्वन्द्वप्रवृत्तेरिति । एकत्र धर्मिणीत्यत्रापि नोक्तदोष । पक्षतासहकृतत्वविवक्षायामपि व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन जनकत्वमवश्य वाच्यमेव, वक्तव्ययुक्ते । तथा च विशेषण विनासम्भव एव, उक्तरूपेणातिप्रसक्तिवारणतावच्छेदकत्वात् । किन्त्वेकधर्मिकतदुभयवैशिष्ट्यज्ञानत्वेनैव जनकत्वम् । अत एवैकत्वभानमावश्यकमिति दिक् ।

उपाध्यायास्तु — व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारय एव समास । तदुत्तरतल्प्रत्ययेन पदार्थतावच्छेदकद्वयसामानाधिकरण्यशक्तेन तदुभयसामानाधिकरण्यप्राप्तौ तत्र च ज्ञानान्वयेन सामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थो लभ्यत इति न भ्रमानुमितावव्याप्तिरित्याहु । तच्चिन्त्यम् । अवान्तरवाक्यार्थस्य व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयसामानाधिकरण्यस्य बाधेन महावाक्यार्थस्य ज्ञानान्वयस्य दूरपराहतत्वाद् भ्रमानुमित्यव्याप्तेरपरिहारात् । ज्ञानरूपसम्बन्धस्य यथाकथाञ्चित् सामानाधिकरण्यघटकत्वेन तदव्याप्तिनिरसनेऽप्यसम्भवस्य दुरुद्धरत्वात् । तथाहि — वह्निव्याप्यधूमवानिति परामर्शोऽनुमितिहेतु । न चासौ स्वप्रकारीभूतव्याप्त्यादेर्वैशिष्ट्य मसर्गमर्यादया विषयीकुर्वन् तद्वैशिष्ट्यमपि सामानाधिकरण्यरूप विषयीकरोति । तथा सति भासमानवैशिष्ट्यप्रतियोगितया

वैशिष्ट्यस्य प्रकारतापत्तेः । न च विशिष्टबुद्धौ विशेष्याविशेषणसम्बन्धमात्रविषयत्वे दण्डीति बुद्धे दण्डपुरुषसंयोगा इति ज्ञानाद् भेदो न स्यादिति वैशिष्ट्यसम्बन्धोऽधिको विशिष्टधीविषयोऽङ्गीकार्य एव । अत एव भासमानवैशिष्ट्यप्रतियोगित्वपर्यन्त प्रकारतालक्षणमिति वाच्यम् । तथापि दण्डपुरुषसंयोगतत्सम्बन्धा इत्यतो दण्डीत्यस्य भेदानुपपत्तेः समूहालम्बनाद् भेदकान्तरस्यैव वाच्यत्वात् । अत एव समूहालम्बने सम्बन्धतावच्छेदकगोचरत्वं विशिष्टबुद्धौ तदगोचरत्वमित्येव भेदकमिति पक्षधरमिश्राः । यदि च विषयभेद एव धीभेदक इति मतं, तथापि नानुपपत्तिः । विशिष्टबुद्धौ विशेषणप्रतियोगिकस्य विशेष्यनिष्ठस्य स्वरूपसम्बन्धस्य विषयत्वात् । विशेषणसम्बन्धनिरूपितस्वरूपसम्बन्धापेक्षया विशेषणसम्बन्धस्य लघुत्वात् । यथा च विशेषणादिनिरूपितस्वरूपसम्बन्धस्य विशिष्टधीविषयत्वेऽप्युपजीव्यतया लघुतया च समवायसिद्धिः, तथा प्रत्यक्षनिरूपित'क्ष)मणिसारे विवेचितम् । ननु तथापि व्यभिचारिहेतुकानुमितौ लक्षणमिदमव्याप्तं, व्याप्तेरत्रासत्तया ज्ञानाभावात् । भ्रमस्यापि प्रमापूर्वकत्वात् । न च अन्यत्र गृहीतव्याप्तेरत्राप्यारोप इति वाच्यम् । व्याप्तिर्हि प्रतिसाध्य प्रतिसाधन च तत्तद्व्यक्तिघटिततया भिन्ना । तथा च तत्साधने तत्साध्यनिरूपितव्याप्तिज्ञानमेव वाच्यम् । अन्यथातिप्रसङ्गात् । तच्चाप्रसिद्धमिति चेद्, न । तत्साधनाधिकरणे साध्य साध्ये च तन्निष्ठात्यन्ताभावप्रतियोगित्वमवगाहते यद् ज्ञान, तस्यैव व्याप्तिज्ञानपदेन विवक्षितत्वात् तस्य तत्रापि सत्त्वादिति । नन्वेवमपि व्यतिरेक्यनुमितौ लक्षणमिदमव्याप्तं, तत्रान्वये पक्षधर्मतायाः व्यतिरेके च व्याप्तेर्ज्ञानेन तदुभयविशिष्टज्ञानाभावादिति चेद्, न । व्यतिरेकव्याप्तिज्ञानस्यापि साधनसाध्याभावाभिचारधीविरोधितया स्वव्यभिचारधीविरोधिव्याप्तिज्ञानस्य विवक्षितस्य सत्त्वात् । न च तथापि परम्परासम्बन्धेन व्याप्तिपक्षधर्मतयोर्वैशिष्ट्यज्ञानस्य विवक्षितत्वे वह्निव्याप्यधूमवान्पर्वतोऽयमिति ज्ञानादनुमितिरापत्त्या साक्षात्सम्बन्धेन तदुभयवैशिष्ट्यज्ञानं वाच्यम् । तच्च व्यतिरेकिणि नास्त्येवेत्यव्याप्तिरेवेति वाच्यम् । यादृशं वैशिष्ट्यज्ञानं पक्षधर्मं व्यभिचारि च विरुणद्धि, साक्षात्परम्परोदासीनस्य तस्यैव व्याप्तिवैशिष्ट्यज्ञानस्य विवक्षितत्वात् । यथा च व्यतिरेकव्याप्तिज्ञानमन्यत्र(त्य')व्यभिचारधीविरोधि(ता') तथा वक्ष्याम । यत्तु व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यत इति मत्वेदं लक्षणमिदम् । तेन नाव्याप्तिशङ्का । नन्वेवमपि सशयोपनयनिगमनं लक्षण-

वैशिष्ट्यस्य प्रकारतापत्तेः । न च विशिष्टबुद्धौ विशेष्यविशेषणसम्बन्धमात्रविषयत्वे दण्डीति बुद्धेः दण्डपुरुषसंयोगा इति ज्ञानाद् भेदो न स्यादिति वैशिष्ट्यसम्बन्धोऽधिको विशिष्टधीविषयोऽङ्गीकार्य एव । अत एव भासमानवैशिष्ट्यप्रतियोगित्वपर्यन्त प्रकारतालक्षणमिति वाच्यम् । तथापि दण्डपुरुषसंयोगतत्सम्बन्धा इत्यतो दण्डीत्यस्य भेदानुपपत्तेः समूहालम्बनाद् भेदकान्तरस्यैव वाच्यत्वात् । अत एव समूहालम्बने सम्बन्धावच्छेदकगोचरत्वं विशिष्टबुद्धौ तद्गोचरत्वमित्येव भेदकमिति पक्षधरमिश्राः । यदि च विषयभेद एव धीभेदक इति मतं, तथापि नानुपपत्तिः । विशिष्टबुद्धौ विशेषणप्रतियोगिरूपस्य विशेष्यनिष्ठस्य स्वरूपसम्बन्धस्य विषयत्वात् । विशेषणसम्बन्धनिरूपितस्वरूपसम्बन्धापेक्षया विशेषणसम्बन्धस्य लघुत्वात् । यथा च विशेषणादिनिरूपितस्वरूपसम्बन्धस्य विशिष्टधीविषयत्वेऽप्युपनीव्यतया लघुतया च समवायसिद्धिः, तथा प्रत्यक्ष(स्य निरूपित)मणिसारे विवेचितम् । ननु तथापि व्यभिचारिहेतुकानुमितौ लक्षणमिदमव्याप्तं, व्याप्तेरसत्त्वया ज्ञानाभावात् । भ्रमस्यापि प्रमापूर्वकत्वात् । न च अन्यत्र गृहीतव्याप्तेस्तत्राप्यारोप इति वाच्यम् । व्याप्तिर्हि प्रतिसाध्यं प्रतिसाधनं च तत्तद्व्यक्तिघटिततया गृहीता । तथा च तत्साधने तत्साध्यनिरूपितव्याप्तिज्ञानमेव वाच्यम् । अन्यथातिप्रसङ्गात् । तथाप्रसिद्धमिति चेत्, न । तत्साधनाधिकरणे साध्याभावे च तन्निष्ठात्यन्ताभावाप्रतियोगित्वमवगाहते यद् ज्ञानं, तस्यैव व्याप्तिज्ञानपदेन विवक्षितत्वात् तस्य तत्रापि सत्त्वादिति । नन्वेवमपि व्यतिरेक्यनुमितौ लक्षणमिदमव्याप्तं, तत्रान्वये पक्षधर्मतायां व्यतिरेके च व्याप्तिज्ञानेन तदुभयविशिष्टज्ञानाभावादिति चेत्, न । व्यतिरेक्यप्याप्तिज्ञानस्यापि साधनसामान्याभावधीविरोधितया सव्यभिचारधीविरोधिव्याप्तिज्ञानस्य विवक्षितत्वे बाधितव्याप्यपक्षजातीयज्ञानमयमिति ज्ञानादनुमित्यापत्त्या साध्यसम्बन्धेन तदुभयविशिष्टज्ञानं वाच्यम् । तच्च व्यतिरेकिणि साध्येव व्याप्तिरेवेति वाच्यम् । यादृशं वैशिष्ट्यज्ञानं पक्षधर्मं व्यभिचारधिय विरुन्धि, साध्यसम्बन्धादीनां तत्र व्याप्तिविशिष्टज्ञानस्य विवक्षितत्वात् । यथा च व्यतिरेक्यव्याप्तिज्ञानमन्वय(स्य)व्यभिचारधीविरोधि(नः) तथा पक्षधर्म । तच्च विरुद्धसाध्यसम्बन्धव्याप्तिपूर्वकं इति सोऽयं व्यभिचारः । नैष दोषः । नन्वेवमपि स्वरूपसम्बन्धेन लक्षण-

मतिव्याप्त, विशेषदर्शनजन्यत्वात् तस्य । तथा व्याप्तिविशिष्टपक्षधर्मत्वाभावज्ञाने प्रतियोगिज्ञानत्वेन परामर्शजन्येऽतिव्याप्ति । तथा व्याप्तिविशिष्टपक्षधर्मतावानयमिति ज्ञाने विशेषणज्ञानत्वेन परामर्शजन्येऽतिव्याप्ति । तथा परामर्शानुव्यवसाये विषयत्वेन परामर्शजन्येऽतिव्याप्ति । तथा पूर्वानुभवत्वेन परामर्शजन्ये व्याप्तिविशिष्टपक्षधर्मतास्मरणेऽतिव्याप्ति । तथा अतिदेशवाक्यार्थज्ञानत्वेन परामर्शजन्यायामुपमितावतिव्याप्ति । तथा उपनयावान्तरवाक्यार्थज्ञानजन्यन्यायजन्यशाब्दज्ञानेऽतिव्याप्ति । किं बहुना, भगवद्व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यतया जन्यज्ञानमात्र एवातिव्याप्तिरिति ।

अत्र केचित्—तत्प्रत्यक्षानुमित्योर्वैजात्यादवश्य सामग्रीवैलक्षण्य वाच्यम् । तथा चानुमितौ परामर्श , प्रत्यक्षे च करादि पुरुषत्वव्याप्य करादिमाश्रायमिति ज्ञानद्वय हेतुरिति सशयोत्तरप्रत्यक्षे परामर्शान्यतया नातिव्याप्तिरित्याहु । तच्चिन्त्यम् । लाघवेनानुमितावि व प्रत्यक्षेऽपि विशिष्टज्ञानस्यैव हेतुत्वाद्, अन्यथा वेपरीत्यापत्ते , विनिगमकाभावादिति पक्षधरमिश्रा । अत्र प्रत्यक्षानुमित्योरुभयोरपि परामर्शजन्यत्वे सशयोत्तरप्रत्यक्षेऽनुमित्यनुत्पत्तये प्रत्यक्षसामग्रीगतत्वत्व कल्प्यमिति महद् गौरव स्यात् । तद्धर ज्ञानद्वयमेव प्रत्यक्षहेतुरस्त्विति नव्यदूषण भव्यम् । लाघवेन विशिष्टज्ञानहेतुत्वसिद्धौ प्रत्यक्षसामग्रीप्रतिबन्धकत्वकल्पनस्य फलमुखत्वादिति न किञ्चिदेतत् । अन्ये तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यमात्रवृत्तिजातीयत्वमर्थ । अनुमितित्व तथा , प्रत्यक्षत्वादिक च न तथेति न प्रत्यक्षादौ काप्यतिव्याप्ति । सशयोत्तरप्रत्यक्षत्वादिक च न जाति , चाक्षुषत्वादिना सङ्करादित्याहु । तदपि चिन्त्यम् । व्याप्यधर्मपुरस्कारप्रवृत्तातिदेशवाक्यप्रभवोपमितिमन्तरेण क्वचोपमित्यन्तराभाव , तत्र शरीरजन्यतावच्छेदकजातेरुपमितिवृत्तेस्तथात्वेन तादृशोपमित्यतिव्याप्तेस्तादवस्थ्यात् । न च शरीरजन्यतावच्छेदकजाति सर्वज्ञानसाधारण्येकैव, तथा च तस्या प्रत्यक्षादिवृत्तितया न तज्जन्यमात्रवृत्तित्वमिति नातिव्याप्ति , प्रत्यक्षत्वादेरेव तव्याप्तस्य नानात्वेन सङ्करशङ्काविरहादिति वाच्यम् । तथा सति नानापुरुषानुमित्यादावनुगतव्यवहारानापत्तेरिति पक्षधरमिश्रा ।

अत्र शङ्क्यते—एव सति शरीरजन्यतावच्छेदकजातिनानात्वेऽपि प्रत्यक्षानुमित्यादिसाधारणस्य शरीरजन्यत्वानुगतव्यवहारस्योच्छेद एव । यथाकथञ्चिदनुगतोपाधिना तत्समर्थनेऽनुमित्याद्यनुगतव्यवहारेऽपि समानमिति ।

व्यर्थत्वात् । भगवज्ज्ञानमादायापि नातिव्याप्ति , तस्योपादानप्रत्यक्षतया हेतुत्वेनोक्तरूपेणाजनकत्वादिति ।

पक्षधरमिश्रास्तु — पक्षतासहकृतपरामर्शजन्यत्व विवक्षितम् । प्रत्यक्षादौ कापि न पक्षता हेतुरिति नातिव्याप्ति । न च पक्षतासहकृतव्याप्तिज्ञानजन्यत्वमेवास्तु । तदुभयप्रत्यक्षेऽतिव्याप्ति । न च परामर्शपक्षतोभयप्रत्यक्षे तथाप्यतिव्याप्ति । तदुभयोरनुमित्युत्पादनियततया प्रत्यक्षानुत्पादात् । न च पक्षताजन्यत्वमेव लक्षणमस्तु । सामान्यप्रत्यासत्तिभू(यं तया) तया जनिते प्रत्यक्षेऽतिव्याप्ते , सिद्ध्यभावरूपपक्षताया योग्यतया विषयत्वेन तज्जन्यप्रत्यक्षेऽतिव्याप्तेश्च पक्षतात्वेन जनकत्वस्य लक्षणाप्रवेशादित्याहु. ।

तत्र विचार्यते — यत्र बाधाद्यवतारेण पक्षतापरामर्शाभ्यामनुमितिर्न जनिता, तत्र तदुभयसमूहालम्बनेऽतिव्याप्तिर्दुर्वारा । न च हेतुतावच्छेदकभेदादुभयोर्जनकत्व विवक्षित, समूहालम्बने च न तथा, विषयत्वस्यैव हेतुतावच्छेदकत्वादिति वाच्यम् । सामान्यतस्तथात्वेऽपि स्वप्रत्यक्षे स्वत्वेन हेतुत्वादतिव्याप्तेस्तादवस्थ्यात् । किञ्च, पक्षताजन्यत्वमेवास्तु, किमर्थमन्यत् । पक्षताप्रत्यासत्तिकप्रत्यक्षे पक्षताया अहेतुत्वात्, सामान्यज्ञानस्यैव प्रत्यक्षहेतुत्वादिति वक्ष्यमाणत्वात् । अन्यथा पक्षतापरामर्शोभयप्रत्यासत्तिकप्रत्यक्षातिव्याप्तेर्दुष्परिहरत्वात् । पक्षतायाः सिद्ध्यभावरूपायाः योग्यप्रतियोगिकत्वेऽप्यप्रत्यक्षत्वाच्च न तत्प्रत्यक्षातिव्याप्तिवारणार्थमपि परामर्शपदमार्थकता । न च सिद्ध्यभावरूपपक्षता कुतो न प्रत्यक्षेति वाच्यम् । प्रतियोगियोग्यतामात्रस्याभावयोग्यतायामतन्त्रत्वात् । अन्यथा गुरुत्वावच्छिन्नघटाभावस्यापि प्रत्यक्षत्वापातात् । तथा च प्रतियोगितावच्छेदकावच्छिन्नयोग्यता तत्र वाच्या । सा च नेह । सि(द्ध)साधयिषानन्तरसिद्धननुगुणानन्तरितकालस्य प्रतियोगितावच्छेदकप्रविष्टस्यायोग्यत्वादिति ।

अत्र प्रतिभाति — अनुभवत्वसाधारण्याज्जाता यज्ज्ञातीयज्ञान प्रति पक्षतापरामर्शयोरन्यतरमन्तरेणान्यतरस्य न जनकत्व , तत्त्वमिह विवक्षितम् । परामर्शपक्षताप्रत्यक्षादौ च न तथा । केवलस्यापि परामर्शादे प्रत्यक्षजनकत्वात् । अनुमितित्वावच्छिन्न प्रति तु मिलितयोरेव जनकत्वमिति न व्याप्यतिव्याप्तिशङ्का । यद्वा

प्रत्यक्षेऽतिव्याप्ते । तत्रापि व्याप्यतावच्छेदकव्याप्यत्वप्रकारकज्ञानस्य सत्त्वारज्ञानत्वेन हेतुत्वात् । पक्षतानुपरागसत्त्वाच्च । किञ्च, यत्रालोकेन वह्न्यनुमितीच्छा धूमे च व्याप्यत्वपरामर्श , तत्रापि साध्यसिद्धीच्छाघटितपक्षतासत्त्वेऽपि लिङ्गान्तरसिषाधयिषाप्रतिबन्धेनानुमित्यनुत्पत्त†परामर्शानुव्यवसायातिव्याप्ति । अपिचेद वह्निज्ञान प्रमा वह्निव्याप्यवति तज्ज्ञानत्वादित्यत्र य परामर्शस्तत्रातिव्याप्ति । न चेह लिङ्गज्ञानतया परामर्शस्य जनकत्वेऽपि वह्निज्ञानसत्त्वान पक्षतोपराग इति वाच्यम् । तज्ज्ञानस्याप्रामाण्यशङ्काकलङ्किततयासत्कल्पत्वात् । अन्यथा प्रामाण्यानुमितिवैयर्थ्यापातात्, तद्घटकार्थनिश्चयादिति पक्षधरमिश्रा ।

अत्रेद शङ्कते—भिन्ने विषये प्रत्यक्षापेक्षया अनुमितिसामग्रीबलवत्त्वेन महाव्याप्तिप्रत्यक्षपूर्वमनुमित्युत्पादेन पक्षताविरहान्न तत्रातिव्याप्ति । प्रत्यक्षमानाभावस्यापि पक्षताघटकत्वेन तत्सत्त्वेनापि तत्र पक्षताविरहादतिव्याप्त्यभाव । किञ्चेत्यपि न । तल्लिङ्गकतत्साध्यकसिद्धीच्छात्वेन पक्षताघटकत्वात् तस्य च तत्राभावात् तल्लिङ्गकत्वपर्यन्तस्य पक्षत्वाघटकत्वेऽपि तावद्रूपपर्यन्तस्य लक्षणप्रवेश इत्युपाध्यायाभिप्रेतत्वात् । अपिचेत्यपि न । अप्रामाण्यशङ्काशून्यत्वपर्यन्तस्य गुरुत्वेन लाघवात् सिद्धयभावमात्रस्य पक्षतात्वात् तस्य च तत्राभावादतिव्याप्त्यभावादिति ।

अत्रेद स्फुरति—यत्र महाव्याप्तिप्रत्यक्षम्, अनन्तरमनुमितिमेऽस्त्वितीच्छा, तत्र प्रथम महाव्याप्तिप्रत्यक्षे बाधकाभावेन पक्षतासत्त्वेन चा(ति)व्याप्तेर्दुष्परिहरत्वात् । प्रत्यक्षमानाभावस्य पक्षताघटकत्वेऽपि समानविषयकप्रत्यक्षाभावस्यैव तद्घटकत्वात् तस्य तत्र सत्त्वात । वस्तुतस्तु उपमित्यादिना यत्र प्रथममुपमिति , तत्रोक्तविशेषणैरप्यतिव्याप्तेर्वारयितुमशक्यत्वात् तदर्थमपि विशेषणान्तर देयमिति अनन्त(र)विशेषणदानापेक्षया पक्षताज(नकान्य)त्वमात्रमेव लघु लक्षणे प्रवेश्य तामिति मिश्राभिसन्धि । अत एव बहुविशेषणप्रवेशोऽप्येव न स्यादिति कण्ठरवेण तैरेवोक्तमिति दिक् ।

इद पुनरवशिष्यते—व्याप्ति साध्यसाधनाधिकरणभेदेन भिन्ना । तथा चैकसाध्यनिरूपितव्याप्तिप्रवेशेऽपरसाध्यकानुमित्यव्याप्ति । सर्वव्याप्तयनुगत च न

---

† अनुपनानुमितिनिरूपकत्वं स्यात् ।

किञ्चिदेकमस्ति, येन तथा लक्षणप्रवेशः स्यादिति ।

अत्रेदं तत्त्वं — यत्किञ्चित्साध्यनिरूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यवृत्त्यनुभवत्वाव्यापकजातिमत्त्वस्य लक्षणार्थत्वाद् हेतुत्वं चात्र तत्त्वेन विवक्षितमिति न काप्यतिव्याप्तिरिति । यद्वा तत्त्वेनापि जनकता न विवक्षिता । किन्तु येन परामर्शेनानुमितिमात्रमुत्पादितं, तत्परामर्शजन्यज्ञानवृत्त्यनुभवत्वाव्यापकजातिमत्त्वं लक्षणमिति न काप्यतिव्याप्तिः ।

गौडास्तु — परामर्शे चरमकारणत्वं लक्षणार्थः । चरमत्वं तु स्वोत्पत्त्युत्तरभाविप्रतिबन्धकाभावातिरिक्तानपेक्षत्वम् । न च प्रत्यक्षादौ परामर्शस्य तदस्ति । इन्द्रियसन्निकर्षादेस्तादृशस्यापेक्षणादिति न काप्यतिव्याप्तिरित्याहुः । तच्चिन्त्यम् । यत्रेन्द्रियसन्निकर्षानन्तरमुत्पन्नपरामर्शेन संशयोत्तरप्रत्यक्षजनन, तत्रातिव्याप्तेः । अनुभवत्वसाक्षाद्व्याप्यजात्या यज्जातीयज्ञानजनने क्वापि परामर्शो नाचरम कारणमित्यर्थे तु गौरवम् । अनुभवत्वसाक्षाद्व्याप्यजात्या यज्जातीयज्ञानत्वावच्छिन्नं प्रति परामर्शः कारणमित्यस्यैव लघुत्वे(न)नाविकलत्वात् । यत्तु संशयोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरेव न, तस्यापरकोटिज्ञानप्रतिबन्धकमात्रत्वात् । कोटिप्रत्यक्षं तु सामान्यसामग्रीत एवेति न तत्रातिव्याप्तिरिति । तन्न । संशयोत्तरप्रत्यक्षे विशेषदर्शनस्याहेतुत्वे(नः) अपरकोटिज्ञानप्रतिबन्धकत्वस्यैवानुपपत्तेः । विरोधिज्ञानसामग्रीत्वस्यैव तत्प्रतिबन्धकत्वयुक्तित्वात् । संशयोत्तरप्रत्यक्षे गुणानुरोधेनावधारणादिव्यवस्थानुरोधेन च तद्धेतुत्वस्य सिद्धत्वात् । यथा चैतत् तथा प्रत्यक्षमणिसारे प्रतिपादितं, प्रतिपादयिष्यते चाग्र इति सङ्क्षेपः ॥

इत्यनुमितिलक्षणम् ।

अथ व्याप्तिवादः ।

तत्र व्याप्यवृत्तिसमानाधिकरणव्यधिकरणान्यतरधर्मावच्छिन्नमाद्यसम्बन्धावच्छिन्नसाध्याभाव(वा)वच्छिन्नाधिकरणवृत्तितज्जातीयत्वावच्छिन्नप्रतियोगित्वं व्याप्तिः । वृक्षः संयोगी द्रव्यत्वादित्यत्र पक्षे साध्याभाववति तज्जातीयहेत्वभावासत्त्वेऽपि नाव्याप्तिः । तत्र साध्याभावस्याव्याप्यवृत्तित्वात् । केवलान्वयिसाध्यकेऽपि ना-

व्याप्तिः, व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य तत्रापि प्रसिद्धतया तद्वति तज्जातीयहेत्वभावसत्त्वात्। समवायसम्बन्धेन वह्नित्वावच्छिन्नवह्न्यभाववति धूमत्वावच्छिन्नधूमाभावासम्बन्धिनि च धूमावयवे व्यभिचारेऽपि न तत्राव्याप्तिः, तदभावस्य ग्राह्यसम्बन्धानारोप्यकत्वात्। संयोगस्य तत्र ग्राह्यसम्बन्धत्वात्। यावत्पदेन धूमवान् वह्नेरियत्रापि नातिव्याप्तिः। व्यधिकरणधर्मावच्छिन्नधूमाभाववति तादृशवह्न्यभावेऽपि धूमत्वावच्छिन्नधूमाभावत्वयोगोलके वह्नित्वावच्छिन्नवह्न्यभावासत्त्वेन व्यभिचारात्।

यद्वा ग्राह्यसम्बन्धारोप्यकव्याप्यवृत्तियत्समानाधिकरणसाध्यतावच्छेदकभिन्नसाध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नयावत्साध्यतावच्छेदकाश्रयमात्रप्रतियोगिकाभावत्वावच्छिन्ने व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वं तत्र व्याप्तिः। समवायसम्बन्धावच्छिन्नवह्न्यभावस्य धूमसमानाधिकरणस्य व्यधिकरणधर्मावच्छिन्नाप्रतियोगिकत्वेऽपि न तत्राव्याप्तिः। तस्य ग्राह्यसम्बन्धानारोप्यकत्वात्। व्याप्यवृत्तित्वविशेषणाच्च नाव्याप्यवृत्तिसाध्यकाव्याप्तिः। धूमसमानाधिकरणयावद्वह्निमात्रप्रतियोगिकत्यासज्यवृत्त्यभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नत्वं विशेषणम्। तस्य च साध्यतावच्छेदकान्यूनानातिरिक्तवृत्तिबहुत्वाधवच्छिन्नत्वात्। एवमपि व्यभिचारिणि धूमत्वावच्छिन्नधूमाभावस्य साध्यतावच्छेदकधूमत्वान्यूनानतिरिक्तवृत्तिधूमत्वावच्छिन्नतया तत्तद्धूमाभावस्य च यावत्साध्यतावच्छेदकधूमत्वाश्रयप्रतियोगित्वाभावेन व्यधिकरणधर्मावच्छिन्नधूमाभावस्यैवोक्तसकलविशेषणावच्छिन्नतया तत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगित्वसत्त्वादतिव्याप्ति स्यादिति साध्यतावच्छेदकभिन्नत्वं साध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मविशेषणम्। तथा च धूमत्वावच्छिन्नाभावस्यापि साध्यतावच्छेदकभिन्नसाध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नत्वसत्त्वेन विशेषणान्तरसत्त्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वस्य च तत्राभावेन न तत्रातिव्याप्तिः। पर्वतीयधूमसमानाधिकरणमहानसीयवह्न्यभावस्य न व्यधिकरणधर्मावच्छिन्नप्रतियोगित्वमित्यव्याप्तिभिया यावत्त्वं विशेषणम्। मात्रपदं च घटवद्वह्नुभयवृत्तिद्वित्वावच्छिन्नाभावमादायाव्याप्तिवारणाय। व्यभिचारिणि नैवम्। वह्निसमानाधिकरणधूमाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगित्वाभावात्। केवलान्वयिनि च नाव्याप्तिः। व्यधिकरणधर्मानवच्छिन्नाभावस्य तत्रापि प्रसिद्धत्वादिति केचित्।

इदं तु लक्षणद्वयं व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभाव दूषयन् मणिकृत् तात्पर्यतो दूषयाञ्चक्रे। तथाहि — घटनिर्विकल्पकाद् घटाभावाग्रहेण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं फलीभूतज्ञानसमानप्रकारकप्रतियोगिज्ञानं वाभावज्ञानं प्रति कारणं वाच्यम्। न चैतद् व्यधिकरणधर्मावच्छिन्नाभावेऽस्ति। शशीयत्वावच्छिन्नतया शृङ्गस्याज्ञानात्। शृङ्गं शशीयं नेति प्रतीतौ सत्यामेवैताद्दशाभावप्रतीतेः। तस्माच्छृङ्गे शशीयत्वाभावमात्रं विषय इति।

अत्र वदन्ति — आहार्यानाहार्यसाधारणप्रतियोगितावच्छेदकविशिष्टज्ञानमेवाभावज्ञानहेतुः। तथा च विशेषदर्शनेऽप्याहार्यप्रतियोगितावच्छेदकवैशिष्ट्यज्ञानादस्तु व्यधिकरणधर्मावच्छिन्नाभावधीः। विशेषादर्शने त्वनाहार्यभ्रम एव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपः। न च तत्राभावबुद्ध्यसम्भवः, प्रतियोगितावच्छेदकविशिष्टप्रतियोगिन एवाधिकरणे ज्ञानादि(ति) वाच्यम्। गवि शृङ्गप्रत्ययदशायामेव शशीयत्वावच्छिन्नतया गृह्यमाणशृङ्गाभावधीसम्भवात्। न च शृङ्गत्वावच्छिन्नाभावो धीविषयो न तु व्यधिकरणधर्मावच्छिन्नाभाव इति वाच्यम्। सामग्रीसत्त्वे तद्विषयतायामपि बाधकाभावादिति।

अत्राहुः — ससम्बन्धिकपदार्थग्रहे सम्बन्धितावच्छेदकविशिष्टसम्बन्धिज्ञानमनाहार्यं हेतुः। कथमन्यथाहार्यघटज्ञानाद् न घटसंयोगप्रत्यक्षम्। अत एव शृङ्गे शशीयत्वग्रहकालेऽपि शशशृङ्गं नास्तीति प्रतीतिर्न विशिष्टाभावमवगाहते। शृङ्गे शशीयत्वग्रहकालीनप्रतीतेस्तदाकारायाः कारणबाधेन शृङ्गे शशीयत्वाभावमात्रविषयत्वकल्पनात्। तस्यास्तद्विषयत्वेनैवोपपत्तेः। नहि समानाकारप्रतीतेः समयपुरुषादिभेदाद् विषयभेदं क्वाप्याकलयाम इति न क्वापि व्यधिकरणधर्मावच्छिन्नाभावः प्रतीतिविषय इति।

अत्र शङ्क्यते — संयोगस्थले पृथक्कल्पनावश्यं वाच्यैव। अन्यथातीन्द्रियस्यापि संयोगः प्रत्यक्षः स्यात्। तथा च तत्रानाहार्यप्रतियोगिप्रत्यक्षत्वेन विशेषहेतुत्वेऽपि सामान्यसामग्र्यामनाहार्यत्वविशेषणप्रवेशो गौरवपराहतो ग्रस्तश्च व्यभिचारेण। आहार्यज्ञानानुव्यवसाये आहार्यज्ञानस्यैव सम्बन्धिज्ञानात्मकस्य हेतुत्वात्। न च तत्राप्याहार्यधीजनकमनाहार्यविशेषणज्ञानमेव हेतुरिति वाच्यम्। विनष्टयदवस्थविशेषणधीजन्यस्याहार्यज्ञानस्यानुव्यवसाये तथापि व्यभिचारात्। आहार्यज्ञानसम्बन्धिविशिष्टगोचरत्वाभावेन पूर्वविशेषणज्ञानस्य सम्बन्धिज्ञानत्वाभा-

वाच्य । यच्चोक्तं समानाकारप्रत्ययस्य समानविषयत्वनियम इति । तदप्यसत् । विभक्ताविति प्रत्ययस्य विभागसत्त्वकाले तद्विषयकत्वात् । तन्नाशकाले च संयोगनाशविषयकत्वात् । संयोगवन्नेति प्रतीतेर्द्रव्यगुणाद्यधिकरणभेदेन भिन्नविषयकत्वाच्च । यदपि योग्यानुपलब्ध्यभावान्न व्यधिकरणधर्मावच्छिन्नाभावधीः । तथाहि—प्रतियोगितद्व्याप्येतरयावत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्युपलम्भैकसमवधाने सत्युपलब्ध्यभावोऽभावधीहेतुः । इह तु प्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भस्य भ्रमतया दोषोऽप्युपलम्भको वाच्यः । तथा च तत्सत्त्वेऽनुपलब्धिरेव न, तदसत्त्वे च योग्यतैव नेति कथमभावधीः । न च प्रतियोग्युपलम्भकसमवधानमात्रं योग्यता, न तु प्रतियोगितावच्छेदकावच्छिन्नोपलम्भकपर्यन्तमिति वाच्यम् । तथा सति गुरुत्वावच्छिन्नघटाभावप्रत्यक्षतापत्तेः । तदुक्तमाचार्यचरणैः —

"दृष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्या नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥"

इति । तस्माद् व्यधिकरणधर्मावच्छिन्नाभावस्थले विशेषणाभावमात्रं विषय इत्येव (जायत[1] ज्याय) इति । तदप्यसत् । प्रतियोगितद्व्याप्येतरेत्यस्य साधारणप्रतियोग्युपलम्भकेत्यर्थो वाच्यः । अन्यथा संयोगादिनाशजन्यसंयोगाभावप्रत्यक्षाव्याप्तेः । तथा च दोषस्याप्यसाधारण्येन तत्समवधानस्य योग्यतायामप्रवेशेनोक्तदोषाभावात्, मणिकृन्मते प्रतियोगिसत्त्व(प्रसञ्जन)प्रसञ्जितप्रतियोगिकानुपलब्धेरादराच्च । न च शशीयत्वावच्छिन्नशृङ्गाप्रसिद्ध्या यदि शशीयत्वावच्छिन्नशृङ्गं गवि स्यादित्याकारमापादकं कथमिति वाच्यम् । शशीयत्वं शृङ्गे आरोप्य तद्विशिष्टशृङ्गस्य गव्यापादनसम्भवात् ।

केचित्तु नेहानुपलब्धिरस्ति । अनाहार्यप्रतियोगितावच्छेदकप्रतियोगिसंसर्गज्ञानाभावरूपत्वात् तस्याः । शृङ्गं शशीय नेति विशेषदर्शनवतः तादृशज्ञानरूपप्रतियोग्यप्रसिद्ध्या कथं तदभावः । न च परकीयज्ञानमादाय प्रसिद्धस्य प्रतियोगिनः तदात्मन्यभावः कारणमिति वाच्यम् । तथा सति पराज्ञातव्यक्तिद्वये परस्परव्यावृत्तधर्मावच्छिन्नपरस्पराभावप्रत्ययो न स्यादिति तत्र विशेषणाभावमात्र प्रतीतिविषय इत्यन्यत्रापि तथा समानाकारप्रतीतेः समानविषयकत्वादिति । तदपि

---

१. 'ग्भम' क. पाठः.

चिन्त्यम्। तत्कालीनतत्पुरुषीयप्रतियोग्यधिकरणगोचरतदिन्द्रियजन्यसंसृष्टबुद्धावनाहार्यत्वाभावस्यैवानुपलम्भत्वात्। तस्य च प्रकृतेऽपि सम्भवात्। यथा चैतत् तथा प्रत्यक्षमणिसारे व्यक्तमुक्तम्। किं बहुना, पराज्ञातव्यक्तिद्वयस्थले उक्तानुपलम्भरूपहेतुबाधेन तादृशप्रतीतेर्विशेषणाभावविषयकत्वकल्पनेऽप्यन्यत्र विशिष्टाभावविषयकत्वे बाधकाभावः। अन्यथा प्रत्यभिज्ञानस्य शब्दादौ तज्जातीयविषयकत्वकल्पनाद् घटादावपि तथा स्यादिति जितं क्षणिकतावादिनेति।

यदपि च प्रतियोगितावच्छेदकप्रकारकप्रतियोग्युपलब्ध्यभावो नाभावधीहेतुः। कम्बुग्रीवादिमति घटत्व नेति धीकालेऽपि अत्र घट इति ज्ञाना(न)न्तरं कम्बुग्रीवादिमान्नास्तीति प्रतीत्यनापत्तेः। गौरवेण कम्बुग्रीवादिमत्त्वस्य घटाभावप्रतियोगितानवच्छेदकत्वात्। प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्य चोपलम्भात्। तस्मात् प्रतियोगिमात्रवृत्तित्वेन गृह्यमाणधर्मप्रकारकप्रतियोगिज्ञानाभावः कारणं वाच्यः। न च व्यधिकरणधर्मावच्छिन्नाभावे तदस्ति। शृङ्गमात्रवृत्तित्वेन गृह्यमाणशृङ्गत्वावच्छिन्नस्यैवोपलम्भादिति। तदपि न। एवं सति घटत्वं घटभिन्नेऽप्यस्तीति भ्रमदशायामत्र घट इति ज्ञानेऽपि घटो नेहेति प्रतीत्यापत्तेः। प्रतियोगिमात्रवृत्तित्वेन घटत्वस्याज्ञानात्। तस्मात् फलीभूताभावप्रतीतौ प्रतियोग्यंशे यावान् प्रकारः, तन्मध्ये तस्याधिकाधिकरणत्वेनागृहीतो यत्किञ्चित्तद्धीप्रकारः, तत्प्रकारकप्रतियोगिज्ञानाभावोऽभावधीहेतुः। अत एव घटोऽस्तीति ज्ञानानन्तरं प्रमेयघटो नास्तीति न प्रतीतिः। अभावप्रतीतिप्रकारयोः प्रमेयत्वघटत्वयोराधिकाधिकरणत्वेनागृहीतघटत्वप्रकारकज्ञानसत्त्वात्। अत एव च घटोऽस्तीति ज्ञानानन्तरं नीलघटो नेहेति मतिः। घटत्वप्रकारकप्रतियोगिज्ञानेऽपि घटत्वस्य नीलत्वाधिकाधिकरणकत्वेन ग्रहात्। अस्ति चैतद् व्यधिकरणधर्मावच्छिन्नाभावेऽपि। अभावप्रतीतिप्रकार (क?) शशीयत्वाधिकाधिकरणकत्वेन गृहीतशृङ्गत्वविशिष्टशृङ्गग्रहेऽपि विशिष्टाभावसत्त्वादिति।

यच्च कश्चिदवोचत्—शृङ्गे शशीयत्वाभावग्रहात् कथमभावप्रतीतेः प्रतियोगिनि तद्वैशिष्ट्यधीरिति। तदप्यसारम्। अभावप्रतीतावपि तद्वैशिष्ट्यज्ञानस्या-

---

१. 'कप्रकारकप्र' क. पाठः २. 'दित्वस्य' ख. पाठः. ३. 'क' ख. पाठः. ४. 'त्वात्वाधिक' क. पाठः. ५ 'त्वाधिक' क. पाठः. ६. 'णत्वे' क. पाठः.

हार्यत्वात्। तत्र च बाधस्याविरोधित्वादिति न किञ्चिदेतत्।

यत्तु—एवं सति घटत्वावच्छिन्ने पटे द्रव्यत्वं नेति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाधिकरणताकोऽप्यभावः सिध्येदिति यथा तत्राधिकरणे विशेषणाभावमात्रं विषयः तथेह प्रतियोगिन्यपि। अन्यथानन्ताभावकल्पनापत्तेरिति। तदपि न। अधिकरणतावच्छेदकभेदादभावभेदस्य प्रतियोगितावच्छेदकभेदादिवानभ्युपगमेन प्रतिबन्धभावात्। भवतु वा प्रतीतिबलात् सोऽपि, किं नश्छिन्नम्, अनुभवेन वस्तुव्यवस्थायां गौरवस्याकिञ्चित्करत्वात्। अन्यथा बहु व्याकुलीस्यादित्यलं बहुना।

यच्च मान्यैरुक्तं—जनकीभूतारोपविषयस्यैव प्रतीतिविषयाभावप्रतियोगित्वमिति नियमः। न चेह शृङ्गस्यारोपः, तस्य गवि सत्त्वात्। न च विशिष्टस्यारोपोऽसत्त्वादिति वाच्यम्। विशिष्टस्यानतिरेकेण विशेषणमात्रस्यैवारोप इति तस्यैवाभावो धीविषय इति। तदपि न भव्यमिव। शुद्धविशेषणविशेष्ययोर्विशिष्टव्यवहाराभावेन विशेषणावच्छिन्नविशेष्यस्य विशिष्टतया वाच्यत्वात्। तस्य च विशेष्यमात्रसत्त्वेऽप्यसत्त्वादारोपसम्भवात्। न च विशेषणावच्छिन्नविशेष्यस्य प्रकृतेऽत्यन्तासत्त्वान्नारोप इति वाच्यम्। विशेष्ये विशे(षो?षणा)रोपेण विशिष्टप्रसिद्धौ तदनन्तरं तस्याप्यारोपे बाधकाभावात्। किञ्च, आरोपपदेनाहार्यज्ञानमेव वाच्यम्। अन्यथा घटाभावभ्रमे विद्यमानतया घटस्यानारोपेण भासमानाभावप्रतियोगित्वं न स्यात्। न स्याच्चाभाववुद्धेर्भ्रमत्वम्। तथा चाहार्यज्ञानं शृङ्गसत्त्वेऽप्यविरुद्धमेवेति व्यधिकरणधर्मावच्छिन्नाभावे बाधकाभाव इति।

अत्राहुः—प्रतियोगित्वं स्वरूपसम्बन्धः। स च जनकत्वगर्भः। न चासतः शशीयत्वावच्छिन्नशृङ्गस्य जनकता। पूर्ववर्तित्वाभावादिति न व्यधिकरणधर्मावच्छिन्ने प्रतियोगितासम्भव इति न तादृशाभावसिद्धिरिति।

अत्र शङ्क्यते। प्रतियोगित्वं शृङ्गे न तु विशिष्टे। येनोक्तदोषाशङ्का स्यात्। तन्निष्ठायां च प्रतियोगितायां शशीयत्वमवच्छेदकमात्रं प्रतीतिबलादास्थीयत इति।

अत्रायमभिसन्धिः—कारणतावच्छेदकरूपेण कारणस्य पूर्वसत्ता मृग्यते।

---

१. 'च्या' क. पाठः.

अम्मतिपृच्छारणान्तु — अवच्छेदकस्य स्वरूपसम्बन्धो वान्यद् वा सर्वथा-वच्छेद्यानतिरिक्तवृत्तेर्न । न यथा प्रमेयत्वस्य दण्डजन्यतावच्छेदकस्य मेयत्वस्य घटजन्यतावच्छेदकस्य च स्यादिति भूयानतिप्रसङ्ग आपद्येत । तथा च शशीयत्व कथं कृष्णाभावप्रतियोगितावच्छेदक, तदवृत्तित्वात् । अत एव मणिकृतोप्युक्त 'प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक' इति । न च व्यधिकरणधर्मावच्छिन्नविषयताप्रतियोगिज्ञानत्वस्य समानाधिकरणत्वेनाभिधानादिदमसङ्गतमिति वाच्यम् । तत्रावच्छेदकत्वस्य प्रकारके यथोक्त । वस्तुतोऽतिरिक्तविषयता नाम्येव । अनतिरिक्तता तु समानाधिकरणेदन्त्वावच्छेदक न तु व्यधिकरणो धर्म । न च प्रमुष्टत(त्वा)स्यान्तर्भूतो समानाधिकरणधर्मस्याप्रकारत्वात् किमवच्छेदकमिति वाच्यम् । तत्राप्रकारीभूतस्याप्यनतिप्रसक्तधर्मस्यावच्छेदकत्वादित्याहु ।

तस्माद् व्यधिकरणधर्मावच्छिन्नाभावत्वमित यावेरसम्भवीति लक्षणान्तर मणिकृत उचु । तथाहि — प्रतियोग्यसमानाधिकरणस्य समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्न यत्र भवति तेन सह तस्य सामानाधिकरण्य तदवच्छिन्नस्य सर्वस्यापि व्याप्तिरि' ति ।

अत्र वदन्ति — तत्तद्धूमसमानाधिकरणावशेषाभावप्रतियोगितावच्छेदकत्व तद्वह्नित्वावच्छिन्नत्वाद् वह्ना प्रसिद्धानुमानाव्याप्ति । न च यत्र भवनी यस्य यत्रावच्छिन्न न भवनी यर्थ , तथा च वह्नित्वावच्छिन्न प्रति तत्तद्वह्नि नावच्छेदकमिति ना याप्तिरिति वाच्यम् । तत्तद्वह्नित्वस्य वह्नित्वावच्छिन्नानतिप्रसक्तत्वेन तत्रावच्छिन्न प्रत्यप्यवच्छेदकत्वादिति ।

अत्र पक्षधरमिश्रा — नन्वत्यन्तासेन प्रतियोगितानवच्छेदकावच्छिन्नत्व मर्थ न तथा च तत्तद्वह्नित्वस्य प्रतियोगितावच्छेदकत्वेऽपि सा यतावच्छेदकवह्नित्वस्य प्रतियोगितानवच्छेदकत्वाद् नाव्याप्तिशङ्केत्याहु ।

अत्र शङ्कयत — एव सति व्यभिचारिण्यतिव्याप्ति । धूमत्वस्यापि तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । प्रतियोगितायां तत्सम्बन्धरूपायां धूमवानवच्छेद्यत्वात् । अतिरिक्तवृत्तेरनवच्छेदकत्वात् । न च तादृशात्यन्ताभाव प्रतियोगितात्वावच्छिन्नप्रतियोगितानवच्छेदकत्व विवक्षितम् । नच धूमत्वे नास्त्येव । तादृशात्यन्ताभावप्रतियोगिसमकधूमवृत्तितया धूमत्वस्य तादृशावच्छेदकत्वसत्त्वा

---

१ 'गत्वा' क पाठ

दिति वाच्यम् । एव सत्य यावद्दुर्ग्रहत्वात् । धूमवन्निष्ठयावद्वह्निविशेषाभावप्रतियोगिसमानाधिकरणवृत्तित्वेन वह्नित्वस्यापि प्रतियोगितावच्छिन्नप्रतियोग्यवच्छेदकत्वादिति ।

अत्र नव्या — एकत्वमभावविशेषणम् । तथा च हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वमर्थ । तत्र धूमत्वस्य नास्ति । वह्निसमानाधिकरणधूमसामान्याभावप्रतियोगितावच्छेदकत्व तत । वह्नित्वे च नेतम् । धूमवति वह्निसामान्याभावाभावेन तथाभूतैकाभावप्रतियोगितानवच्छेदकत्वात् तस्य । अत एव सामान्याभावसाधनमपि मणिकृता युक्तम इति नाव्याप्तिर्न वाव्याप्तिरिति वदन्ति ।

अत्रेद चिन्त्यम — अयम-धकाराभावत्वेनैतत्त्वादिति व्यभिचारिण्यभिमानि । अन्यस्यान्यस्य यावदुत्तरपर्याप्तसम्बन्धाभावस्यैकत्वाभावेन हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वाद् अन्यस्याभावत्वस्य । न चोद्भूतरूपनेजस्त्वावच्छिन्नसामान्याभाव एव एवान्धकार इति न तत्राव्याप्तिरिति वाच्यम् । कस्यचित् तेजस प्रागभावस्य कस्यचिद् ध्वसस्य सत्त्वनात्यन्ताभावाभावत्वात् । अत्यन्ताभावस्य प्रतियोगिनैव प्रागभावादिनापि विरोधात् । ननु विरोध फलबलकल्प्य । स च घटज्ञाने तदधिकरणे तदत्यन्ताभावाग्रहात् तेन सहास्तु । न तु प्रागभावादिनापि, मानाभावात् । प्रयुत ध्वसप्रागभावकाले तदाना कपालेषु घटो नास्तीति प्रतीत्या अविरोध एवेति चेद्, एव सत्यपसिद्धान्तापातात् । अस्तु वान्धकार सामान्याभावे । तथापि यत्र तावद् विशेषाभाव साध्य, तत्रैव व्यभिचारिण्यति व्याप्तिर्दुर्वारा । किं बहुना, यदा घटत्व तदा घट इति कालिकव्याप्त्यात्यन्ताप्त लक्षणम् । घटत्वसमानकालीनैकध्वसप्रतियोगितानवच्छेदकत्वाद् घटत्वस्य । ध्वसस्य सामान्याभा(वा? वत्वा)भावेन एकविशेषाभावस्यैव प्राप्ते, तत्प्रतियोगितायाश्चैकघटमात्रवृत्तित्वेनातिरिक्तवृत्तिघटत्वानवच्छेद्यत्वादिति । तस्मादिदमत्राकृतम् — एकस्य हेत्वधिकरणविशेषणम् । तेनैकहेत्वधिकरणनिष्ठयावदभावप्रतियोगितात्वावच्छिन्नानवच्छेदकत्वमर्थ पर्यवस्यति । स च सद्धेतावस्त्यत्र । एकधूमाधिकरणमहानसवृत्त्यत्यन्ताभावसमूहप्रतियोगितानाश्रयमहानसीयवह्निवृत्तित्वेन वह्नित्वस्य तथाभूताभावप्रतियोगितानवच्छे

---

१ (गत्वा' क पा २ व । य' ख पा

दकत्वात् । अनिरिक्तवृत्तेरनवच्छेदकत्वात् । व्यभिचारिणि च नैयम् । एकत्व-द्व्यधिकरणायोगोलकवृत्त्यत्यन्ताभावाना यावद्धूमप्रतियोगिदाना या प्रतियोगिता, तामा धूमत्वावच्छेदकत्वात् । तादृशप्रतियोगितात्वावच्छिन्नानिरिक्तवृत्तित्व द् धूमत्वस्य । एव कालिकसबधावपि नातिव्याप्तिशङ्केति । न चैकाधिकरणकत्वम व्यावर्तक, सबधा प्रत्येकमेकत्वादिति चेद्, न । यदधिकरणनिष्ठाभावप्रतियोगिवृत्तित्व . तदधिकरणनिष्ठाभावाप्रतियोगिवृत्तिभिन्नत्वस्योक्तप्रतियोगितावच्छेदकत्वस्यात्र विवक्षितत्वादिति न किञ्चिदनुपपन्नम् ।

यत् त्वेकत्व हेतुविशेषणमेवेति नोक्तव्याप्तिरिति, तत्त । इय गन्धवती पृथिवीत्यादिस्थलौ विशेषाभावमादायाव्याप्तिस्तथाप्यनुद्धाराद्, हेतेरेकत्वादिति न किञ्चिदेतत् । अत्र चायमेतत्कपिसयोगी एतत्त्वादित्यादावव्याप्ति । एतत्त्वरूपहेतुसमानाधिकरणैतत्कपिसयोगाभावप्रतियोगितावच्छेदकत्वादेतत्सयोगत्वस्यैतत्प्रतियोग्यसमानाधिकरणेति । तथा च तदभावस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोग्यसमानाधिकरणघटाद्यभावप्रतियोगितानवच्छेदकत्व तत्रास्त्येवेति नाव्याप्ति ।

केचित्तु — यावद्विशेषाभावव्यापकत्वात् सामान्याभावस्य तद्वति सयोग सामान्याभावोऽप्यस्तीति तमादाय वृक्ष सयोगी द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्पदमिति वदन्ति । तच्चिन्त्यम् । वृक्षे सयोगसामान्याभावसत्त्वे वृक्षे सयोगो नेति धी स्यात्, न त्वग्रे वृक्षे सयोगो नेति । न चैकावच्छिन्नयावद्विशेषाभाव सामान्याभावव्यञ्जक इति सत्त्वेऽपि सयोगसामान्याभावस्यैकावच्छिन्नयावद्विशेषाभावाभावान्न प्रतीयत इति वाच्यम् । एकावच्छिन्नयावद्विशेषाभावस्य तत्सत्तायामेव नियामकत्वात् । अन्यथा यत्किञ्चिद्विशेषाभाव एव सामान्याभाव-व्याप्योऽस्तु एकावच्छिन्नयावद्विशेषाभावरूपव्यञ्जकविरहात् तस्योपलब्धिरिति तत्तैरवश्यान्वयित्वमेव किं न ब्रूयात् । ननु वृक्षे सयोगसामान्याभावोऽङ्गीकार्य एव । वृक्षत्वावच्छेदेन सयोगस्य कर्मव्याप्यभावेन वृक्षत्वस्य सयोगाभाववृत्त्यव-च्छेदकत्वात् । यो यद्वृत्त्यवच्छेदको न भवति, स तदभाववृत्त्यवच्छेदक इति व्याप्ते । अन्यथा द्रव्यभिन्नत्वस्य गुणवृत्त्यनवच्छेदकस्यापि गुणाभाववृत्त्यन-च्छेदकत्वापातादिति चेत् न । स्वदुक्तव्याप्ते प्रमेयत्वादौ व्यभिचारात् । तस्य द्रव्यत्ववृत्त्यनवच्छेदकस्य द्रव्यत्वाभाववृत्त्यनवच्छेदकत्वात् । किञ्च वृक्षत्व

सयोगवृत्त्यवच्छेदकमेवास्तु । न च सयोगाभावसमानाधिकरणत्वात् कथ सयोग वृत्त्यवच्छेदक तद् , अतिप्रसक्तत्वादिति वाच्यम् । हन्तैव सयोगसमानाधिकरणत्वात् कथ सयोगाभावावच्छेदकमित्यपि दीयता दृष्टि । किं बहुना , वृक्षत्वावच्छेदेनाकाशादिसयोगसत्त्वात् कथ तदवच्छेदेन सयोगसामान्याभाव । यावद्विशेषाभावमन्तरेण सामान्याभावसत्त्वस्य केनाप्य(न)ङ्गीकारात । न च सयोगत्वेनैवाव्याप्यवृत्तित्वात् कथमाकाशादिसयोगोऽपि वृक्ष व्याप्य वर्ततामिति वाच्यम् । अव्याप्यवृत्तित्वस्य स्वाभावसमानाधिकरणत्वरूपस्यान्यथानुपपत्त्यैव कल्पनात् । तस्याश्च मूले हरिसयोगो न शाखायामित्यादिप्रतीत्या द्रव्यसयोग एव भावेन तत्राव्याप्यवृत्तिताकल्पनात् । न चान्यथानुपपत्त्या क्वचिदव्याप्यवृत्तिताया कल्प्यमानाया सयोगत्वेनैव तत्कल्पना लाघवात् प्रसरतीति वाच्यम् । एतादृशकल्पनाया लाघवस्याकिञ्चित्करत्वात् । अन्यथा सयोगत्वापेक्षयापि गुणत्वसत्त्वादिक सामान्यत्वादव्याप्यवृत्तितावच्छेदकमस्त्वित्येव किं न रोचये । यदि च वृत्तिमत औत्सर्गिक व्याप्यवृत्तित्वमापद्यादिकमव्याप्यवृत्तित्वमिति न गुणत्व तत्रावच्छेदकमभ्युपेषि , तदा सयोगत्वेऽपि दृक्पातस्तादृशोऽस्तु । अस्तु वा सयोगत्वेनाव्याप्यवृत्तितानियम , तुष्यतु दुर्जन इति न्यायात् । तथापि नानुपपत्ति । स्वाधिकरणनिष्ठाभावप्रतियोगित्वमव्या(प्य)वृत्तित्वम् । तच्चाकाशवृक्ष सयोगस्य घटाद्यवच्छिन्नाकाशनिष्ठाभावप्रतियोगित्वेनोपपन्न , लाघवेन स्वाधिकरणनिष्ठाभावप्रतियोगित्वस्यैवाव्याप्यवृत्तित्वपदार्थत्वात् । यावदधिकरणगर्भत्वे गौरवादित्यास्ता विस्तर । अत एव वृक्षे मास्तु सयोगसामान्याभाव , तथापि वृक्ष सयोगी द्रव्यत्वादित्यत्रैवाव्याप्तिवारक प्रतियोग्यसमानाधिकरणपदम् । द्रव्ये यावद्विशेषाभावसत्त्वेन सयोगत्वस्य तत्प्रतियोगितावच्छेदकत्वावच्छिन्न प्रत्यवच्छेदकत्वादव्याप्तिसम्भवादित्यपि कस्यचित् प्रलपितमपास्तम् । वृक्षे यावत्सयोगाभावस्याभावात् । आकाशादिसयोगस्य वृक्षत्वावच्छेदेनैव सत्त्वादित्युक्त त्वात् । तस्मादयमेतत्सयोगी एतत्त्वादित्यादावव्याप्तिवारणाय प्रतियोग्यसमानाधिकरणपदमित्येव तत्त्वम् ।

ननु व्याप्तिरेव नास्ति, कथमव्याप्ति , अदृश्यत्वात् । व्याप्तिसत्त्वे सयोगावच्छिन्नप्रदेश इव सयोगाभावावच्छिन्नप्रदेशेऽप्यनुमित्युदयापत्तेः । किञ्च. साध्याभावसामानाधिकरण्यसत्त्वाद्धेतुरयं व्यभिचार्येवेति चेद् ,न । पक्षतावच्छेद-

क्समानाधिकरण(बा[1]सा)ध्यव्याप्यानुमितिविषयतया तदवच्छेदेन साध्यसिद्धावापादकासम्भवात्। किञ्च, पक्षधर्मतावलात् साध्यसिद्धिरनुमिता, पक्षधर्मता च पक्षे हेतुसत्ता पक्षीयसाध्य विनानुपपन्ना तमाक्षिपतीत्यागत पक्षतावच्छेदकावच्छेदेन न सा य विषयीकरोति, किन्तु तदाश्रये। किञ्चित्यपि न। प्रतियोगिसिद्ध-साध्याभावमदवच्चाभ्य व्यभिचारत्वादित्युप। यात्रा।

अत्र पक्षधरमिश्रा —पक्षतावच्छेदकसामानाधिकरण्येन हेतुज्ञाने पक्षता-वच्छेदकसामानाधिकरण्येन साध्यभानम्, एव पक्षतावच्छेदकावच्छिन्ने हेतुज्ञाने तु पक्षतावच्छेदकावच्छिन्न एव साध्यभानमित्यङ्गीकार्यमेव। अन्यथा क्वचित् पक्ष-तावच्छेदकसामानाधिकरण्येन क्वचित् पक्षतावच्छेदकावच्छेदेन साध्यानुमिति रिति स्याद्, नियामकाभावात्। तस्माद् येन रूपेण हेतुज्ञान तेन रूपेण साध्य सिध्यतीति नियम इति सयोगाभावावच्छिन्नप्रदेशे सयोगानुमाने आपाद-कसत्त्वेऽपि बाधादेव तदवच्छेदेन न सयोगानुमानमिति तत्त्वम्। यच्च बाधानुपपत्त्या साध्यसिद्धिरित्युक्त तदपि न। स्वरूपसदनुपपत्तेर्भ्रमानुमित्यव्या(प्ति[2]सं,)ज्ञाना नुपपत्तेश्चासम्भवात्, पक्षीयसाध्याभाने तद्विनानुपपत्तेर्ज्ञातुमशक्यत्वादित्याहु।

अत्र शङ्क्यते —यत्र यत्र हेतुर्धीस्तत्रतत्र साध्य सिध्यतीत्येव नियम, न तु येन रूपेणेत्यादि, मानाभावात्। पक्षतावच्छेदेन साध्यस्य ज्ञाप्यभानात्। अनुपपत्तिज्ञान न सम्भवति पक्षीयसाध्याभानादिति यदुक्तम् तदपि न। पक्षे हेतु साध्य विनानुपपन्न इति ज्ञानस्य पक्षीयसाध्यज्ञान विनापि सम्भवात्। तस्मात् सयोगाभावप्रदेशे सयोगानुमितापादकाभाव इत्युपाध्यायोक्तमेव सम्यग्, न तु तत्र बाधप्रतिबन्धवशादनुमित्यनुदय इति।

अत्र प्रतिभाति— सयोगाभावप्रदेशे सयोगानुमितौ सामग्र्यभावादिति। न च पक्षतावच्छेदकसमानाधिकरणसाध्यज्ञानमात्र सामग्रीत इत्युक्तमेवेति वा च्यम्। सत्यम्। परं तु तदेव सामानाधिकरण्य सयोगाभावप्रदेशमादाय सिध्यतु, यदि तत्र बाधो न विरोधीति मिश्राशयात्। अनुपपत्तिज्ञान च यद्यप्यु(क्त[3]क्त)रीत्या सम्भवति, तथापि तस्य हेतुत्वे मानाभाव। व्याप्त्यादिज्ञानेनान्यथासि

---

१ 'क' क पाठ २ 'न सा' क पाठ

त्वाधिकरणत्वावच्छेदेन प्रतियोग्यसामानाधिकरण्य वाच्यम् । तत्र धूमाभावादा
ना त्येव । काले सामानाधिकरण्यात् । न च कालभिन्नाधिकरणे प्रतियोग्यसामा-
नाधिकरण्य विवक्षितमिति न तदादायाप्रसिद्धिरिति वाच्यम् । तथा सति काले
जगदाधार कालत्वादित्यादिकालमात्राधिकरणनिष्ठव्याप्त्यव्याप्त्यापत्ते । कालत्व-
रूपहेत्वधिकरणस्य कालभिन्नस्याप्रसिद्धया कालभिन्नहेत्वधिकरणत्वावच्छेदेन प्रति
योग्यसामानाधिकरण्यस्य क्वाप्यभावेनाप्रसिद्धिरिति ।

नैवम् । हेत्वधिकरणे क्वचिद् प्रतियोग्यसामानाधिकरण्यस्य विवक्षित-
त्वात् । तच्च धूमाभावादौ काले विद्देऽपि अय पिण्डादिरूपाधिकरणेऽस्त्येवेति
न कालमादायाप्रसिद्धिर्व्यभिचार्यति यासिद्धा । अत एव न सयोगमा यकाचा
नि । द्रव्यत्वाधिकरणे सयोगाभावस्य प्रतियोगिसामानाधिकरण्यनियमात । अत
एव वृक्ष सयोगी सत्त्वादित्यत्रापि नातिव्याप्ति । सत्त्वाधिकरणीभूतगुणादौ सयो
गाभावस्य प्रतियोग्यसामानाधिकरण्यात् ।

केचित्तु आश्रयसामानाधिकरण्यप्रविष्टसम्बन्धेन प्रतियोग्यसामानाधिकरण्य
मर्थ इति काले(पक्षे) न प्रति)योग्यसामानाधिकरण्याप्रसिद्धि । तत्र स्वरू-
पसम्बन्धेन सर्वेषा सत्त्वेऽपि आश्रयसामानाधिकरण्य(आह्रे प्रविष्ट,सयोगादिना
सत्त्वाभावेनोक्तप्रतियोग्यसामानाधिकरण्यसत्त्वात् । अत एव धूमवति समवायाव
च्छिन्नत्वद्वयभावसत्त्वेऽपि नाव्याप्ति । तथा आश्रयसामानाधिकरण्यप्रविष्टसम्बन्धेन
प्रतियोग्यधिकरणवृत्तितया निशिष्टाभाव(त्वा)सत्त्वादिति ।

तच्चिन्त्यम्—एव सति काले जगदाधार कालत्वादित्याव्याप्त्यापत्ते ।
तत्र आश्रयसामानाधिकरण्यप्रविष्टजगदाधारताप्रयोजकस्वरूपसम्बन्धेन प्रतियोग्यस
मानाधिकरणकालत्वसमानाधिकरणाभावाप्रसिद्धे । तेन सम्बन्धेन सर्वेषा कालवृत्ति-
त्वादिति ।

पञ्चधर्मिण्या — आश्रयसम्बन्धेन प्रतियोग्यसामानाधिकरण्य विवक्षि
तम् । तथा च न कालमादायाप्रसिद्धि । तत्राश्रयसमवायादिना प्रतियोग्यसामा
नाधिकरण्यसत्त्वात् । न चैव समवायसम्बन्धावच्छिन्नत्वद्वयाभावमादाय सदनुमाना

---

१. 'व म' क पाठ

व्याप्ति । आरोप्यसम्बन्धेन समवायावच्छिन्नवह्न्यभावस्यापि प्रतियोग्यसमानाधिकरणत्वादिति वाच्यम् । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नत्वस्याभावे विशेषणत्वात् । समवायावच्छिन्नवह्न्यभावस्तु न तथा । सयोगस्य ग्राह्यसामानाधिकरण्यप्रविष्टत्वादित्याहु ।

अत्र शङ्कयते—कालो जगदाधार कालत्वादित्यत्र हेतुसमानाधिकरणस्य ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नाभावस्याप्रसिद्धया लक्षणस्याव्याप्तिरिति । अत्रायमाशय —आरोप्यसम्बन्धेन प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नत्वमर्थ । अस्ति च धूमसमानाधिकरणसमवायसम्बन्धावच्छिन्नवह्न्यभावप्रतियोगितानवच्छेदकत्व सयोगसम्बन्धावच्छिन्नवह्नित्वस्येति नाव्याप्ति । अत एव कालत्वहेतावपि नाव्याप्ति । कालनिष्ठघटत्वाद्यभावस्य समवायसम्बन्धारोप्यकस्य स्वरूपसम्बन्धावच्छिन्नसाध्याप्रतियोगिकत्वादिति । ननु तथापि प्रसिद्धानुमानाव्याप्ति । धूमसमानाधिकरणस्य धूमावयवनिष्ठस्य प्रतियोग्यसमानाधिकरणवह्न्यभावस्य या प्रतियोगिता तद्वच्छेदकत्वाद् वह्नित्वस्येति चेद्, न । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेन हेत्वधिकरणस्य विवक्षितत्वात् । धूमावयवश्च न सयोगेन धूमाधिकरणमिति नाव्याप्ति । नन्वेवमपि प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धि । सर्वाभावस्य सर्वप्रतियोगिकत्वात् । तथाहि—घटाभावे पटो नास्तीति प्रतीति सर्वानुभवसिद्धा पटाभावविषयिणी च । तथा च तत्र पटाभावस्य भिन्नस्य विषयता न सम्भवति । अभावाधिकरणकाभावानङ्गीकारात् । किंतु घटाभाव एव पटाभावरूपस्तत्र विषय इत्यङ्गीकार्यम् । तथा च सिद्ध घटाभावस्य पटाभावत्वम् । एवैवन्याभावत्वमपीति धूमसमानाधिकरणस्य पटाद्यभावस्य प्रतियोगिधूमसमानाधिकरणत्वादसम्भव इति चेद्, न । घटाभावेऽप्यन्यत्र सिद्धस्य पटाभावस्य वृत्तौ बाधकाभावात् । अभावमात्राधिकरणाभावस्यैवास्माभिरनङ्गीकारात् । यदि च सिद्धान्तश्रद्धाजाड्यादभावाधिकरणकाभावानङ्गीकार, तथापि नानुपपत्ति । प्रतियोगिव्यवहारविषयासामानाधिकरण्यस्य घटाद्यभावस्य विवक्षितत्वात् । अस्ति च घटाद्यभावप्रतियोगिव्यवहारविषयता घटे, न तु पटे । व्यवहारस्यापर्यनुयोज्यत्वात् ।

ननु तथापि विकल्पासहविशेषणमिदम् । तथाहि—प्रतियोग्यसमाना-

धिकरण्य यावत्प्रतियोग्यसामानाधिकरण्य यत्किञ्चित्प्रतियोग्यसामानाधिकरण्य वा विवक्षितम् । नाद्य । अय सयोगसामान्याभाववान् सत्त्वादित्यत्रातिव्याप्ते । सत्त्वसमानाधिकरणस्य सयोगरूपाभावस्य विशेषाभावरूपप्रतियोगिसमानाधिकरणतया यावत्प्रतियोग्यसामानाधिकरण्याभावात् । प्रतियोग्यसमानाधिकरणघटाभावादिप्रतियोगितानवच्छेदकत्वात् साध्यतावच्छेद(क)स्य । नापर । अय सयोगविशेषाभाववान् वृक्षत्वादित्यादावव्याप्ते । वृक्षत्वसमानाधिकरणसयोगरूपस्य साध्याभावस्य सामान्याभावरूपप्रतियोग्यसमानाधिकरणतया सयोगविशेषाभावत्वस्य साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकत्वादिति ।

मैवम् । यत्किञ्चित्प्रतियोग्यसामानाधिकरण्यमेव विवक्षितम् । न चोक्तदोष । यत्प्रतियोग्यसामानाधिकरण्य, तद्वृत्तिप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । अय सयोगसामान्याभाववान् सत्त्वादित्यत्र सत्त्वसमानाधिकरणस्य सयोगरूपस्य साध्याभावस्य सामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वात्, सयोगसामान्याभावत्वस्य संयोगसामान्याभाववृत्तिप्रतियोगितावच्छेदकत्वादतिव्याप्तिविरहात् । सयोगविशेषाभाववान् वृक्षत्वादित्यत्र हेतुसमानाधिकरणस्य सयोगरूप साध्याभावस्य सामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वेऽपि सयोगविशेषाभावत्वस्य सामान्याभाववृत्तिप्रतियोगितावच्छेदकत्वविरहादव्याप्तिविरहात् । विशेषाभावत्वस्य विशेषाभाववृत्तिप्रतियोगितायामेवावच्छेदकत्वात् । तथा च स्वाश्रयासमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्व पर्यवसानार्थ । स्वपदेनावच्छेद्यप्रतियोगितापरामर्शादिति न काप्यनुपपत्ति । नन्विद लक्षण द्वित्वावच्छिन्नबह्वभावादिकमादाय सदनुमानाव्याप्तम् । अथ द्वित्वावच्छिन्नबह्वभाव प्रतियोगिसमानाधिकरण एवेति न तमादायाव्याप्तिरिति चेद्, न । प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्य तदर्थस्योक्तत्वात् । तस्य च द्वित्वा(वच्छिन्न)बह्वभावेऽपि सत्त्वेनाव्याप्तितादवस्थ्यात् । अथ प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमित्यत्र सामानाधिकरण्याभावोऽर्थ । स च यत्किञ्चित्प्रतियोगिसत्तयैव नास्ति । तथा च द्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदक द्वित्व बहित्व च । तन्मध्ये बहित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिक

---

१ 'सि' क पाठ

रण्यसत्त्वान्न द्वित्वावच्छिन्नाभावमादायाव्याप्तिरिति चेद्, न। एवं सति वह्निघटोभयवान् धूमादिति व्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्[1]। धूमसमानाधिकरणद्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणत्वाद् द्वित्वावच्छिन्नाभावस्य। अत एव द्वित्वावच्छिन्नाभावमादायाव्याप्तिवारणायाव्याप्यवृत्तिप्रतियोगिकत्वमभावविशेषणमित्यपि कस्यचित् कल्पनमपास्तम्। एवं सत्युक्तव्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्। वह्निघटोभयवृत्तिद्वित्वस्य धूमसमानाधिकरणाव्याप्यवृत्तिप्रतियोगिकाभावप्रतियोगितानवच्छेदकत्वात्। तस्माद् द्वित्वावच्छिन्नाभावमादाय लक्षणाव्याप्तिर्दुष्परिहरेति।

अत्र केचित् — द्वित्वावच्छिन्नाभावानङ्गीकारेण लक्षणमिदम्। तेन धूमवति वह्न्यभावस्याभावान्न धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं वह्नित्वमिति नाव्याप्तिः। नन्वेवं घटपटोभयवानयं धूमादिति व्यभिचारिणि लक्षणस्यातिव्याप्तिरिति दोषः। धूमसमानाधिकरणस्य घटाभावस्य पटाभावस्य च प्रतियोगितायां द्वित्वस्य व्याप्यवृत्तितया अतिप्रसक्तत्वेनानवच्छेदकत्वादिति चेद्, न। घटाभावपटाभावयोर्धूमसमानाधिकरणतया तादृशाभावप्रतियोगितात्वेनानुगतप्रतियोगितानतिप्रसक्ततया द्वित्वस्य तदवच्छेदकत्वात्। नन्वेवमपि अयमात्मत्वद्रव्यत्वोभयवान् गुणवत्त्वादित्यादावतिव्याप्तिः। गुणवत्त्वमसमानाधिकरणात्म(त्व)विरहसत्त्वेऽपि द्रव्यत्वविरहासत्त्वेन तदुभयवृत्तिद्वित्वस्य तादृशाभावाप्रतियोगिवृत्तेस्तदनवच्छेदकत्वादिति चेद्, न। तत्राव्यभिचारसत्त्वेऽपि द्वित्वावच्छिन्नेन हेतोः सामानाधिकरण्याभावादतिव्याप्त्यनवकाशात्। न च तादृशाभावप्रतियोगितानवच्छेदकद्वित्वावच्छिन्नद्रव्यत्वसामानाधिकरण्यस्य हेतौ सत्त्वात् कथं नातिव्याप्तिरिति वाच्यम्। प्रतियोगितानवच्छेदकपर्याप्त्यधिकरणसामानाधिकण्यस्य तदर्थत्वात्। तस्य च तत्राभावात्। द्वित्वपर्याप्त्यधिकरणमिलितासामाधिकरण्यात्। नन्वेवमपि घटत्वद्रव्यत्वोभयवानयं गुणवत्त्वादित्यत्रातिव्याप्तिः। द्वित्वस्य हेतुसमानाधिकरणाभावाप्रतियोगिनि द्रव्यत्वेऽपि वृत्त्या प्रतियोगितानवच्छेदकत्वात्। तदवच्छिन्नघटत्वद्रव्यत्वोभयसामानाधिकरण्यसत्त्वाच्च गुणवत्त्वस्येति चेद्, न। हेतुसमानाधिकरणाभावप्रतियोगितानधिकरणपर्याप्तवृत्तिकेतरधर्मत्वस्यैवोक्तप्रतियोगितावः

---

१. 'ह्' क. पाठः. २. 'ह्' क. पाठः. ३. 'वयो' क. पाठः.

तियोगितावच्छेदकत्वाद् वह्नित्वस्येति वाच्यम् । तादृशाभावे ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वाभावस्यैव विवक्षितत्वादिति प्रागेवोदितत्वात् । अत एव सयोगसामान्याभाववान् सत्त्वादित्यत्र नातिव्याप्ति, सयोगरूपस्य साध्याभावस्य साध्यतावच्छेदकसामान्याभावत्वावच्छिन्नासामानाधिकरण्यनियमात् । सयोगविशेषाभावसाध्यके नाव्याप्ति, सयोगस्य साध्याभावस्य विशेषाभावत्वावच्छिन्नसामानाधिकरण्यनियमात् ।

वस्तुतस्तु प्रतियोग्यसमानाधिकरणमित्यत्र प्रतियोगित्वसामानाधिकरण्योभयाभावावच्छिन्नसाध्यकत्वमर्थ । द्वित्वावच्छिन्नाभावस्तु न तथा । साध्यतावच्छेदकावच्छिन्नेन सह प्रतियोगित्वसामानाधिकरण्ययोरुभयोरपि सत्त्वेन तदुभयाभा(वा)वच्छिन्नसाध्यकत्वस्य तादृशाभावेऽभावात् । सद्धेतौ घटाद्यभावस्तादृश । साध्यस्य तेन सह प्रतियोगित्वासत्त्वेन तदुभयाभा(वा)वच्छिन्नत्वस्य सत्त्वात् । एकसत्त्वेऽपि द्वित्वावच्छिन्नाभावसत्त्वात् । व्यभिचारिणि तु साध्याभाव एव तादृश । प्रतियोगित्वसत्त्वेऽपि साध्यस्य तत्सामानाधिकरण्याभावेन तदुभयाभावावच्छिन्नत्वसत्त्वात् । अत एव सयोगसामान्याभावसाध्यकेऽपि नातिप्रसङ्ग । सयोगस्य सामान्याभावरूपसाध्येन सहासमानाधिकरणतया तस्य प्रतियोगित्वसामानाधिकरण्योभयाभावावच्छिन्नत्वात् । सयोगविशेषाभावसाध्यके च नाव्याप्ति । सयोगस्य विशेषाभावसामानाधिकरण्यप्रतियोगित्वयोरुभयोरपि सत्त्वेनोभयाभावावच्छिन्नत्वाभावादिति युक्तमुत्पश्याम ।

ननु द्रव्यत्वसाध्यक गुणकर्मान्यत्वविशिष्टसत्त्वे हेतौ लक्षणाव्याप्ति । सत्त्वरूपहेतुसमानाधिकरणाभावप्रतियोगित्वाद् द्रव्यत्वस्य । न च गुणकर्मान्यत्वविशिष्टसत्त्ववति न द्रव्यत्वाभाव इति नाव्याप्तिरिति वाच्यम् । एव सति व्यभिचारिण्यतिव्याप्ते । आर्द्रेन्धनप्रभवत्वविशिष्टवह्निमति धूमाभावाभावादिति चेद्, न । यद्धर्मावच्छिन्नसाधनसमानाधिकरणाभावाप्रतियोगित्वमित्यर्थाद्, गुणकर्मान्यत्वविशिष्टसत्त्वसमानाधिकरणाभावप्रतियोगित्व न द्रव्यत्व येति नाव्याप्ति । व्यभिचारिण्यार्द्रेन्धनप्रभवत्वेन धूमव्याप्यतास्येव, वह्नित्वेन तु नास्त्येवेति नातिप्रसङ्ग । अत्यन्ताभावपद च विरोध्यभावपरम् । अन्यथा अय घटाभाववान् पटाभाववत्त्वादिति व्यभिचारिण्यतिव्याप्तिप्रसङ्गात् । अत्यन्ताभावत्वस्य साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । अभावप्रतियोगिकाभा

वानङ्गीकारात् । भावप्रतियोगिकाभावप्रतियोगितायाश्चाभाववृत्तिधर्मानवच्छेद्यत्वात् । विरोधिपरत्वे च भावस्यैवाभावविरोधित्वात् प्रतियोगितावच्छेदकमभावत्वं भवत्येवेति नातिप्रसङ्गः ।

पक्षधरमिश्रास्तु — अत्यन्ताभावपदं भाद्यसामानाधिकरण्यविरोधिसंसर्गाभावपरमवश्यं वाच्यम् । तेन दैशिकसामानाधिकरण्येऽत्यन्ताभावस्य, कालिकसामानाधिकरण्ये ध्वंसप्रागभावयोर्लोपः । अन्यथा यदा घटत्वं तदा घट इति कालिकव्यक्तिव्याप्यता जातौ प्रसज्येत । महाप्रलये घटत्ववति घटध्वंससत्त्वेऽपि तदत्यन्ताभावाभावेन घटत्वस्य तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । न च महाप्रलये घटध्वंसवत् तदत्यन्ताभावोऽप्यस्त्येव, तत्प्रतियोगितावच्छेदकमेव घटत्वमिति नातिव्याप्तिरिति वाच्यम् । तथा सति गोत्वाश्वत्वयोरपि कालिकव्याप्तिर्न स्यात् । गोत्ववति काले ऽश्ववात्यन्ताभावस्यापि सत्त्वादिति वदन्ति ।

अत्र शङ्क्यते — प्रलयेऽत्यन्ताभावसत्त्वेन तस्य चात्यन्ताभावस्य तत्कालोपाधौ व्यक्त्यसमानकालत्वेन प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन व्यक्तेर्जातिनिरूपितव्यापकताया अप्रसङ्गः, जातौ तु नैवम् । विद्यमानस्यापि जात्यत्यन्ताभावस्य सकलकालोपाधौ प्रतियोगिसमानकालतानियमाद् विशिष्टाभावप्रतियोगित्वस्य तत्रासत्त्वादव्याप्तिनिरासादिति ।

अत्रायमाशयः — पक्षधरमिश्राणां कालिकव्याप्तावन्वयव्यतिरेकाभ्यां ध्वंसप्रागभावगर्भव्यभिचारज्ञानस्य, दैशिकव्याप्तावत्यन्ताभावगर्भव्यभिचारज्ञानस्य(च) प्रतिबन्धकत्वाद् भाद्यसामानाधिकरण्यविरोधिसंसर्गाभावपरत्वमावश्यकम् । तदुक्तं पक्षधरमिश्रैः — तत्र तदत्यन्ताभावसत्त्वेऽपि ध्वंसप्रतियोगित्वज्ञानस्य विरोधित्वादिति ।

अत्र केचित् — अत्यन्ताभावपदमावश्यकम्, अन्यथा संयोगवान् गुरुत्वादित्यत्र गुरुत्ववति काले यत्किञ्चित्संयोगावश्यंभावेन पूर्वसंयोगध्वंससत्त्वेऽपि संयोगसामान्यस्य गुरुत्वव्यापकता कालिकी स्यात् । गुरुत्वसमानाधिकरणसकलसंयोगध्वंसस्य तत्तत्कालोत्पन्नस्यानतिप्रसक्ततया संयोगत्वस्य प्रतियोगितायामवच्छेदकत्वात् । अत्यन्तपददाने तु न दोषः । गुरुत्वकाले संयोगात्यन्ताभावसत्त्वेऽपि तस्य प्रतियोगिसमानकालत्वात् । प्र(त्य?ति)योग्यसमानकालात्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य संयोगत्वे सत्त्वादिति । तदसत् । एकत्वस्याधि-

करणविशेषणतायाः प्रागेवोक्तत्वात्। तथा च गुरुत्वाधिकरणीभूतयत्किञ्चिदेककालवृत्तिप्राह्यसामानाधिकरण्यविरोध्यभावप्रतियोगितावच्छेदकभिन्नत्वं पर्यवस्यति। तच्च संयोगत्वेऽस्त्येव। भिन्नभिन्नकाले गुरुत्वाश्रयीभूते सर्वसंयोगध्वंससत्त्वेऽपि एकस्मिन् गुरुत्वाधिकरणकाले तावद्ध्वंसासत्त्वादिति।

(अत्राभावे ग्राह्यसामानाधिकरण्यविरोधित्वं) ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकावच्छिन्नत्वम्। विरोधि(क[1])तावच्छेदक च दैशिक्यामत्यन्ताभावत्वादि, कालिक्यां तु ध्वंसत्वं प्रागभावत्वं च। व्याप्तौ च वस्तुतो विरोधितावच्छेदकं प्रविष्टं, न तु विरोधितावच्छेदकत्वेन तस्य ज्ञानमपेक्षितं, येन विरोधित्वस्य सहानवस्थाननियमलक्षणस्य प्रवेश आत्माश्रयादिशङ्का स्यात्। नन्ववच्छेदकत्वमवच्छित्तिधीजनकत्वम्। तच्च नियमगर्भत्वेन व्याप्तिगर्भमित्यात्माश्रयादि दुर्वारमिति चेत्।

अत्र केचित्—अवच्छेदकत्व स्वरूपसंबन्धात्मकमेव। अन्यथा घटजनकतावच्छेदकं दण्डत्वं, न चक्रभ्रमजनकत्वमनतिप्रसक्तमित्यत्र नियामकाभावप्रसङ्गात्। तथा चात्रापि स्वरूपसंबन्धात्मकमेवावच्छेदकत्वम्। यथा च तथा सति नात्माश्रयादि तथा वक्ष्यत इति वदन्ति।

तच्चिन्त्यम्। एव सति अयं प्रमेयधूमवान् वह्नेरित्यत्र वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य स्वरूपसंबन्धात्मकस्य लघुनि धूमत्व एव भावेन प्रमेयधूमत्वे गुरणि तदभावेन व्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्। अत एवानतिप्रसक्तलघुधर्मान्तराघटितशरीरत्वे सत्यनतिप्रसक्तत्वमवच्छेदकत्वं अत एवानतिप्रसक्तलघुधर्मान्तराघटितशरीरत्वे सत्यनतिप्रसक्तत्वमवच्छेदकत्वं नीलधूमत्वादिव्यावृत्तम(त्य[1]न्य)त्रेतीहापि तदेव विवक्षितमिति निरस्तम्। प्रमेयधूमत्वादावनतिप्रसक्तधूमत्वघटितशरीरतया प्रतियोगितानवच्छेदकत्वप्रसङ्गेन व्यभिचारिण्यतिव्याप्तेस्तादवस्थ्यात्। तस्मादनतिप्रसक्तत्वमात्रमिहावच्छेदकत्वं लघुगुरुसाधारणमवधेयम्। न च प्रतियोगिता तत्तत्स्वरूपरूपा, तदतिप्रसक्तमेव धूमत्वादीति व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्। प्रतियोगिता चेनानुगमस्य प्रागेवोक्तत्वात्। ननु प्रतियोगितात्वमपि तावु नानुगतैकमन्तीत्यननुगम. सर्वत्रापि भवत्येवेति चेद्, न। तादृशात्यन्ताभावनिरूपितत्वस्यानुगतधर्मस्य सर्वत-

---

१. 'ऊ' क पुस्तके

प्रतियोगिनामाधारणस्य सत्त्वादनुगमसंभवात् । नन्वेवमपि यदा गोत्वं तदा गौरित्यत्राव्याप्तिः । गोत्वसमानकालीननानागोध्वंसप्रतियोगितानवच्छेदकत्वाद् गोत्वस्य । नहि तत्राप्यभाव एकोऽस्ति, येन तत्प्रतियोगितात्वेनानुगतप्रतियोगितानां गोत्वमवच्छेदकं भवेदिति चेद्, न । ऐकाधिकरण्यावच्छिन्नत्वेन तत्रापि ध्वंसमुदायानुगमात् । तेन च प्रतियोगितायां अनुगमसंभवात् । अत एव प्रतियोगितात्वेनानुगमे आत्माश्रयः, प्रतियोगितात्वस्य स्वरूपसंबन्धघटितस्य व्याप्तिघटितत्वादित्यपि दूषणमपास्तम् । अभावनिरूपितत्वेनैव तत्रानुगमेन प्रतियोगितात्वस्याप्रवेशात् ।

नन्वयं वह्निमदाश्रयो धूमवदाश्रयत्वादित्यादौ नानाव्यक्तिसाध्यतावच्छेदकसद्धेतावव्याप्तिः । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् तत्तद्वह्नीनाम् । किञ्च, पर्वतो वह्निमानित्यत्राप्यव्याप्तिरेव । धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयत्वावच्छिन्नवह्नित्वादिप्रविष्टतया वह्नित्वस्य तदनवच्छेदकत्वासंभवादिति चेद्, न । तादृशाभावप्रतियोगितानवच्छेदकत्वं यद्धर्मावच्छिन्नमित्यर्थो भवति । उक्तस्थले तत्तद्वह्नेः प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वावच्छिन्नत्वेन न प्रतियोगितावच्छेदकता, किन्तु तत्तद्वह्नित्वावच्छिन्नत्वेनैव । तेन रूपेण व्यापकतावच्छेदकत्वं नास्त्येवेति न तत्र दोषः । वह्नित्वमपि महानसीयवह्नित्वत्वावच्छिन्नप्रतियोगितावच्छेदकं न तु वह्नित्वत्वावच्छिन्नम् । अतो न तत्राव्याप्तिः । नन्वन्योन्याभावस्याव्याप्यवृत्तित्वाद् यदि वह्नित्वे(न) तत्तद्वह्नित्वघटकतया प्रतियोगितावच्छेदकत्वं, तदा वह्नित्वत्वावच्छिन्नवह्नित्वेऽपि प्रतियोगितावच्छेदकभिन्नत्वमसंभवीति चेद्, न । वह्नित्वत्वावच्छेदेन वह्नित्वे प्रतियोगितावच्छेदकत्वात्यन्ताभावस्य विवक्षितत्वात् । प्रतियोगितावच्छेदकत्वत्वविशिष्टप्रतियोगितावच्छेदकत्वसापेक्षज्ञानतयाम्य प्रतियोगितावच्छेदकभेदापेक्षया गुरुप्रतिपत्तिकत्वेऽप्युक्तयुक्त्या आवश्यकत्वात् । ननु सामानाधिकरण्यं समानेनाधिकरणेन सम्बन्धः । सम्बन्धत्वं च विशिष्टप्रत्ययजनकत्वगर्भमित्यात्माश्रयादिस्तथापि दुर्वार एवेति चेद्, न । सम्बन्धस्य प्रवेशेऽपि सम्बन्धत्वस्याप्रवेशेनोक्तदोषाभावात् । ननु तथापि शुद्धस्य सम्बन्धस्य कथं भानमिति सम्बन्धत्वभानं प्रकारतया वाच्यमेवेति चेद्, न । संयोगत्वादिना गृहीतस्य सम्बन्धस्य व्याप्तिघटकत्वात् । ननु व्याप्तिज्ञानस्यानुमितिजनकतामहो

न सम्बन्धत्वज्ञानमन्तरेण । नहि संयोगज्ञानत्वादिनानुमितिहेतुताग्रहः, व्यभिचारादित्युक्तदोषस्तदवस्थ एवेति चेद्, न । भ्रान्तोऽसि । अनुमितिकरणताग्रहे ग्राह्यकारणताप्रविष्टव्याप्तेरिव संबन्धत्वप्रविष्टव्याप्तेरपि प्रवेशे क्षत्यभावात् । प्राथमिकव्याप्तिग्रहे तत्प्रवेशस्यैव वारणीयत्वात् । किञ्च, व्याप्तिर्न सर्वसाधारण्येकेति तत्तद्व्याप्तिज्ञानत्वेन तत्तदनुमितित्वेन हेतुहेतुमद्भावो ग्राह्यः । स च संयोगज्ञानत्वादिनापि ग्रहीतुं शक्यत एवेति न तत्रापि संबन्धत्वज्ञानापेक्षा ।

ननु व्यधिकरणधूमवह्न्योः सामानाधिकरण्य नास्तीति तयोर्व्याप्तिर्न स्यात् । न च समानाधिकरणवृत्तिधर्मवत्त्वमित्यर्थः । तच्च धूमत्वमादाय सर्वत्राप्यस्तीति वाच्यम् । तादृशयत्किञ्चिद्धर्मवत्त्वस्य मेयत्वमादायातिप्रस(क्त?क्त्वा)त् । यावद्धर्मवत्त्वस्य चात्राप्यभावात् । तद्धूमत्वादेरन्यधूमावृत्तित्वात् । न च सामानाधिकरण्यावच्छेदकधर्मवत्त्वमर्थः, तच्च धूमत्वमेवेति नातिप्रसङ्ग इति वाच्यम् । तथा सति तावन्मात्रस्यैवादुष्टतया पूर्वदलवैयर्थ्यापातादिति ।

मैवम् । यद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकावच्छिन्नस्य साध्यस्य सामानाधिकरण्यं, तद्धर्मावच्छिन्नत्वस्य लक्षणार्थत्वात् । तच्च व्यधिकरणधूमस्याप्यस्तीति नोक्तदोषः । यदि च समानाधिकरणयोरेव व्याप्तिरिति मतं, तदा यथाश्रुतमेवादरणीयम् । न च तथा सत्यवच्छेदकपर्यन्तधावनवैयर्थ्यम् । तावता साधनसमानाधिकरणाभावाप्रतियो(ग्य?गि)साध्यसमानाधिकरणत्वस्यैवाविकलत्वात् । अत एव मणिकृतापि यद्वेत्यादिना समानाधिकरणमात्रव्याप्तिलक्षणं कुर्वता तथैव लिखितमिति वाच्यम् । इयं गन्धवती पृथिवीत्वादित्यत्राव्याप्तेस्तथा सति दुर्वारत्वापातात् । पृथिवीत्वसमानाधिकरणाभावप्रतियोगित्वात् सर्वगन्धानाम् । तस्मादत्राप्यवच्छेदकविवक्षावश्यकेति नोक्तशङ्कावकाशः । मणिकारस्यापि व्यधिकरणयोः सामानाधिकरण्याभावान्न व्याप्तिरित्येवाभिमतं, न त्वत्रावच्छेदकविवक्षा न कार्येति ।

पक्षधरमिश्रास्तु — समानाधिकरणव्याप्तिपक्षेऽवच्छेदकविवक्षा मणिकारस्यानभिमतैव । न चैवमियं गन्धवती पृथिवीत्वादित्यत्राव्याप्तिः कथमुद्धर्तव्येति वाच्यम् । स्वाधिकरणीभूतयद्व्यक्तिनिष्ठाभावाप्रतियोगिनी या साध्यव्यक्तिः, तद्व्यक्त्या सह स्वाधिकरणीभूततत्तद्व्यक्तिवृत्तित्व (र्ति?) व्याप्तिरित्यर्थात् । अस्ति च पृथिवीत्वाधिकरणभूतपटनिष्ठाभावाप्रतियोगित्वं घटीयगन्धव्यक्तेरिति

पटीयगन्धेन सह पृथिवीत्वस्य पटरूपाधिकरणवृत्तित्वमेव व्याप्ति । एव पटादि-गन्धेनापि सह तदधिकरणवृत्तित्वमेव व्याप्तिरिति न काप्यनुपपत्ति । न चैव पृथिवीत्ववद् द्रव्यत्वमपि गन्धव्याप्य स्यादेवेति वाच्यम् । द्रव्यत्वस्य पटादिरू-पाधिकरणावच्छिन्नस्य व्याप्यत्वापादन(मि१ इ)ष्टापत्ते । द्रव्यत्वत्वेन च न तस्य गन्धव्याप्यता । द्रव्यत्वत्वावच्छिन्नद्रव्यत्वस्य गन्ध विनापि जलादौ सत्त्वात् । पृथिवीत्वत्वावच्छिन्नपृथिवीत्व न गन्ध विनापि काप्यस्तीति भवति तेन रूपेण तस्य व्याप्यतेत्यप्याहु ।

अत्र शङ्कयते—द्रव्यत्वमेवमेव नद्योक्तक्रमेण च गन्धव्याप्य भवत्ये-वेति व्याप्यमात्रवृत्तेर्द्रव्यत्वस्य मुखे न गन्धव्याप्यतावच्छेदकत्वमिति ।

अत्रायमाशयो मिश्राणा—यद्धर्मावच्छिन्नसाधनाधिकरणीभूतयावद्व्य क्तिनिष्ठाभावाप्रतियोगिता साध्यतावच्छेदकाश्रयस्य, तद्धर्मस्य तत्साध्यतावच्छेद-काश्रयव्याप्यतावच्छेदकत्वम् । अस्ति च पृथिवीत्वत्वावच्छिन्नपृथिवीत्वाधिकरणी भूतयावद्व्यक्तिनिष्ठाभावाप्रतियोगित्व गन्धत्वाश्रयस्य । पृथिवीत्वाधिकरणे यत्कि-ञ्चिद्गन्धावश्यकत्वात् । अतो भवति पृथिवीत्वत्व तद्गन्धव्याप्यतावच्छेदक, न तु द्रव्य त्वत्वावच्छिन्नद्रव्यत्वाधिकरणेऽपि सर्वत्र गन्धावश्यकत्व, येन द्रव्यत्वत्व तद्गन्ध-व्याप्यतावच्छेदक भवेदिति दिक् ।

एवमन्योन्याभावगर्भव्याप्तिलक्षणम् । अन्यत्र साध्यसामानाधिकरण्यावच्छे-दकरूप(व)त्त्व, साध्याधिकरणतावच्छेदकाधिकरणताप्रतियोगि(क)त्व, स्वाधि-करणतान्यूनवृत्त्यधिकरणताप्रतियोगिसाध्यसामानाधिकरण्यादिकमपि व्याप्तिलक्षण मूह्यम् । एव च साध्याभाववदवृत्तित्व, साध्यवत्प्रतियोगिकान्योन्याभावासामाना धिकरण्य, साध्याभावव्यापकाभावप्रतियोगित्व, साध्याविनाभूतत्वमित्यादि प्राची-नव्याप्तिलक्षणानामप्युक्तलक्षणकथनपरतया केवलान्वयिसाध्यकव्याप्त्यादिक सा-ध्यत्वादिप्रवेशेनात्माश्रयादिक च न शङ्कनीयमिति सक्षेप ।

इदन्त्ववधेय—ससर्गाभाव क्वचिदत्यन्ताभाव । स च सति सभवे सामान्याभाव एव प्रवेश्य । यावद्विशेषाभावापेक्षया लघुत्वाल्लघुप्रतिपत्तिकत्वाच्च । अत एव सामान्यावच्छिन्नप्रतियोगिकश्चाभाव पृथगेव । अन्यथा वायौ प्रसिद्धरू-

---

१ गिकत्व' इ पाठ

अत्र पक्षधरमिश्राः — प्रतियोगिभेदेनाभावो न भिद्यते। तथा सति घट-प्रतियोगिकाभावचतुष्टयस्य भेदो न स्यात्। किन्तु प्रतियोगितावच्छेदकभेदात्। तच्चात्राप्यस्त्येव। अन्यन्ताभावे संसर्गम्यान्योन्याभावे तादात्म्यस्य प्रागभाव-ध्वंसयो प्रतियोग्युत्तरकालपूर्वकालयोरवच्छेदकत्वात्। तथा च रूपसंसर्गप्रति योगितावच्छेदकावच्छिन्नाभाव सामान्याभाव एव। बाधक विना सम्बन्धितावच्छे दकभेदात् सम्बन्धि(क)पदार्थभेदस्वीकारादिति।

अत्र शङ्कते — अन्योन्यात्यन्ताभावयोर्द्वयोरपि प्रतियोगितावच्छेदक लाघवाद् घटत्वमेव। तथा च तस्याभेदा(द) भेदापत्ति। ननु तादात्म्यसंसर्गयो-रारोप्यसंसर्गत्वात् तद्भेदात् तयोर्भेद इति चेद्, न। तर्हि क्वचित् प्रतियोगिता-वच्छेदकभेद, क्वचिदारोप्यसंसर्गभेदोऽभावभेदश्च इत्यननुगम। न चारोपविषय-भेदत्वेन भेदकत्व, तच्च प्रतियोगितावच्छेदकसंसर्गप्रतियोगिभेदसाधारणमिति नाननुगम इति वाच्यम्। तथा सति अधिकरणस्याप्यारोपविषयतया तद्भेदादप्य-भावभेदेऽपसिद्धान्तापातादिति।

अत्र प्रतिभाति — अधिकरणभेदादभावभेदोऽभाव एव धर्मभिन्नो न सिध्येत्। अधिकरणेनैव तद्व्यवहारोपपत्ते। नह्यधिकरणाननुगमेनानुगतघटात्य न्ताभावव्यवहारोऽनुपपन्न इत्यतो युक्त्यन्तरमस्ति भिन्नाभावसाधकम्। अतो बाधकादधिकरणभिन्नारोपविषयभेदेनाभावभेद इति कल्प्यते। गौरवस्य प्रामाणि-कत्वात्। प्रतियोगितावच्छेदकभिन्नत्वविशेषणे मानाभावात्। सामान्याभावस्वी कारापत्तेश्च फलमुखत्वात्। किञ्च, दण्डी पुरुषो नास्तीत्यत्र शुद्धपुरुषाभावस्या-सत्त्वेऽपि दण्डविशिष्टपुरुषाभावस्यानुभूयमानतया प्रतियोगितावच्छेदकभेदेनाभाव भेदोऽवश्यमङ्गीकरणीय। अपि च घटो नास्तीति सामान्याभावावगाहिबुद्धौ विशेषाभावसहस्रस्य विषयतया कल्पने गौरवमिति लाघवादेकाभावसिद्धि। न च विशेषाभावानामननुगमेऽपि कल्पत्व साधकमिति वाच्यम्। अननुगमापेक्षया कल्प्यत्वगौरवस्य हीनत्वात्। अन्यथा स्वरूपसम्बन्धस्य विशिष्टधीविषयत्वे गौरव समवायेन। कर्तृजन्यताया च घटत्वादेरननुगतस्यापि कल्पत्वा(द)वच्छेदकत्व प्रसङ्गेन कल्प्यक्षित्यादिकर्त्रापि गतमेव। किं बहुना द्रव्यत्वगुणत्वकर्मत्वाभाव समूहस्य सत्ताविरहव्यवहारकत्वापाताद् भिन्नसत्ताविरहोऽपि न स्यात्। न स्याच्च द्रव्यत्वाद्यभावोऽपि। पृथिवीत्वाद्यभावकृतादेव तद्व्यवहारोपपत्ते। एव पृथिवीत्व-

वच्छिन्नध्वसस्योत्पत्तिरिति वाच्यम् । यावत्प्रतियोगिनन्यताया गौरवेण यत्किञ्चित्प्रतियोगिजन्य(त्व त्वस्य) महाप्रलयकाले सम्भवेन तदा घटत्वावच्छिन्नध्वसोत्पत्तौ बाधकाभावात् । किं बहुना, दशघटानामेकदण्डोत्पन्नानां दशसख्यावच्छिन्नप्रागभावे बाधकाभाव । एवमेकदा नष्टानां तेषां तद्धर्मावच्छिन्नप्रतियोगिकध्वसे बाधकाभावादिति ।

अत्र ब्रूम —तत्तद्घटप्रतियोगिकप्रागभावत्वेनैव तत्तद्घटनाश्यता तत्तद्घटविरुद्धकालता च, न तु तन्मात्रप्रतियोगिप्रागभावत्वेन, गौरवात् । तथा च घटत्वावच्छिन्नप्रागभाव कदा वर्तेता, ससारस्यानादितया यत्किञ्चिद्घटस्य सर्वदा सत्त्वात् । एव ध्वसेऽपि तत्तद्घटध्वसत्वेनैव तत्तद्घटजन्यता, न तु तन्मात्रध्वसत्वेन, गौरवादिति पर्यवसित यावत्प्रतियोगिजन्यत्व ध्वसस्येति यावद्घटस्यैकदा सत्त्वाभावात् कथ ध्वसोत्पत्ति । किञ्च, नैकाधिकरण्यावच्छिन्नयावद्भिशेषाभाव विना न सामान्याभाव इति सर्वानुभवसिद्ध, प्रागभावध्वसौ प्रतियोगिसमवा(यवृत्तिरि वितृत्ती इ)त्यपि । तथा च विशेषाभावानामैकाधिकरण्याभावात् कथ सामा यामावयो ध्वसप्रागभावयो सत्तेति न तयो सामान्याभावत्वम् । अत एव किं बहुनेत्यपि निरस्तम् । किञ्च, तत्प्रागभावध्वसाधारस्य तदाधारतानियमेनान्यघटाधारतान्यकपाल आपद्येत । प्रसज्यते च घटानामभेद । तत्प्रागभावजन्यस्य तत्त्वनियमात् । न च सामान्यप्रागभावो न प्रतियोगिजनक इति वाच्यम् । तथा सति प्रागभावत्वव्याकोपात् । दशघटत्वावच्छिन्नध्वसस्यापि तत्तद्विशेषध्वससामग्रीप्रसूतत्वेन तदभेदप्रसङ्गात् । ननु विशेषध्वसाजनकघटान्तरजन्यत्वेन ततोऽस्य भेद इति चेद्, न । एव सत्यपि विशेषध्वससामग्र्यामधिकप्रवेशेन तदुत्पत्त्या प्रमाया ज्ञानविशेषत्ववत् तस्य विशेषध्वसविशेषत्वापत्तेरित्यास्ता पल्लवेन ।

इद त्ववधेयम् — अन्योन्याभावगर्भव्यासौ प्रतियोग्यसामानाधिकरण्य न विशेषणम् । अन्योन्याभावस्या याप्यवृत्तित्वविरहेणान्या त्यप्रसङ्गात् । न च तदेवासिद्धम् । अभेदस्याबाधितप्रत्यभिज्ञानात् । भेदाभेदयो परस्परविरोधादिति माणिक्कृत ।

अत्र शङ्क्यत —वृक्षत्वेन भेदाभावेन तेन रूपेणाभेदप्रत्यभिज्ञा । सयोगित्वेन भेदधीरस्तु । को दोष । भेदाभेदयो परस्परविरोधोऽप्येकावच्छेदेनैव

कल्प्यः, मूले वृक्षः संयोगवानग्रे नेति प्रतीतेः । अन्यथा घटतदत्यन्ताभावयोर्वैयधिकरण्यदर्शनात् संयोगतदत्यन्ताभावयोरपि तथात्वं स्यादिति (वल्लभाचार्यमते सर्वापेक्षया बलवत्त्वादिति ! ।)

अत्र वदन्ति—संयोगात्यन्ताभावविषयत्वेनैव संयोगवान् नेति बुद्धेरुपपत्तौ न परस्परविरुद्धसंयोगतद्वदन्योन्याभावयोरेकत्र समावेशकल्पना । संयोगवदन्योन्याभावग्रहकाले संयोगत्वावच्छिन्नसंयोगग्रहस्य तदत्यन्ताभावग्रहहेतोरावश्यकत्वात् । अत एवान्योन्याभाव एवं सति क्वापि विषयो न स्याद्, धर्मात्यन्ताभावविषयत्वेनैव तद्बुद्ध्युपपत्तेरिति अत्र दूषणमपास्तम् । घटान्योन्याभावधीकाले घटत्वत्वविशिष्टघटत्वज्ञानस्य तदत्यन्ताभावधीहेतोरनियमेनान्यथासिद्ध्यभावाद्, भावाभावसामानाधिकरण्यस्यान्यथानुपपत्तिकल्प्यतया प्रकृतेऽन्योन्यात्यन्ताभावयोरन्यतरविषयताविनिगमकचिन्तायां संयोगात्यन्ताभावग्रहसामग्रीसत्त्वात् तन्मा(त्रा ? त्र)विषयत्वेन तत्प्रतीत्युपपत्तेरुक्तत्वाच्च । न चैव विशिष्टप्रतियोगित्वेनोल्लेखो न स्यादिति वाच्यम् । विशेषणमात्रविषयकस्यापि स्वर्गस्त्यत्रैव तादृशोल्लेखदर्शनात् । अत एव गुणे सयोगवदन्योन्याभावो विषय एव तत्प्रतीतेः । सयोगवदभिन्नत्वेनाज्ञानादिति । वस्तुतस्तु यदि सयोगवति तद्वदन्योन्याभावः, तदा घटपटौ भिन्नाविति[1]वदिमौ भिन्नाविति प्रत्ययापत्तिः । द्रव्यभेदे सति द्वित्वादिसङ्ख्योत्पत्तेरिति तत्त्वम् ।

यत्तु अभिन्ने धर्मिणि भिन्नधर्मावच्छेदेन वृत्तिरव्याप्यवृत्तिता । न चैतदन्योन्याभावस्य सम्भवति, तस्मिन् सति धर्म्यभेदस्यैवाभावादित्यन्योन्याभावो नाव्याप्यवृत्तिरिति । तत्तु न । वृक्षत्वेन धर्म्यभेदस्य सत्त्वादिति सङ्क्षेपः ।

इति व्याप्तिवादः ।

अथ भूयोदर्शनवादः ।

नन्वस्तु तावद् व्याप्ति. । तद्ग्रहो न भूयोदर्शनेन । भूयोधिकरणदर्शनस्य

---

१. 'तोर्नित्व' क. पाठ'.

अत्र वदन्ति — व्यभिचारज्ञानमिह साध्याभाववद्वृत्ति(त्व)ज्ञान हेतौ वा, स्वसमानाधिकरणाभावप्रतियोगित्वज्ञान साध्ये वा। नाद्य.। केवलान्वयिनि साध्याभावाप्रसिद्ध्या तदभाववद्वृत्तित्वज्ञानासम्भवेन तदभावासम्भवाद् व्याप्त्यग्रहप्रसङ्गात्। नान्त्यः। व्यभिचारव्याप्त्योः न परस्पराभावरूपत्वमित्यग्रे मणौ प्रतिपादनात् तद्विरोधः, उक्तव्यभिचारविरहरूपत्वाद् व्याप्तेः। न च व्याप्तेर्व्यभिचाराभावविशिष्टसामानाधिकरण्यरूपतया न व्यभिचारविरहरूपत्वमिति न तद्विरोध इति वाच्यम्। तथापि व्यभिचारज्ञानाभावमात्र वा व्याप्तिनिश्चायकम्, उत तन्निश्चयाभावः। आद्ये हेतुमत्तया निश्चिते साध्यसन्देहात्मकव्यभिचारज्ञानसत्त्वान्न काप्यनुमान(म)वृत्तिः स्यात्। अन्त्ये सन्दिग्धानैकान्तिकोच्छेदः। किञ्च, अत्यन्ताभावगर्भायामन्योन्याभावगर्भव्यभिचारज्ञानस्यापि प्रतिबन्धकत्वाद् आभासाधिक्यापत्तिः। किं बहुना, साध्याभाववद्वृत्तित्वज्ञानस्य क्वचिद्, हेत्वधिकरणनिष्ठाभावप्रतियोगित्वज्ञानस्य क्वचित् प्रतिबन्धकत्वमित्यननुगमः। अपि च परकीयव्यभिचारज्ञाने सत्यपि व्याप्तिग्रहणात् स्वव्यभिचारज्ञानस्याभाव. कारण वाच्य.। तथा च यस्य व्यभिचारज्ञान नास्ति, तस्य व्याप्तिग्रहो न स्यात्। न च व्यभिचारज्ञानमात्रं स्वपरसाधारण प्रतियोगि, तदभावो यदात्मनि, तत्र व्याप्तिग्रह इति परकीयव्यभिचारज्ञानाभावमादायैव तत्र व्याप्तिग्रह इति वाच्यम्। प्रत्युत्पन्नव्यक्तिद्वये पुरुषान्तरीयज्ञानाविषये व्याप्त्यग्रहप्रसङ्गात्। व्यभिचारज्ञानाप्रसिद्ध्या तदभावासम्भवात्। न चैश्व(यै'र) व्यभिचारज्ञान तत्र नास्तीति वाच्यम्। अनभिचारिणि व्यभिचारग्रहे ईश्वरस्य भ्रान्तत्वापत्तेरिति।

अत्रोच्यते — हेत्वधिकरणत्वेन ज्ञायमानधर्मिनिष्ठाभावप्रतियोगित्वनिश्चयविषयत्वाभावो यत्र साध्ये यस्य यदात्मनि, तस्य तदा तत्र व्याप्तिग्रहः। प्रत्युत्पन्नस्थले तत्प्रतियोगित्वाभावघटितव्याप्तिग्रहस्य तत्प्रतियोगित्वज्ञानगर्भत्वेनाप्रसक्तेः अभावज्ञानस्य प्रतियोगिज्ञानजन्यतानियमाद् अन्तर्नस्तत्पुरुषीयव्यभिचारज्ञानमेवास्तीति न कोऽपि दोषः। अत एव पक्षीयव्यभिचार(ज्ञान')संशयो न प्रतिबन्धकः, न वा सन्दिग्धानैकान्तिकोच्छेदः। न चैवमनुमितिसन्देहादाहितव्यभिचारसंशयस्यैव निश्चितहेतुमति साध्यसन्देहत्वा. प्रतिबन्धको न स्यादिति वाच्यम्। व्याप्तिग्र-

---

१ 'त्वं वेत्ता' क ख ङ.

तथा च यद्विशेषयोरिति न्यायेन सहचारज्ञानमात्रस्य व्याप्तिप्रत्यक्षहेतुता कल्प्यते । यच्च तद्धेतोरिति न्यायाद् व्यभिचारधीविरहसहकृतसहचारधीरनुमितावेव हेतुरस्त्वित्युक्तं, तदपि न । अनुमितौ व्याप्तिज्ञानस्याहेतुत्वे व्यभिचारज्ञानप्रतिबन्धकत्वस्यैवासिद्धेः । ग्राह्याभावानवगाहिज्ञानस्य जनकधीविघटक(त्व)द्वारैव प्रतिबन्धकत्वादिति वदन्ति ।

अत्र शङ्क्यते — व्याप्तिभ्रम एव सहचारभ्रमो न त्वनयोर्हेतुहेतुमद्भावोऽस्ति, मानाभावात् । अपि च, व्यभिचारिणि सहचारभ्रमं विनापि व्याप्तिभ्रमदर्शनाद् न तद्भ्रमो व्याप्तिभ्रमहेतुः । यच्च व्यभिचारधीप्रतिबन्धकत्वान्यथानुपपत्त्या व्याप्तिधीहेतुत्वमवादि, तदप्यसारम् । साक्षादप्रतिबन्धकेन प्रतिबन्धकरणे जनकज्ञानविघटनापेक्षणात् । व्यभिचारधियस्तु साक्षादेव प्रतिबन्धकत्वात् । न च ग्राह्याभावाविषयकतया प्रतिबन्धकस्य जनकधीविघटकत्वमिति नियम इति वाच्यम् । तथा सति शाब्दबोधे असाधुत्वधी प्रतिबन्धकी (न्धिका) न स्यात् । साधुत्वज्ञानस्य तत्राहेतुत्वेन जनकज्ञानविघटकत्वाभावादिति ।

अत्र नव्या — भ्रमो दोषजन्यः । न च सति सम्भवे ऽनुगत एव कल्प्यो बाधकाभावात् । तथा च विरुद्धस्थलीयव्याप्तिभ्रमत्वावच्छेदेन सहचारभ्रमस्य दोषतया हेतुत्वं सिद्धम् । यद्विशेषयोरिति न्यायेन व्याप्तिप्रत्यक्षत्वावच्छेदेन सहचारज्ञानत्वेन हेतुत्वं कल्प्यते । न च सहचारभ्रमजनक एव तत्र दोषोऽस्तु, आवश्यकत्वादिति वाच्यम् । तस्याननुगमात् । सहचारभ्रमजनकत्वेन चानुगमे लाघवाद् धर्मिधीवत् सहचारभ्रमस्यैव हेतुत्वोचित्यादिति समादधते ।

नन्विदमप्यसत् । साधारणस्थले व्याप्तिभ्रमप्रत्यव्यभिचारभ्रमस्य प्रयोजकत्वावश्यकत्वेन व्याप्तिभ्रमत्वावच्छेदेन तस्य दोषता कल्प्यता, तत एव विरुद्धस्थलीयव्याप्तिभ्रमस्याप्युपपत्तौ तदवच्छेदेन सहचारभ्रमरूपदोषान्तरकल्पनाया मानाभावादिति ।

अत्र ब्रूमः — आकाशादाववृत्तिपदार्थे अव्यभिचारभ्रमं विनापि व्याप्तिभ्रमदर्शनाद् विरुद्धस्थलीयव्याप्तेर्भ्रमत्वमेव सहचारभ्रमान्यतावच्छेदकं कल्प्यते । न च तत्राप्यव्यभिचारभ्रम एव प्रयोजकोऽस्तु । प्रतियोग्यधिकरणानधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वस्याव्यभिचारस्यावृत्तिपदार्थे सत्त्वेन तद्भ्रमाभावाद्, अवृत्त्यभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या तादृशाभावाप्रतियोगित्व-

स्याभावादो सत्त्वात्। यद्वा साध्यसामानाधिकरण्यावच्छेदकरूपत्वलक्षणव्याप्तिज्ञानहेतुत्वाभिप्रायक सहचारधीहेतुताप्रवाद। तज्ज्ञाने सहचारस्य विशेषणत्वनियमेन विशेषणज्ञानतया तद्धेतुत्वात्।

अन्ये तु — अन्यभिचरितसामानाधिकरण्यव्याप्तिपक्षेऽपि सामानाधिकरण्यस्य व्यधिकरणवह्निधूमयोरभावेन सामानाधिकरण्याश्रयवृत्तिधर्मत्वमर्थो वाच्य। तज्ज्ञाने च सामानाधिकरण्यज्ञानस्य विशेषणज्ञानतानियत्येन हेतुत्वमित्याहु। यत्तु भूयस्सहचारज्ञानमुत्सर्गविधया व्याप्तिग्राहकं, भूय सहचरितस्य औत्सर्गिकव्याप्तियोगादिति। तन्न। उत्सर्गस्य बाधकैकापोद्यनियमरूपतया नियमस्य च व्याप्तिरूपतया ग्रहीतुमशक्यत्वात्। तस्यैव प्रकृते चिन्त्यमानत्वादिति न किञ्चिदेतत्। असाधुत्वज्ञानस्य शाब्दज्ञान इव व्यभिचारज्ञानस्याप्यनुमितौ साक्षात्प्रतिबन्धकत्वमस्तु, किं व्याप्तिधीहेतुतयेतीदन्त्वमवशिष्यते।

अत्रोच्यते — व्याकरणव्युत्पाद्यत्वस्य साधुत्वस्य ज्ञान न शाब्दज्ञानहेतु सम्भवति, व्याकरणाप्रतिसन्धानदशायामपि शाब्दबोधात्। तथा च तत्रागत्या साधुत्वज्ञानस्य साक्षात्प्रतिबन्धकता। तदभावस्य हेतुता दुष्टचरी कल्प्यताम्। इह तु व्यभिचारज्ञानस्य ग्राह्याभावावगाहितया अन्यत्र कुत्रप्रतिबन्धकतैवोपपत्तावदृष्टचरप्रतिबन्धकताया मानाभावेन व्याप्तिधीविघटकतयैव प्रतिबन्धकत्वकल्पनात्। किञ्च, परामर्शानन्तरजातव्यभिचारज्ञानेऽप्यनुमित्यप्रतिबन्धेन न तत्र तस्य साक्षात्प्रतिबन्धकता। न च परामर्शानन्तर व्यभिचारज्ञानासम्भव। ग्राह्याभावावगाहिप्रत्यक्षस्यैव ग्राह्यप्रत्यक्षप्रतिबन्धकतया शाब्दादिपरामर्शानन्तर प्रात्यक्षिक व्यभिचारज्ञाने बाधकाभावात्। अपि चानुमिता व्यभिचारज्ञानाभावो हेतुरव्यभिचारज्ञान वेति विचारे लाघवाद्व्यभिचारज्ञानमेव हेतुतया कल्प्यते। अन्यथायोग्यताज्ञानाभावस्य शाब्दबुद्धौ, प्रवृत्तौ च बलवदनिष्टाजनकताज्ञानाभावस्य हेतुत्वापत्तौ बहुविधव प्रसज्येतेति। यच्च तदधिकरणनिष्ठव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन हेतुतायामतिप्रसक्तमभ्यधायि, तदबोधात्। तदधिकरणपदेन व्यभिचारप्रयोजकसाध्याभावहेतुरूपदलद्वयान्यतरवत्तयोपस्थिताधिकरणस्य विवक्षितत्वात्। तथा च घटवह्निसहचारग्रहकाले घटधूमाभावसहचारग्रहस्थले वा धूमवत्तया वह्न्यभाववत्तया वाधिकरणोपस्थितौ व्यभिचारधीविरहे च भवत्येव व्याप्तिग्रह इति न काप्यनुपपत्ति।

केचित्तु — सहचारधीत्वेनैव व्याप्तिग्राहकता । तस्याश्च व्यभिचारधीविरहो द्वारम् । तेन सा यत्र व्यभिचारधिय प्रतिबध्नाति तत्र व्याप्तिग्रह जनयति । अत एव व्यभिचारधीविरहसहकारे तथोक्तद्वारिणो द्वारसाहित्येनैव फलजनकत्वादित्यवोच(त्[1]न्)। तच्चिन्त्यम् । सहचारज्ञानस्य तदधिकरण एव व्यभिचारधीविरोधित्वात्, व्यभिचारधीविरहस्य च सकलाधिकरणीयस्य व्याप्तिबुद्धिहेतुतया अतद्वारत्वात् । तस्मात् सहचारज्ञान व्यभिचारप्रयोजकरूपवत्त्वोपस्थिताधिकरणनिष्ठ व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन व्याप्तिधीहेतु । सकलाधिकरणीयव्यभिचारधीविरहश्च तत्सहकारीत्येव तत्त्वम् ।

स्यादेतत् । व्याप्ते प्रत्यक्षत्वे सर्वमिद सङ्गच्छते । तदेव तु नास्ति । साधनवन्निष्ठाभावप्रतियोगिसामान्यान्योन्याभावस्य योग्ययोग्यप्रतियोगित्वेन योग्यानुपलब्ध्यग्राह्यत्वादिति । मैवम् । अयोग्यप्रतियोगिकाभावस्यापि योग्यप्रतियोगितावच्छेदकरूपेण प्रत्यक्षत्वात्, तेन रूपेणापादनसम्भवात् । प्रकृतेऽपि तादृशाभाव प्रतियोगित्वस्य प्रतियोगितावच्छेदकस्य योग्यत्वात् । अत एव घटादावितरभेद प्रत्यक्ष इति वक्ष्यति मणिकार । यदि च तादृशप्रतियोगित्वाभाव एव व्याप्तिप्रविष्ट, तदा प्रतियोगिनस्तस्य योग्यत्वादनुपपत्तिरेव नास्ति । यत्तु — व्याप्ते रयोग्यत्वेऽप्युपनीतप्रत्यक्षत्व सम्भवत्येव । न चोपनयोऽप्यनुमानेनव, प्रत्यक्षासम्भवात् । तथा च व्याप्तिबुद्धावुपनयापेक्षायामनवस्थेति वाच्यम् । अन्यथानुपपत्त्या जन्मान्तरीयसस्कारोपनीतव्याप्तिग्रहस्य कचिद्भावेन तद्विरमादिति गौडैर्दूषितम् । तन्न । उक्तक्रमेण व्याप्तेर्लौकिकप्रत्यक्षस्यवोपपत्तावुपनीतभानानुरोधेन जन्मान्तरीयसस्कारानपेक्षणात् । तस्य जविनान्यथानुपपत्तिकल्प्यत्वादिति ।

ननु तर्को(व्य[1]व्य)भिचारशङ्कापाकरणे व्याप्तिग्रह इति अनुपपन्न, तर्कस्यापि व्याप्तिग्रहमूलत्वेनानवस्थाप्रसङ्गात् । न चोक्त क्वचिद्व्यभिचारशङ्काविरह स्वत सिद्ध एव, कोट्यादुपस्थित्यभावेनापि सशयाभावादिति नानवस्थेति वाच्यम् । कोट्युपस्थितिविरहे हेतुमन्निष्ठाभावाप्रतियोगि(क[1])त्वस्याप्यग्रहप्रसङ्गाद् व्याप्तिग्रहस्यानुपपत्तेरिति चेद्, न । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नोपस्थितौ तद्भिन्नत्वस्य पूर्वाजातस्यापि भानसम्भवेन व्याप्तिग्रहसम्भवात् । सशयस्य कोटिद्वयोपस्थितिसाध्यतया व्यभिचाराव्यभिचारकोट्युपस्थिति विना-

---

१. 'तिव्याभचारसाध्यतयाव्यभिचारको' क पाठ

सम्भवात् । क्वचिन् तद्व्यभिचारशङ्कावारणार्थं तर्कापेक्षायामपि सर्वत्र तदपेक्षा नास्तीति नानवस्था । ननु स्मर्त्य कोऽयमित्यादिना शङ्काविरहादस्तु व्याप्तिग्रह । यस्त्वनुमानप्रामाण्यप्रतिकूलश्चार्वाको ममाप्यस्य व्यभिचारशङ्कास्तीति न व्याप्तिग्रह इत्यनुमान न प्रमाणमेवेति ब्रूते, त प्रति किमुत्तरमिति चेद्, न । धूमवह्न्यो कार्यकारणभाव(प्रा १ प्र)हस्यैव शङ्कापनायकत्वात् । न च शङ्काया कार्यकारणभावोऽपि दुर्ग्रह । तत्रानन्यथासिद्धान्वय यतिरेकसहकृतप्रत्यक्षस्य ग्राहकत्वात्, तस्य च तर्कविशेषसहकारेण निर्णायकतया शङ्कानवकाशात् । स च तर्क धूमो यदि वह्न्यसमवहितसामग्र्यनन्यत्वे सति वह्निसमवहितसामग्र्यजन्य स्याद्, नोत्पन्न स्याद् आकाशवदिति मणौ व्यक्तम् । अत्र च विपर्ययापर्यवसानमनाशङ्क्य, प्रत्यक्षसहकारित्वादस्य । अनुमानसहकारिण एव तर्कस्य तदर्थत्वात् । वह्न्यसमवहितसामग्र्यनन्यत्व पक्षविशेषणमित्यपि केचित् । अत्र तर्क उत्पन्नत्वस्य सुदृढप्रमाणावधृततया इष्टापत्तिशङ्का नास्त्येव । वह्न्यसमवहितसामग्र्यजन्यत्वासिद्धिमूलशैथिल्ययो सम्भावना परैर्वाच्या । सापि तव नास्तीति पर प्रति वाच्यम् । तत्र चेन् परो ब्रूयाद् अस्त्येव मम शङ्केति, तदा त प्रति व्याघातो देय । तथा सति (नियमतो १) धूमार्थं वह्ने, परप्रतिपत्त्यर्थं शब्दस्य, तृप्त्यर्थं भोजनस्योपादान नियमतो न स्यात् । नहि यद्व्यतिरेकेण यत् सम्भाव्यते तदर्थं नियमात् तदुपादीयेतेति । तथा च नियत तदुपादानमेव तादृशशङ्कापिशाच्युत्थानप्रतिबन्धकमिति परार्थानुमानमपि सम्भवति । एतदभिप्रायक एव 'उपादान शङ्काप्रतिबन्धकमि'ति मणिरिति विभावनीयम् । यत्तु — स्वार्थानुमान एवोपादान शङ्काप्रतिबन्धकमित्यभिप्रायको मणि । न चोपादान यत्नो न शङ्काप्रतिबन्धक, विरोधिनिश्चयस्यैव तत्प्रतिबन्धकत्वाद्, उपादानजनकीभूतहेतुताग्रहस्य चोपादानपदार्थत्वे अन्योन्याश्रय, शङ्काप्रतिबन्धे हेतुताग्रहात् तेन च शङ्काप्रतिबन्धादिति वाच्यम् । उपादानपदेन वह्न्यसमवहितानुपादानप्रयोजकवह्न्यसमवहिताजन्यत्वज्ञानस्य विवक्षितत्वादिति । तन्न । वह्न्यसमवहितानन्यत्वज्ञानाद् वह्न्यसमवहिताजन्यत्वशङ्काव्युदासेऽपि अहेतुत्व(त्व)शङ्काया अप्रतिबन्धात् । न च वह्न्यसमवहिताजन्यत्वधी कार्यं सहेतुकमित्यनुमितिमहाया सर्वशङ्कापनायिकेति वाच्यम् । तस्या अनुमितेर्व्याप्तिग्रहमूलकतयानवस्थानात् । शङ्काव्युदासस्य तत एव भावे तर्कानर्थक्यापत्तेश्च ।

केचित्तु — उपादानमयोजकीभूतान्वयव्यतिरेकशालित्वज्ञानमेव शङ्काप्रतिबन्धकत्वेन विवक्षितम् । यद्धर्मावच्छेदेन यद्धर्मावधारण तद्धर्मावधारणस्य तत्र तच्छङ्काप्रतिबन्धकत्वात् । धूमत्वावच्छेदेन वह्निव्याप्त्यवगमाद् धूमत्वज्ञानस्येव वह्निव्याप्तिसंशये तथा(च ?)वह्न्यन्वयव्यतिरेकशालित्वावच्छेदेन वह्निजन्यत्वावधारणात् तज्ज्ञानस्य (च) तत्संश(य ?ये) विरोधित्वम् । न चैव तर्को व्यर्थ, शङ्काप्रतिबन्धस्य तत्फलस्यान्वयादिज्ञानादेव सिद्धेरिति वाच्यम् । तर्कस्येवान्वयादिज्ञानरूपत्वात् । वह्न्यसमवहितसामग्र्यजन्यत्वे सतीत्यनेन व्यतिरेकस्य, वह्निसमवहितसामग्र्यजन्यत्वेनार्थादन्वयस्य विषयीकरणात । यदभावे यदभाव, तद्भावेऽपि तदभावे तदनुत्पादप्रसङ्गात् । तथा च तर्कतयान्वयादिज्ञानतया च स एव शङ्काप्रतिबन्धक इति न व्यर्थ इत्याहु ।

अत्रेद चिन्त्यम् — अन्वयादिक नियत शङ्काप्रतिबन्धकमनियत वा । नाद्य । सहचारदर्शनस्य नियतान्वयव्यतिरेकज्ञानरूपत्वाभावे तदसिद्धे । नान्त्य । व्यभिचारिसाधारणतया शङ्का(या ?याम)प्रतिबन्धकत्वात् । अत एव नान्वयाद्यनुविधायित्वज्ञानमवच्छेदकधर्मज्ञानत्वेन शङ्कापनायकम् । अन्वयाद्यनुविधायित्वज्ञानस्य व्यभिचार्यन्यथासिद्धसाधारणतयावच्छेदकधर्मत्वाभावात् । न चावच्छेदकधर्मत्वाभावेऽपि तत्त्वेन ज्ञानात शङ्काप्रतिबन्धो भूयादेव, तावतैव तर्कस्य सार्थक्यमिति वाच्यम् । भ्रमरूपावच्छेदकत्वज्ञानस्य विवक्षितत्व एतावत्प्रयासवैफल्यात् । भ्रमेण यत्किञ्चिद्धर्मस्यैवावच्छेदकत्वग्रहसम्भवात् । किं बहुना, तर्कस्यान्वयविषयत्वमेव नास्ति । यदभावे यदभावस्तद्भावेऽपि तदभावे तदुत्पत्तेरित्यस्य व्याप्यन्तरत्वात् ।

नन्वास्तु — अन्वयाद्यनुविधायित्वज्ञान तर्कमूलभूत तर्कमितमेव शङ्काप्रतिबन्धकम् । तथा च तर्कस्यान्वयादिविषयत्वाभावेऽपि न क्षति । न चैव शङ्काप्रतिबन्धस्य तर्कप्रयोजनस्यान्वयादिज्ञानादेव सिद्धे किं तर्केणेति वाच्यम् । तर्कस्यानिष्टप्रसञ्जनात्मकस्य शङ्कानन्तरोपस्थितिजिज्ञासानिवारकत्वेन सार्थक्यादिति वदन्ति । तन्न । अन्वयादिज्ञानस्य व्यभिचार्यादिसाधारण्येन शङ्कानपनायकत्वादित्युक्तत्वात् । शङ्कापनायकत्वे च शङ्काविरहादेव जिज्ञासानुत्पादे तर्कवैफल्यात्, पूर्वजिज्ञासानाशस्य च विरोधिगुणमात्रसाध्यत्वादिति । तस्मात् स्वार्थस्थले कोट्यनुपस्थित्यादेरेव शङ्कानन्तर्यभाव इति परार्थस्थल एवोपादान शङ्कोत्था(प ?)नप्रतिबन्धकमिति दिक् ।

ननु व्याप्तेरत्यन्ताऽन्योन्याभावादिगर्भतया कथं तज्ज्ञानमनुमितिहेतु, परस्परव्यभिचारादिति चेद्, अन्योन्याभावगर्भव्याप्तिज्ञानस्य लाघवेनानुमितिहेतुत्वादिति मणिकृत ।

अत्र केचिद्— अत्यन्ताभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यारोपपूर्वकधीविषयत्वम्, अन्योन्याभावस्य तु प्रतियोगितावच्छेदकारोपपूर्वकधीविषयत्वमात्रमिति शीघ्रोपस्थितित्वमेवात्र विवक्षितम् । न च ग्राहकलाघवं न विनिगमकं, किन्तु ग्राह्यलाघवमेवेति वाच्यम् । ग्राह्ययोरत्यन्ताऽन्योन्याभावगर्भयो साम्ये विनिगमकचिन्तायामन्योन्याभावगर्भाया ग्रा(ह्य ? ह)कलाघवस्य विनिगमकत्वसम्भवादिति मणिकृतोऽभिसन्धिं वर्णयाञ्चक्रिरे । तदमञ्जुलम् । तदभावज्ञानत्वावच्छेदेनैव तदारोपस्य लाघवाद्धेतुतयात्यन्ताभावज्ञानवदन्योन्याभावज्ञानस्यापि प्रतियोग्यारोपनियतत्वाद्, उक्तविनिगमकस्यासम्भवात् । इयांस्तु विशेष, यदेकत्र संसर्गावच्छिन्नप्रतियोग्यारोप कारणमपरत्र तादात्म्यावच्छिन्न तदारोप इति । (यत्किञ्चिदेतत् ? ।) प्रतियोग्यसामानाधिकरण्याशस्यान्योन्याभावगर्भायामप्रवेशेनात्यन्ताभावगर्भव्याप्त्यपेक्षया लाघवमित्यन्ये । तदप्यभद्रम् । अन्योन्याभावोऽव्याप्यवृत्तिरिति भ्रमदशायामव्याप्यवृत्तिव्याप्तिज्ञानानुपपत्त्या प्रतियोगितावच्छेदकसमानाधिकरणत्वेनाज्ञायमानत्वस्यापि देयत्वात् । तादृशो भ्रम एव न सम्भवतीति तु साहसम् । भ्रमस्य विशेषादर्शनसमुत्थस्य निवर्तयितुमशक्यत्वात । किं बहुना, प्रतियोग्यसामानाधिकरण्याज्ञानदशाया धूमसमानाधिकरणाभावाप्रतियोगी वह्निरिति व्याप्तिघटकाविशिष्टपदार्थभानेनानुमित्यभावापत्त्यानुभवविरोधात् तदशज्ञानमनुपयुक्तमेव वाच्यम् । तथा च स्वरूपसत्या व्याप्तेरनुमित्यजनकतया ज्ञेयांशस्यात्यन्ताऽन्योन्याभावगर्भयो साम्येन विनिगमनाया कर्तुमशक्यत्वाद् नान्योन्याभावगर्भव्याप्तिज्ञानमात्रस्य हेतुता । अत एवान्योन्याभावगर्भाया प्रतियोगिवृत्तित्वेनाज्ञायमानत्व विशेषणम्, अत्यन्ताभावगर्भाया च प्रतियोग्यधिकरणवृत्तित्वेनाज्ञायमानत्व विशेषणमिति पूर्वस्य लघुत्वमिति गाडाना कल्पित परास्तम् । उभयभागस्य साम्येनोक्तव्यानियामकत्वात् ।

पक्षधरमिश्रास्तु— विनिगमनाविरहात् सर्वस्या अपि व्याप्ते ज्ञानमनुमितिहेतु, ग्रन्थस्तूपलक्षणपर । न च परम्परव्यभिचार । तत्तदनुमितिविशेषे

---

१ या प्र' —

तत्तद्व्याप्तिज्ञानस्य हेतुत्वात् । न चैवमनुमितित्वावच्छिन्ने अनुगतहेत्वलाभः । व्यभिचारधीविरहसहकृतसहचारधिय एव तत्रानुगतहेतो. सत्त्वात् । यद्वा, अन्योन्याभावगर्भैवेत्यस्यान्योन्य साध्यसाधने अभावश्च इत्येतन्मात्रगर्भव्याप्तिः प्रयोजिकेत्यर्थः । तेनानौपाधिकत्वे उपाधेरधिकस्य प्रवेशात् तदेव व्यवच्छेद्यम् । अत्यन्तान्योन्याभावगर्भाः सर्वा अपि संग्राह्या एव । न चैवमननुगमः । व्यभिचारज्ञानविरोधिव्याप्तिज्ञानत्वेन सर्वानुगमात् । अथवा शीघ्रोपस्थितिकत्वाद् अन्योन्याभावगर्भैव प्रयोजिका । हेतुसमानाधिकरणान्योन्याभावप्रतियोगिनोः साध्यसाधनयोरवश्योपस्थित्या तादृशात्यन्ताभावप्रतियोगिनश्च उपस्थित्यनियमेनात्यन्ताभावज्ञानापेक्षयान्योन्याभावज्ञानस्य प्रतियोगिज्ञानसत्त्वेन शीघ्रोत्पत्तिकत्वात् । हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिनोः साध्यतावच्छेदकहेतुतावच्छेदकयोरुपस्थितिनियमेऽपि अत्यन्ताभावग्रहप्रयोजकप्रतियोगितावच्छेदकविशिष्टतयोपस्थित्यनियमात् । अधिकरणस्याधिकरणतावच्छेदकविशिष्टस्योपस्थितावपि तन्निष्ठात्यन्ताभावप्रतियोगित्वानियमेन व्याप्तिग्रहानुपयोगात् । केवलान्वय्यधिकरणकव्याप्तिग्रहे स्वस्य स्ववृत्तितया स्वनिष्ठात्यन्ताभावाप्रतियोगित्वात् । तथा च शीघ्रोपस्थितिलाघवेनान्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरिति यथाश्रुत एव मणिः साधीयान् । वस्तुतस्तु व्याप्तेर्भेद एव न । हेतुसमानाधिकरणधर्मविरोधिसाध्यसामानाधिकरण्यस्य व्याप्तित्वात् । हेतुसमानाधिकरणधर्मश्च व्यभिचारिणि साध्यात्यन्ताभावस्तद्वदन्योन्याभावश्चेत्यत्यन्तान्योन्याभावगर्भत्वस्य व्यपदेशः । वस्तुत उक्तक्रमेणैव हेतुत्वमिति न व्यभिचार इत्याहु. ।

अत्राद्यपक्षो न क्षोदक्षमः । तथाहि — व्यभिचाराननुगमात् तज्ज्ञानाभावोऽपि कथमनुगत इति दोष. प्रतिबन्धकाभावकूटस्य हेतुतया समाधीयता तावत् । परामर्शानन्तरजातव्यभिचारज्ञाने सत्यनुमित्यभावापत्ति कथ समाधेया । इष्टापत्त्यैवेति चेत्, तर्हि व्यभिचारज्ञानाभावस्यैवानुमितिहेतुत्वे विशेषेऽपि तत्तद्व्याप्तिधीहेतुत्वं न स्यादिति महानिष्टापत्ति. प्रसज्येत । किं बहुना, सामान्यहेतुता लाघवात् सहचारज्ञानस्यैवास्तु, किं व्यभिचारधीविरहेणावच्छेदकेन । अतिप्रसङ्गस्तु विशेषहेतुतत्तद्व्याप्तिज्ञानेनैव वार्य इति । द्वितीयपक्षेऽपि यद्यपि व्यभिचारधीविरोधित्वम् । यत्किञ्चित्तद्विरोधित्वं, यावत्तद्विरोधित्वं वा । नाद्यः । अत्यन्ताभावगर्भव्याप्तिज्ञानस्य तद्गर्भव्यभिचारधीविरोधिनः सत्त्वेऽन्योन्याभावगर्भव्यभिचारज्ञाने सत्यनुमित्यापत्तेः । यावद्व्याप्तिज्ञानत्वेन हेतुत्वे चान्यतरव्याप्तिज्ञानसत्त्वे

अन्यतरव्यभिचाराग्रहेऽप्यनुमित्यनापत्तेः । नन्वत्र चेष्टापत्तेरनुभवविरोधेनानुक्तिसम्भवात् । नात्य । एतस्या अपि "व्याप्तेर्ग्राह्याभावतयाविरहेण यावत्तद्विरोधित्वासम्भवादिति । तथाप्युभय व्याप्तिज्ञानेऽप्यनुमितेरनुभवसिद्धतया ग्राह्याभावानवगाहित्वेऽप्यत्यन्ताभावादिगर्भं व्याप्तिज्ञानेनान्योन्याभावादिगर्भव्यभिचारधी प्रतिरुध्यत एव, अनुभवबलात् । तथा च यावद्व्यभिचाराज्ञानविरोधित्वेन उभयव्याप्त्योरनुगम सम्भवत्येवेत्यभिमन्धि । तृतीयपक्षस्तु न मनोज्ञ । यत्र क्वचिच्छीघ्रोपस्थितित्वस्यात्यन्ताभावसाधारण्यात् सर्वत्र शीघ्रोपस्थितिकत्वस्यान्योन्याभावेऽप्यभावात् सामग्रीबलेन क्वचिदत्यन्ताभावस्यैव शीघ्रोपस्थिते । किं बहुना, सकलसाधारणी व्याप्तिरेवा नास्त्येवेति प्रागुक्तमेव । तथा च धूमादिव्याप्तिज्ञानस्थलेऽन्योन्याभावप्रतियोगिन या वह्नेरित्यत्यन्ताभावप्रतियोगिनोऽधिकरणस्याप्युपस्थितत्वान्न प्रतियोग्युपस्थित्यनुपस्थितिकृतमुपस्थितिलाघवादिकमिति । चतुर्थपक्षोऽपि न रम्य । हेतुमन्निष्ठसकलधर्माविरोधित्व तदनधिकरणाधिकरणभिन्नत्वम् । तत्प्रकारकज्ञानस्य हेतुत्वे हेतुमन्निष्ठात्यन्ताभावाप्रतियोगित्वादिप्रकारकज्ञानादनुमितिर्न स्यात् । न स्याच्चात्यन्ताभावादिगर्भव्यभिचारधीप्रतिबन्धकता, ग्राह्याभावानवगाहित्वात् । प्रत्येकमेव तत्प्रकारक व्याप्तिज्ञानस्य हेतुत्वे चोक्तक्रमेणानुगमस्याकिञ्चित्करत्वादिति ।

नव्यास्तु — सकलव्याप्तिज्ञाने सत्यनुमितिरित्यनुभवसिद्धा । परन्तु साक्षाद्व्याप्त्यन्तरज्ञानद्वारा वेति सशये लाघवनिर्णायकम् । तच्च प्रकृतेऽन्योन्याभावगर्भाया मेव । हेतुमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यापेक्षया हेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकसामानाधिकरण्यस्यैकावच्छेदकशून्यतया लघुत्वात् । न च हेतुमन्निष्ठा(न्योन्या)भावप्रतियोगितावच्छेदकतया तत्तद्धेतुप्रसिद्धानुमानेऽव्याप्तिप्रसङ्गेन यद्रूपावच्छिन्नमन्यान्याभावप्रतियोगितानवच्छेदकमित्यर्था वाच्य । तथा च ह्यत्यन्ताभावगर्भापेक्षया लाघवमिति वाच्यम् । हेतुमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदक यद्रूपावच्छिन्नमित्यस्य तत्राप्यावश्यकत्वात् । अन्यथा दण्डिमत्त्वादिसाध्यके हेत्वधिकरणनिष्ठात्य ताभावप्रतियोगितावच्छेदकता दण्डादे(र ? रित्य)व्याप्तिप्रसङ्गात् । विशेषणदाने च दण्डत्वावच्छिन्न नावच्छेदकमिति नाव्याप्ति । तथा चैतद्विशेषणस्योभयत्रापि साम्यमेव । अन्योन्याभावगर्भायां प्रतियोगितानवच्छेदकत्वमात्र प्रविष्टम्, अत्यन्ताभावगर्भायामेक तदवच्छिन्नपद

मधिकमेवेति तदपेक्षयान्योन्याभावगर्भव्याप्तिर्लघीयसीति तज्ज्ञानमेवानुमितिहेतुरिति यथाश्रुत एव मणिर्निष्कलङ्क इति वदन्ति । वस्तुतस्तु हेतुतानिर्णयो लाघवानुरोधाद् अनुभवानुरोधाद् वा । आद्ये सामानाधिकरण्यावच्छेदकधर्मलक्षणव्याप्तिधीरेव सर्वापेक्षया लघुविषयतया हेतुः । अत एव सहचारधीर्व्याप्तिग्रहहेतुः, सहचारस्योक्तव्याप्तौ विशेषणस्य नियमादिति प्रागेवावदत् । न चावच्छेदकत्वं नानतिरिक्तवृत्तितामात्रम् । नीलधूमत्वादिसाधारण्यात् । अपि तु तादृशशब्दबुध(र्मा-)घटि(त)त्वादिघटितशरीरं वाच्यं, तथा च कान्यापेक्षया लाघवमिति वाच्यम् । अत्यन्ताभावादिगर्भव्याप्तावप्यवच्छेदक(त्व)स्य प्रवेशाद्, अप्रवेशेऽपि तदपेक्षया लाघवात् । उदाहरणवाक्यप्रतिपाद्यत्वं तस्यापि नास्तीत्यवच्छेदकत्वघटकधर्मावभासकाभावादित्युपाध्यायमतभेदः । अन्त्ये सर्वासां व्याप्तीनां ज्ञानमनुमितिहेतुः, अनुमितिविशेषे तत्तद्व्याप्तिर्हेतुरिति नाननुगमः, अनुमितित्वावच्छिन्ने तु लिङ्गधीः सामानाधिकरण्यधीर्वेति न किञ्चिद्विशेषः ।

इदन्त्ववधेयम् — अत्यन्ताभावादिगर्भव्याप्तिधीर्यावद्व्यभिचारधीप्रतिबन्धिका । प्राग्भावावगाहनेनैव प्रतिबन्धकत्वं ज्ञानस्येति तु परिभाषामात्रं, मिथ्यादावनुमित्यादिप्रतिबन्धक इवेहापि फलबलेन म(था ? प्या)दिन्यायेनान्यधियः प्रतिबन्धकताकल्पनात् । अन्यथात्यन्ताभावगर्भव्यभिचारज्ञानेऽन्योन्याभावगर्भव्याप्तिज्ञानादनुमित्यापत्तेः । (अन्यथा ?) अत्यन्ताभावगर्भव्यभिचारज्ञानादन्योन्याभावगर्भव्यभिचारानुमानाद् न तद्गर्भव्याप्तिधीरिति चेद्, न । अनुमानस्यासार्वत्रिकतया क्वचित् तथात्वापत्तेरनुत्तरीयत्वात् । ननु म(था ? प्या)दिन्यायाज्ज्ञानस्य प्रतिबन्धकत्वे व्यभिचारधी साक्षादेवानुमितौ प्रतिबन्धिकास्तु । तथा च तदभाव एवानुमितिहेतुरस्तु, किं व्याप्तिज्ञानहेतुत्वेनेति चेद्, न । अनुमितौ व्यभिचारज्ञानाभावापेक्षया लाघवेनाव्यभिचारज्ञानस्य हेतुत्वात् । अन्यथा शब्दबुद्धौ योग्यताज्ञानस्य, प्रवृत्तौ कृतिसाध्यताज्ञानस्य हेतुत्वं न स्यादिति सक्षेपः ।

ननु पर्वतीयधूमस्य वह्निव्याप्त्यनवगमात् कथं तस्मादनुमितिः । न-ह(न्य)त्र व्याप्तिज्ञानमन्यत्र पक्षधर्मताज्ञानं चानुमितिहेतुः, अतिप्रसङ्गादिति

---

१. 'कप्रह्व्या' क. पाठः.

---

* ईषदित्यर्थः । 'कचिदि'ति वा पाठ्यम् ।

चेद्, अत्र प्राञ्च.—महानसीयधूमे धूमत्वदर्शनानन्तरं तथैव सामान्यप्रत्यासत्त्या धूमत्वावच्छिन्नोपस्थितौ व्याप्तिग्रहादनुमितिसम्भवात् । अन्यथा तदनुत्पादसम्भवात् । इदमेव च सामान्यस्य प्रत्यासत्तित्वकल्पकमित्याचक्षते । तदेतन्मानान्तरसिद्धायां सामान्यप्रत्यासत्तौ घटते । अन्यथा न्यायनये महानसधूमे धूमत्वपुरस्कारेण व्याप्तिग्रहे पर्वतीयधूमे धूमत्वदर्शनानन्तरमुपनीतव्याप्तिभाने बाधकाभावात् । यद्धर्मपुरस्कारेण यद्धर्मग्रह, तद्धर्मग्रहस्यैव तत्र तदुपनायकत्वात् । परनये च समानप्रकारत्वेनैव व्याप्तिपक्षधर्मतयोर्ज्ञानस्यानुमितिहेतुत्वाद् धूमत्वप्रकारकव्याप्तिज्ञानात् तत्प्रकारकपक्षधर्मताज्ञानाच्चानुमित्युत्पत्तौ बाधकाभावात् किं सामान्यप्रत्यासत्त्येति ।

हाहितसंशयो निश्चिते विषये औचित्यावर्जितोऽङ्गीक्रियते, तथा प्रसिद्धधूम एव धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशयाहितव्यभिचारसशये बाधकाभावः । कथमन्यथा सामान्यलक्षणाभ्युपगमेऽप्येतच्चन्दनखण्डप्रभवदशधूमव्यक्तिनिष्ठप्रत्येकतत्प्रभववह्निसम्बन्धग्रहे एतच्चन्दनखण्डजन्यधूम एतच्चन्दनखण्डवह्निव्यभिचारी न वेति संशयः । न चात्रेव तत्राप्यनवगतवह्निसम्बन्धः सामान्योपस्थाप्यः कश्चिद् धर्म्यस्ति, येन तद्धर्मिकत्वं संशयस्य कल्प्यमिति ।

अत्र पक्षधरमिश्राः — धूमत्वं वह्निव्याभिचारिवृत्ति न वेति संशयो न वह्निव्यभिचारित्वेनोपस्थितघटादौ धूमत्वं विषयीकरोति, तत्र धूमत्वाभावनिर्णयात्। किन्तु वह्निव्यभिचारित्वेन सामान्यप्रत्यासत्त्या प्रसिद्धाप्रसिद्धवह्निव्याभिचार्युपस्थितौ प्रसिद्धं परित्यज्याप्रसिद्धतद्वृत्तित्वं धूमत्वे विषयीकरोति । अयमपि संशयः सामान्यप्रत्यासत्त्यधीन एवेति सावश्यमभ्युपगन्तव्येति समादधते ।

अत्रेदमालोचनीयं — दोषात् प्रसिद्ध एव कचिद् वह्निव्याभिचारिणि धूमत्वव्यतिरेकानिश्चयेन सामान्यलक्षणां विनापि धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशय उपपद्यते । ततश्च तदाहित एव धूमो वह्निव्यभिचारी न वेति संशयः सम्भवत्येव । न च धूमभिन्ने धूमत्वं नास्तीति निश्चयदशायां कथं वह्निव्यभिचारिणि प्रसिद्धघटादौ धूमत्वसंशय इति वाच्यम् । धूमभिन्नत्वेनापि दोषाद् व्यक्तिविशेषानुपस्थितेस्त्वयापि स्वीकार्यत्वात् । कथमन्यथा सामान्यलक्षणाङ्गीकारेऽपि चन्दनखण्डजन्यधूमभिन्ने न तद्धूमत्वमिति निश्चये चन्दनखण्डप्रभवधूमस्तज्जन्यवह्निव्यभिचारी न वेति संशयः ।

केचित्तु — प्रसिद्धधूमेऽत्यन्ताभावादिगर्भव्याप्तिनिश्चयेऽपि साध्यसामानाधिकरण्यावच्छेदकधर्मवत्त्वलक्षणव्याप्तिसन्देहे बाधकाभावः । तस्यानिर्णयात् । नह्यन्यनिर्णयोऽन्यसंशयपरिपन्थीति न व्यभिचारसंशयान्यथानुपपत्तिः सामान्यलक्षणायां मानम् । किञ्च, सम्बन्धितावच्छेदकभेदात् सम्बन्धि(क?)पदार्थभेद इति तत्तद्धूमत्वावच्छिन्नव्याप्त्यपेक्षया धूमत्वावच्छिन्नव्याप्तिर्भिन्नेति तद्धूमत्वावच्छिन्नव्याप्तिनिश्चयेऽपि धूमत्वावच्छिन्नव्याप्तिसंशये बाधकाभाव इति। तच्चिन्त्यम्। धूमो वह्निव्यभिचारी न वेति संशयस्य यथाकथञ्चिद् एवमुपपादनेऽपि धूमः शुक्लो न वेत्यादिसंशयस्य सामान्यलक्षणां विनासम्भवाद्, व्याप्तिभेदवत् शुक्लत्वादिभेदाभावात् । तस्मात् प्रसिद्धधूम एव धूमत्वप्रकारकः (स्वारसि?) स्वारसिकः सं-

शय इति वा, अन्याहितसंशय इति वा, घटादावेव धूमत्वादिरूपेण तद्धर्मिकसंशय इति वा, प्रसिद्धधूम एव क्वचिद् धूमत्वादर्शनाद् वह्निसामानाधिकरण्यादर्शनाद् वा संशय इति वक्तव्यता, किं सामान्यप्रत्यासत्त्येत्येव तत्र दूषणम् ।

पक्षधरमिश्रास्तु — सामान्यलक्षणा विनान्धकारप्रत्ययो न स्यात्, तस्य यावद्द्रव्यभूतरूपतेजस्संसर्गाभावरूपस्य प्रतियोगिरूपयावत्तेजोज्ञानाधीनत्वात्, तस्य च तया विना असम्भवाद्, अतीतानागततेजसा सन्निकर्षान्तराभावादिति । किञ्च, ज्ञानेच्छाकृतीना कार्यकारणभावग्रहार्थमपि सामान्यलक्षणाभ्युपेया । अन्यथा कृतिकालोत्तर ज्ञानस्याभावात् तद्धेतुताग्रहानुपपत्ते । न च स्मृत्युपनीते ज्ञाने कृतिहेतुताग्रहो मनसेति वाच्यम् । स्मृतेरनुभवपूर्वकत्वाद्, अनुभवस्य च कृतिजनकीभूतज्ञानानन्तरमुत्पादाङ्गीकारे कृतिकाले जनकीभूतज्ञानाभावेन कृतिरेव नोत्पद्येत किंहेतुता तत्र (आ'गृ)ह्येत । सामान्यप्रत्यासत्त्यङ्गीकारे चाय घट इति ज्ञानानन्तर तदनुव्यवसायगृहीतघटविषयकज्ञानत्वप्रत्यासत्त्या सकलघटविषयकज्ञाना(भा'नुभ)वे जाते पुनर्घटविषयक(इति')ज्ञानादिच्छाकृती भवत । तदनन्तर पूर्वानुभवाद् घटविषयकज्ञानस्मृति , तदुपनीते तत्र मनसा कार्यकारणभावपरिच्छेद इत्याहु ।

तदपि पर प्रति न प्रमाणीकर्तुं शक्यम् । विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्याभावज्ञाने प्रतियोगितावच्छेदकप्रकारकज्ञानस्य फलीभूतज्ञानप्रकारप्रकारकज्ञानस्य वा हेतुत्वाभ्युपगमात् । तच्च 'तेनस्त्वमिति तत्प्रकारकज्ञान सामान्यलक्षणा विनापि सम्भवतीति किं सामान्यलक्षणया । यदपि ज्ञानप्रयत्नयो कार्यकारणभावग्रहार्थ सामान्यलक्षणाङ्गीकार इत्युक्त, तदप्यकोमलम् । अय घट इति ज्ञानानन्तरमेतदनुव्यवसायेन घटविषयकज्ञानत्वविशिष्टतज्ज्ञान, तत प्रवर्तकीभूतज्ञानोत्पादादिच्छाद्युत्पाद , तदनन्तर घटविषयकज्ञानत्वप्रकारकपूर्वानुभवजनितघटविषयकज्ञानत्वप्रकारकस्मृत्योपनीते ज्ञाने घटविषयकज्ञान घटविषयकृतिहेतुगिति ग्रह सम्भवत्येव, समानप्रकारकानुभवस्य तत्प्रकारकस्मृतिहेतुत्वादिति किं सामान्यलक्षणया । किञ्च, ज्ञान तदनुव्यवसाय , ततो विनश्यदवस्थज्ञानादिच्छा, तज्ज्ञानतत्संस्कार्योस्तृतीयक्षणे उत्पत्ति , तत कृति , ततस्तदनुव्यवसायानुभूतज्ञानस्मृति , तत स्मृत्युपनीते ज्ञाने कृतिहेतुताग्रह सम्भवत्येव । न चैव कृत्युत्पत्तिरेव न स्यात्, कृतिपूर्वक्षणे ज्ञानस्याभावा-

णा। अन्यथा घटपदात् शक्यत्वेन गृहीतघटव्यक्तेरेवोपस्थिति स्यात्, न त्वपूर्वघटव्यक्तेः। समानविषकज्ञानस्य तादृशपदार्थोपस्थितौ शाब्दबोधे च प्रयोजकत्वात्। न च समानप्रकारकत्व तत्र नियामक, न तु समानविषयत्वमिति वाच्यम्। तथा (च सति) घटत्वप्रकारकशक्तिज्ञानाद् घटत्वेन प्रकारेण पटादेरप्युपस्थितिप्रसङ्गात्। तत्र नियामकान्तरकल्पनापेक्षया समानविषयत्वस्य नियामकत्व कल्पनाया लघुत्वात्। अत एव सम्प्रदायमतमप्यनवद्य, ज्ञानेच्छयो समानप्रकारकत्वे सति समानविशेष्यकत्वेन हेतुहेतुमद्भावादिच्छाविशेष्यभूतानागतपाकज्ञानार्थं सामान्यलक्षणाया आवश्यकत्वात्। न च ज्ञानेच्छयो समानप्रकारतामात्रेण हेतुहेतुमद्भावो न समानविशेष्यकत्वेनापि, गौरवादिति वाच्यम्। तथा सति घटत्वप्रकारकज्ञानात् तत्प्रकारकपटविशेष्यकेच्छोत्पादप्रसङ्गात्। न चेच्छाया स्वजनकज्ञानप्रकाराश्रयविशेष्यकत्वनियमाद् न पटविशेष्यकत्व घटत्वप्रकारकेच्छाया इति वाच्यम्। तथा सति भ्रमस्थले रजतत्वप्रकारिकाया शुक्तिविशेष्यकेच्छाया अनुत्पादप्रसङ्गात्। न च स्वजनकज्ञानप्रकारागृहीतासंसर्गधर्मिविशेष्यकत्वमिच्छाया इति वाच्यम्। एतदपेक्षया स्वजनकज्ञानसमानविशेष्यकत्वस्यैव लघुत्वेन नियामकत्वकल्पनाया औचित्यात्।

वयं तु ब्रूम — सामान्यलक्षणा विना घटो नास्तीति सामान्याभावधीर्न स्यात्। प्रतियोगिज्ञान विनाभावबुद्धयनुत्पादात्। प्रतियोगिना च घटत्वावच्छिन्नाना प्रकारान्तरेण ज्ञातुमशक्ते। न चाभावबुद्धौ प्रतियोगिज्ञानत्वेन हेतुता न तु यावत्प्रतियोगिज्ञानत्वेन, गौरवादिति वाच्यम्। विशेषाभावग्रहस्थले तत्तत्प्रतियोगिज्ञानत्वेनैव तत्तत्प्रतियोगिज्ञानस्य हेतुतकल्पनात् सामान्याभावस्यापि यावद्विशेषप्रतियोगित्वेनावश्य नावज्ञानसापेक्षज्ञानतया यावत्प्रतियोगिज्ञानस्य तज्ज्ञानहेतुत्वावश्यकत्वात्। यदि च यावद्विशेषाभावस्यैव घटो नास्तीति प्रत्ययविषयत्वमङ्गीक्रियते, तदा सामान्यलक्षणा पुनरामुररीकार्या। तद्(द्)रीकरण विना तत्प्रतियोगिग्रहस्य ज्ञानाभावेन तत्प्रत्यक्षासम्भवादिति।

अस्मन्मित्रचरणास्तु— अनुमितिविषयतायां नियामकान्तरस्य वक्तुमशक्यतया व्यापकत्वेन गृहीतत्वस्य तन्नियामकत्व वाच्यम्। तच्च पर्वतीयवह्नौ सामान्यलक्षणा विना न सम्भवति। अनुमानस्यानवस्थादुष्टत्वात्, प्रकारीभूतस्थले गौरवाच्च। न च व्याप्यतावच्छेदकत्वेन गृहीतधर्माश्रयत्व नियामकम्।

भ्रमानुमितावव्याप्तेः। न च तत्राप्यन्यत्रस्थ एव वह्निर्विषयः। पर्वतातिरिक्तवृत्ति-वह्निः पर्वते नास्तीति ज्ञानानन्तरं पर्वतो वह्निमानिति भ्रमानुमितौ गुञ्जापुञ्जादेरेव तत्त्वेन विषयत्वात्। किञ्च गौरवमपि, व्यापकत्वेन गृहीतत्वापेक्षया व्यापकतावच्छेदकत्वेन गृहीतधर्माश्रयत्वस्यातिगुरुत्वादित्याहुः।

नव्यास्तु — घटत्वात्यन्ताभावप्रत्ययानुपपत्तिरेव सामान्यप्रत्यासत्तौ प्रमाणम्। तथाहि — प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमभावधीहेतुः। तच्चेह घटत्वत्वम्। तच्च घटेतरावृत्तित्वे सति सकलघटवृत्तित्वम्। तज्ज्ञानं च सकलघटज्ञानमन्तरेण न सम्भवति। तदर्थं सामान्यप्रत्यासत्तिः कल्पनीयेति वदन्ति। तच्चिन्त्यं, घटेतरावृत्तित्वे सति घटनिष्ठात्यन्ताभावाप्रतियोगित्वस्यैव घटत्वत्वपदार्थतया तज्ज्ञानस्य तया विनापि सम्भवादिति।

ननु सामान्यलक्षणाङ्गीकारे सर्वमार्द्रेन्धनापत्तिः, संशयानुपपत्तिश्च। न च तेन रूपेण सार्द्रेन्धनसंशयाभावावङ्गीक्रियेत एव, रूपान्तरेण त्वापादकाभावः। तत्प्रकारकज्ञानाभावादिति वाच्यम्। भास्यमानवैशिष्ट्यप्रतियोगित्वस्यैव प्रकारत्वरूपतया प्रमेयमिति ज्ञाने घटत्वादिसकलवैशिष्ट्यभानेन प्रकारत्वस्य घटत्वादावनपायात्। तत्प्रकारकसंशयानुपपत्तेरेवापाद्यत्वात्। न च जनकज्ञानविषयत्वमपि प्रकारतापटकं, तच्च प्रमेयमिति ज्ञाने प्रमेयत्वस्यैव, न तु घटत्वादेरिति नातिप्रसङ्ग इति वाच्यम्। प्रमेयवानिति ज्ञाने प्रमेयमात्रस्यैव जनकज्ञानविषयत्वेन प्रकारतया घटत्वादिप्रकारकसंशयविरोधित्वापादनस्य वज्रलेपत्वादिति। मैवम्। तत्प्रकारकं ज्ञानं संशयविरोधीति सत्यं, पर तु प्रकारो द्विविधः निश्चितवच्छिन्न, अन्यानवच्छिन्नश्च। तत्राद्ये यद्रूपोपस्थितयत्प्रकारक ज्ञानं तद्रूपोपस्थिततत्प्रकारकसंशयविरोध्येव, न तु शुद्धतत्प्रकारकसंशयविरोध्यपि। यथा दण्डिमद् गृहमिति ज्ञाने पुरुषस्य चैत्रादेः प्रकारत्वेऽपि दण्डावच्छिन्नस्यैव तथात्वाद् दण्डिमन्न वेति संशयो न भवति। अन्यादृशस्तु भवत्येव चैत्रवद् गृहं न वेति। तथाच प्रकृतेऽपि प्रमेयत्वोपस्थितसर्व(प्र)मेयप्रकारकनिश्चय प्रमेयवान् न वेति संशय प्रतिबध्नात्येव। घटो वा न वेत्यादिसंशयप्रतिबन्धाय तज्ज्ञानमिति न दोषशङ्कावकाशः। अन्त्ये तु तादृशसंशयप्रतिबन्धक एव, यथा घटोऽयमिति ज्ञान शुद्धघटत्वप्रकारक घटो न वेति तादृशव्यावर्तकमिति। वस्तुतस्तु प्रकारत्व ज्ञाननिरूपितसम्बन्धसम्बन्धित्वेन संशयादिविरोधेन कल्प्यत इति फलबलेन घटोऽयमिति ज्ञाने घटत्वस्य न सम्भ-

चारि रूपे सुरभित्वव्यभिचारित्वाद् रूपत्ववदिति क्रमेण व्यभिचारानुमानसम्भवाद् सुरभित्वेऽतिव्याप्तेर्दुष्परिहरत्वादिति ।

अत्र प्रतिभाति — साध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मवत्त्वतदव्यभिचारित्वातिरिक्तधर्मावशेषित यद्यभिचारित्व हेतौ साध्यव्यभिचारित्वसाधने व्याप्तिपक्षधर्मतोभयवत्, (त्रदापि[1]) न सर्वथा तत्साध्यकतद्धेतावुपाधि । अत एव नानित्यदोषता, न वा घटादावतिप्रसङ्गशङ्का, धूमव्यभिचारित्वसाधने घटव्यभिचारित्वस्य व्याप्त्यभावात् । न चावृत्तिसाध्यके तथापि घटादेरुपाधित्व स्यादेव, अवृत्तिव्यभिचारित्वव्याप्यत्वाद् घटव्यभिचारित्वस्येति वाच्यम् । अवृत्तिव्यभिचारव्याप्यतायां वृत्तित्वमात्रस्यैव लाघवेनावच्छेदकत्वाद्, घटव्यभिचारित्वत्वादेरतथात्वात् । नीलधूम(त्व)स्यावच्छेदकत्वाभावेन नीलधूमस्य व्याप्त्यभाववद् घटव्यभिचारस्यावृत्तिव्यभिचाराव्याप्यत्वात् । अत एव गो शुक्ल पशुत्वादित्यत्र न साक्षावत्त्व गोत्वावच्छिन्नशुक्लत्वव्यापकमुपाधि. । पशुत्व शुक्लव्यभिचारीत्यत्र गोत्ववति गोत्वाव्यभिचारित्वे सतीत्यन्यतरघटितसाक्षावत्त्वव्यभिचा(रीत्य[2] रित्व)स्याहेतुत्वात् । उभयथापि स्वरूपासिद्धत्वात् । पशुत्वस्य गोत्ववति साक्षावत्त्वव्यभिचारित्वाभावाद् गोत्वव्यभिचारित्वाच्च । अत एव 'पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नसाध्यव्यापक घटावृत्तिगुणवत्त्वमुपाधिः स्यात् । द्रव्यत्व पृथिवीत्वव्यभिचारि द्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वे सति घटावृत्तिगुणवत्त्वव्यभिचारित्वाद् मेयत्ववदिति क्रमेण व्यभिचारानुमितिसम्भवात् । हेतौ द्रव्यत्वपद पक्षधर्मत्वसिद्ध्यर्थम् । मेयत्वपद च दृष्टान्तसिद्ध्यर्थम् । पटत्वपद पटत्वे सत्यन्तसिद्ध्यर्थम् । न च तदेव व्यर्थमिति वाच्यम् । घटावृत्तिगुणवत्त्वव्यभिचारित्वस्य विशेष्यभागस्य तथा सति वैयर्थ्यप्रसङ्गाद्, द्रव्यत्वमेयत्वे इतिधीविशेष्यत्वस्यैव पृथिवीत्वव्यभिचारव्याप्यत्वात् । तस्माद् द्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वस्य पटत्वेऽपि सत्त्वेन तत्र पृथिवीत्वव्यभिचारित्वरूपसाध्याभावेन व्यभिचार स्यादिति घटावृत्तिगुणवत्त्वव्यभिचारित्वपदम् । न चैवमपि द्रव्यत्व मेयत्व इतिधीविशेष्यत्वस्यैव व्याप्यत्वे तद्घटितद्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वघटितहेतौ नीलधूमवदव्याप्यत्वमेवेति वाच्यम् । द्रव्यत्वमेयत्वपटत्वगोचरज्ञानस्याखण्डस्य हेतुशरीरप्रविष्टत्वेन वैयर्थ्यशङ्काविरहात् । एव पर्वतो वह्निमान् धूमादित्यत्र व्यञ्जनवत्त्वमुपाधि स्यात् । धूमो वह्निव्यभिचारी धूमभेय

त्वमहानसत्वानीतिधीविशेष्यत्वे सति व्यञ्जनवत्त्वव्यभिचारित्वाद् मेयत्ववदिति व्यभिचारानुमितिसम्भवादि'ति दूषणमपास्तम्। साध्यनिष्ठोपाधिव्याप्यतावच्छेदकघटान्यत्ववर्तीत्यस्य, घटान्यत्वाव्यभिचारित्वे सतीत्यस्य वा हेतौ प्रवेशयितुमशक्यत्वात्। घटान्यत्ववति द्रव्यत्वस्य घटावृत्तिगुणवत्त्वव्यभिचारित्वाभावाद् घटान्यत्वव्यभिचारित्वाच्च द्रव्यत्वस्य। अत एव न प्रसिद्धानुमाने व्यञ्जनवत्त्वेऽतिप्रसक्तिः। उक्तहेतोर्वह्निव्यभिचारव्याप्यत्वाभावाद्, धूम एव व्यभिचारात्। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् प्रमेयत्वाद् वेत्यत्र च बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्ष(त्व)व्यापकमुद्भूतरूपवत्त्वमुपाधिरेव। बहिर्द्रव्यत्वाव्यभिचारित्वबहिर्द्रव्यत्ववत्त्वान्यतरगर्भोद्भूतरूपवत्त्वव्यभिचारित्वस्य हेतुत्वसम्भवात्। अयं गन्धो गुणत्वादित्यत्रासुरभित्वाभावावच्छिन्नसाध्यव्यापकस्य सुरभित्वस्य तूपाधित्वमेव। गुणत्वं गन्धत्वव्यभिचारि असुरभित्वाभाववति सुरभित्वव्यभिचारित्वाद् रूपत्ववदित्यनुमानसम्भवात्। इदमेव सर्वं मनसिकृत्य पक्षधरमिश्रैः साक्षावत्त्वस्यानुपाधित्वं सुरभित्वस्य चोपाधित्वमवादीति।

ननु शुद्धसाध्यव्यापक उक्तलक्षणमव्याप्तं, साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मस्य तत्राभावेन तद्घटितलक्षणासम्भवादिति चेद्, न। व्याप्यतान्यूनवृत्तिमात्रस्य व्याप्यतावच्छेदकत्वेन विवक्षितत्वाद्, न तु स्वरूपसम्बन्धविशेषोऽनतिप्रसक्तोऽवच्छेदकान्तरासमानाधिकरणो वा उपाधिव्याप्यत्वावच्छेदकत्वेन विवक्षितः। तथा च शुद्धसाध्यव्यापकेऽपि द्रव्यत्वादिकमार्द्रेन्धनादिव्याप्यतावच्छेदकं भवत्येवेति न कोऽपि दोषः। वस्तुतस्तु — साध्यनिष्ठोपाधिव्याप्यतावच्छेदकमात्रमेव प्रकृतलक्षणे प्रविष्टम्। तच्च शुद्धसाध्यव्यापके साध्यतावच्छेदकमेव। साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोस्तु साधनपक्षधर्माविति नाव्याप्तिगन्धोऽपि। यद्वा साध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मवति यद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारनियमः, स तत्रोपाधिः। अत एव वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः। बहिर्द्रव्ये वाय्वादावुद्भूतरूपव्यभिचारिणि मेयत्वे प्रत्यक्षत्वव्यभिचारित्वात्। अत एव उपाध्याया नियमार्थे तृतीयेति व्याख्यातवन्तः। यत्तु — यद्व्यभिचारित्वेन साध्यव्यभिचार इत्यत्र व्यभिचारपदमुभयत्राप्यव्याप्यत्वपरम्। अन्यथा इदं द्रव्यमाकाशादित्यत्र परिमाणवत्त्वोपाधौ स्वान्याप्यत्वेन द्रव्यत्वाव्याप्यत्वसाधने उपाधिलक्षणाभावेना-

व्याप्तिप्रसङ्गादिति । (त च 'तन्न ।) तन्न व्यर्थतयोपाध्यव्याप्यत्वस्याकाशे साध्याव्याप्यत्वासाधकत्वाद्, (घट 'अ)वृत्तित्वेन वा अव्याप्यत्वेन वा तत्साधनात् । किञ्च, उपाधि यवत्या पारिभाषिकी। सा च व्यभिचारोन्नायक एव शास्त्रकारस्य नान्यत्रेति, अव्याप्यत्वानुमानेऽपि न तस्य समाद्रता । अन्यथा हेत्वाभासान्तरोन्नायकेऽव्याप्तिरित्येव मुतो नाशङ्केथा । शास्त्रकाराव्यवहारश्च समान एवेति दिक् ।

ननु साध्यव्यभिचारोन्नायक कम्यचिद् व्यभिचार कम्यचिन्नेत्यत्र नियामकाभाव । न च साध्यव्यापकव्यभिचार एव तथा । साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्थलाप्तेरिति चेद्, न । पर्यवसितसाध्यव्यापकव्यभिचारस्य तथात्वात् । पर्यवसितत्व च साध्यप्रसिद्ध्यवच्छेदकधर्मावच्छिन्नत्वम् । साध्यप्रसिद्ध्यवच्छेदकत्व च साध्यप्रसिद्ध्यधिकरणवृत्तित्वम् । तेन वहिर्द्रव्यत्वादौ पक्षधर्मे नाव्याप्ति । एव च 'साध्यप्रसिद्ध्यधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमपि लक्षणान्तर पर्यवस्यती'ति मणिकृत ।

अत्र वदन्ति — एव सति प्रसिद्धानुमाने महानसत्वावच्छिन्नसाध्यव्यापक व्यञ्जनवत्त्वमुपाधि स्याद्, महानसत्वस्यापि साध्यप्रसिद्ध्यधिकरणवृत्तित्वात् । न चेष्टापत्ति । सर्वेषामेव हेतूनामेव सोपाधित्वे सोपाधिनिरुपाधिव्यवस्थाभङ्गप्रसङ्गादिति ।

अत्रोपाध्याया — साधनवति साध्यप्रसिद्ध्यन्यूनवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्व विवक्षितम् । वहिर्द्रव्यत्वादिक च तथा, प्रत्यक्षस्पर्शाश्रयत्ववति प्रत्यक्षत्वप्रसिद्ध्यन्यूनवृत्तित्वात् । अतस्तदवच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वमुपाधिरेव। महानसत्व च धूमवति वह्निप्रसिद्धिन्यूनवृ(त्तिरे'त्ये)वेति न तदवच्छिन्नवह्निव्यापक व्यञ्जनवत्त्वमुपाधि । यद्वा, साधनव्यापकीभूतत्व साध्यप्रसिद्ध्यवच्छेदकधर्मविशेषण, वहिर्द्रे(व्य 'व्यत्व) च प्रत्यक्षस्पर्शाश्रयत्वव्यापकम्, अतो वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वमुपाधि । महानसत्व च न धूमव्यापक, पर्वतादौ व्यभिचाराद्, इति न महानसत्वावच्छिन्नवह्निव्यापक व्यञ्जनवत्त्वमुपाधिरिति समाधु ।

तच्चिन्त्यम्— वायु प्रत्यक्ष वायुत्वादित्यत्रोद्भूतरूपवत्त्वोपाधा(व)व्याप्ति, साधनवति साध्याप्रसिद्धे । किञ्च, वायु प्रत्यक्ष मेयत्वादित्यत्रोद्भूतरूपवत्त्वमु-

पाधिर्न स्यात् । बहिर्द्रव्यत्वस्य मेयत्वमिति प्रत्यक्षत्वप्रसिद्धिन्यूनवृत्तित्वाद् मेयत्वा व्यापकत्वाच्च । न च तत्र प्रत्यक्षागम्या एवोपाधिरः, न तूद्भूतरूपवत्त्वमेवेति वाच्यम् । स्वयमसामर्थ्येन तथोक्तावविश्वासात् । न च विशेषणाभिचारि(त्व) सहकारेण यद्यभिचार साध्याभिचारानुमापक, न चैवात्र लक्ष्यत इति प्रमेयत्वहेतुके प्रमेयत्व प्रत्यक्षत्वाभिचारि बहिर्द्रव्यत्वाभिचारित्वे सति बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूपवत्त्वव्यभिचारित्वादित्यव्याप्तिरुक्तया साध्याभिचारेणानुमापकादुपाधित्वाभावलक्षणेष्ट एवेति वाच्यम् । विशेषणवति यद्यभिचार साध्याभिचारानुमापक इत्येव तात्पर्यात्तु यतोऽयोक्त, तत्र प्रमेयत्वहेतुकेऽप्यस्त्येव, प्रमेयत्व प्रत्यक्षत्वाभिचारि, बहिर्द्रव्यत्वमिति उद्भूतरूपवत्त्वव्यभिचारित्वादित्येव व्यभिचारानुमानसम्भवादिति तत्राव्याप्ति कथ न दोषाय भवेदिति न चिन्त्यदेतत् ।

इद तु सम्भाव्यते — पर्यवसितपदमुभयत्रापि साध्ये साधने च देय, तथा च यद्धर्मावच्छिन्नसाध्यव्यापकत्व तद्धर्मावच्छिन्नसाधनाव्यापकत्व लक्षणार्थ । महानसत्वावच्छिन्नवह्न्यव्यापके तदवच्छिन्नधूमव्यापके च व्यञ्जनवत्त्वे तत्भावादव्याप्तिरिति चेन्न । पक्षधर्मावच्छिन्नसाध्यव्यापके चोद्भूतरूपवत्त्वोपादानाद् बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापके बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षस्पर्शाश्रयत्वाव्यापकत्वसत्त्वान्नाव्याप्ति । यद्वा, यत्र साधनाव्यापकत्व, तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्व विवक्षितम् । व्यञ्जनवत्त्वन्तु पर्वतादौ धूमाव्यापक तद्वृत्तिधर्मावच्छिन्नवह्न्यापक न भव(ती)ति, पर्वतादावेव व्यभिचारादिति न तत्राव्याप्तिः । अथवा, उपाध्यनधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्व विवक्षितम् । व्यञ्जनवत्त्व च न तथा, स्वानधिकरणधूमाधिकरणगोष्ठादिवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावादिति न तत्राव्याप्तिरिति ।

अत्र कश्चित् — गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यत्र एतद्गन्धप्रागभावकालीनरूपवत्त्वमेव तद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकमुपाधि स्यात् । एतद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकस्यैतद्गन्धप्रागभावकालीनरूपवत्त्वस्यैतद्गन्धप्रागभावकालीनत्वावच्छिन्नपृथिवीत्वाव्यापक

---

१ 'वानु' क पाठ

त्वात्, पक्ष एव व्यभिचारात्। एवमेतत्कालीनरूपवत्त्वस्य पक्षे पृथिवीत्वव्यापकस्य तद्वृत्येतद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकत्वसत्त्वाद् द्वितीयलक्षणस्यापि तत्रातिव्याप्ति। एवमेतत्कालीनरूपवत्त्वानधिकरणपृथिवीत्वाधिकरणपक्षीभूतघटवृत्त्येतद्गन्धप्रागभावकालीनत्वरूपधर्मावच्छिन्नसाध्यव्यापकत्वसत्त्वादेतत्कालीनरूपवत्त्वस्य तृतीयलक्षणमपि तत्रातिव्याप्तमेव। किञ्च, घट पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकस्य घटावृत्तिगुणवत्त्वस्योपाधित्वाभावापत्ति:। घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकस्य तदवच्छिन्नद्रव्यत्वव्यापकत्वाद्, घटे द्रव्यत्वाव्यापकस्य तद्वृत्तिधर्मावच्छिन्नसाध्याव्यापकत्वाद्, घटावृत्तिगुणवत्त्वानधिकरणद्रव्यत्वाधिकरणघटवृत्तिधर्मावच्छिन्नसाध्याव्यापकत्वाच्चेति दूषणमाह। तदसङ्गतम्। तद्धर्मावच्छिन्नेत्यस्य तद्धर्मसामानाधिकरण्यावच्छिन्नेत्यर्थ। तथा च तद्धर्मसामानाधिकरण्यावच्छिन्नसाध्यव्यापकत्वमर्थ। न चैतदेतद्गन्धप्रागभावकालीनरूपवत्त्वेऽ(स्तीति ' स्ति।) एतद्गन्धप्रागभावकालीनत्वसामानाधिकरण्यावच्छिन्नगन्धस्यैतद्घट एव पक्षीभूते सत्त्वेन तत्रैतत्कालीनरूपवत्त्वाभावेन व्यभिचारात्। एवमग्रिमलक्षणद्वयेऽपि न तत्रातिप्रसङ्ग, धर्मावच्छिन्नपदस्य सर्वत्र सामानाधिकरण्यावच्छिन्नार्थत्वकल्पनात्। यच्च किञ्चित्यादिना दूषणमुक्त, तदपि न। घटावृत्तिगुणवत्त्वानुपाधित्वस्य प्रागेव प्रतिपादिततया तत्राव्याप्तेरदोषत्वात्। यदि च तदुपाधित्वमवश्य स्वीक्रियत एव, तदा स्वैविशिष्टोपाध्यनधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्व लक्षणम्। स्वपद च साध्यपरम्। तथा च पृथिवीत्वविशिष्टघटावृत्तिगुणवत्त्वानधिकरण यद् द्रव्यत्वाधिकरण जलादि, तत्तद्वृत्तिघटान्यत्वावच्छिन्नपृथिवीत्वव्यापकत्वमस्त्येव घटावृत्तिगुणवत्त्वस्येति न तत्राव्याप्तिरिति।

पक्षधरमिश्रास्तु — यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव लक्षणार्थ। न चैव सति व्यञ्जनवत्त्वे महानसत्वावच्छिन्नसाध्यव्यापकेऽतिव्याप्ति। महानसत्वावच्छिन्नवह्नौ साध्ये तस्याप्युपाधित्वेन सम्मतत्वात्। व्यभिचारानुमापकतावच्छेदकस्योक्तलक्षणस्य विशिष्टव्यभिचारोन्नायके व्यञ्जनवत्त्वे सत्त्वस्यादोषत्वादित्याहु।

तत्तु न बुध्यते। शुद्धसाध्यव्यभिचारोन्नायकतावच्छेदकस्य प्रकृते विचा-

---

1. 'स्वा' क. पाठ

र्यत्वात्, तस्य च यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वरूपस्य व्यञ्जनवत्त्वेऽपि सत्त्वेन ततोऽपि शुद्धसाध्यव्यभिचारोन्नयनापत्तेर्वारयितुमशक्यत्वादिति ।

वस्तुतस्तु —यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति शुद्धसाध्यव्यापकव्यभिचारिसाधनाव्यापकत्व लक्षणम् । अत एव न व्यञ्जनवत्त्वादावतिप्रसङ्ग , तत्र शुद्धवह्निव्यापकव्यभिचारित्वस्य धूमेऽभावात् । साधनावच्छिन्नपक्षधर्मावच्छिन्नयोरपि शुद्धसाध्यव्यापक प्रत्यक्षसामग्र्यादि, तद्व्यभिचारिप्रत्यक्षस्पर्शाश्रयत्वादिरूपसाधनाव्यापकत्वमुद्भूतरूपवत्त्वादेरुपाधेरभ्युपेयेति नाव्याप्ति । एवं च घट पृथिवी द्रव्यत्वादित्यत्र घटावृत्तिगुणवत्त्व घटान्यत्वावच्छिन्नसाध्यव्यापकमुपाधिरेव । तत्र द्रव्यत्वस्य साधनस्य पृथिवीत्वरूपसाध्यव्यापकगन्धवत्त्वव्यभिचारित्वात् । गौ शुक्ल पशुत्वादित्यत्रापि गोत्वावच्छिन्नशुक्लत्वव्यापक सास्नावत्त्वमुपाधिरेव । एवमन्यत्राप्यूह्यम् । यद्वा, यत्किञ्चिद्धर्मावच्छिन्नव्यभिचारिसाध्यव्यापकत्वे सति साधनाव्यापकत्व लक्षणम् । व्यञ्जनवत्त्वादौ व्यभिचारिसाध्यव्यापकत्वाभावान्नातिव्याप्ति । साध्यव्यभिचारिसाधनाव्यापकत्वे सति यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्व वा लक्षणार्थ । अथवा, यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साध्यानधिकरणे साधनाव्यापकत्व विवक्षितम् । न च व्यञ्जनवत्त्व तथा, तस्य धूमाव्यापकत्वेऽपि वह्न्यनधिकरणे तदभावात्, तत्र धूमस्यासत्त्वादिति दिक् ।

इद तु विचार्यते —व्यभिचारघटितोपाधिज्ञान वा प्रतिबन्धक, साध्यव्यापकत्वादिघटित तज्ज्ञान वा । नाद्य । साधने साध्यव्यभिचारस्य साध्यव्यापकत्वादिप्रमोत्तरकाल्यत्वात्, व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वनियमात् । न तु प्रथममेव तद्ग्रह, उपाधेर्व्यर्थतापत्ते । नापर । यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वज्ञानस्य प्रतिबन्धकत्वे व्यञ्जनवत्त्वस्यापि तद्ग्रहात तेनापि वह्न्यनुमितिप्रतिबन्धापत्ते । शुद्धसाध्यव्यापकत्वज्ञानस्य प्रतिबन्धकत्वे साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यप्रतिबन्धकत्वप्रसङ्ग । न च यद्धर्मावच्छिन्नसाध्यव्यापकत्व तद्धर्मावच्छिन्नसाधनाव्यापकत्वज्ञान प्रतिबन्धकमिति नाप्रसङ्गातिप्रसङ्गाविति वाच्यम् । तथा सति भिन्नभिन्नधर्मावच्छेदेन साध्यव्यापकत्वसाधनाव्यापकत्वयोर्ग्रहे प्रतिबन्धानापत्ते , शुद्धसाध्यव्यापकत्वेन ग्रहे प्रतिबन्ध(का ? क वा)

तस्मादिदमत्र तत्त्व — वायु प्रत्यक्ष वायुत्वादित्यादौ पक्षधर्मावच्छिन्न-साध्यव्यापकत्वमेवोद्भूतरूपवत्त्वादे , साधनावच्छिन्नसाध्यस्याप्रसिद्ध्या तद्व्यापक त्वासम्भवात् । प्रागभावो विनाशी जन्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्याप कत्वमेव भावत्वाद्युपाधे । पक्षधर्मावच्छिन्नसाध्यस्य पक्षेऽपि सत्त्वात्, तत्र च भावत्वाद्युपाधेरभावात् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्यासम्भवात् । न चैव त्रैविध्यव्यवस्थितावपि घटरूपादिपक्षकप्रत्यक्षत्वमाध्यकर्मत्वादिहेतावुक्तचातुर्वि ध्य न निराकृतमिति वाच्यम् । तत्र तस्योपाधित्वेनादोषत्वेऽप्यक्षते । उक्तत्रैवि ध्यस्थल एव शास्त्रकारस्योपाधित्वव्यवहारात् । यदि च तत्राप्युपाधित्वेन सङ्गा ह्यता, तदा शुद्धसाध्य यापकत्वे(त्यने)न साधनपक्षधर्मानवच्छिन्नसाध्यव्याप कत्व विवक्षितमिति न काप्यनुपपत्ति । ऋजवस्तु — उदासीनधर्मावच्छिन्नसा ध्यव्यापकस्तुरीय एव । विभागस्तूपलक्षणपर इति समादधु ।

अन्ये तु — यदभावात् साधनवति क्वचित् साध्याभाव साधयितु शक्यते, स एवोपाधि । तथा च साधनाधिकरणं साध्याभावाधिकरणमुपाध्यभावाधिकरण त्वादित्यनुमितिर्जायमानान्यत्र साधनाधिकरणे साध्याभावस्य साधावधारणात् पक्ष एव साध्याभाव गोचरीकरोतीति सत्प्रतिपक्ष एव पर्यवसानमित्याहु ।

तच्चिन्त्य — क्वचिदेव सत्प्रतिपक्षपर्यवसानेऽपि यत्र पक्षे साध्यसाधनो-पाधीना निर्णय , अनुमित्सया चानुमानप्रवृत्तिस्तत्र पक्षे साध्याभावविषयत्व ग्यासम्भवेन भिन्नविषयतया सत्प्रतिपक्षासम्भवाद् व्यभिचारानुमान एव पर्यवसा-नमिति दिक् ।

ननु साध्यव्यापकोपाधिव्यभिचारितया हेतौ कथ साध्यव्यभिचारित्वानु मिति । यत साध्यव्याप्यहेत्वव्यापकतया उपाधेरेव साध्याव्यापकत्वानुमित्या सा ध्यव्यापकत्वज्ञानासम्भव इति चेद्, न । उपाधौ साध्यव्यापकताग्राहकस्य बल्व त्त्वेन तत्र साध्यव्यापकताग्रहात् तद्व्यभिचारेण हेतौ साध्यव्यभिचारानुमितिस म्भवात् । यदि च हेतुसाध्ययो साध्योपाध्योश्च तुल्यमेव व्याप्तिग्राहक, तदोपाधौ साध्यव्यापकत्वसन्देहेन हेतावपि साध्यव्यापकव्यभिचारित्वमशयाहितसाध्यव्यभि चारसंशय इति भवत्येव तथाप्यनुमितिप्रतिबन्ध ।

इद त्ववधातव्य — परामर्शोत्पत्तिपूर्वमुपाधिप्रतिसन्धाने तेन व्यभिचारो व्याप्त्यभावो वा ज्ञायत इति करणविघटनादनुमितिप्रतिबन्धकत्वमुपाधे , परामर्श

उत्पन्ने तु समबलतादशाया सत्प्रतिपक्षद्वारा, अधिकबलतादशाया तु बाधद्वारा प्रतिबन्धकत्वम्। न चोपाधिव्यभिचाराद् व्यभिचारानुमित्यनावश्यकत्वेन तद्घटितोपाधिलक्षणव्याहतिरिति वाच्यम्। तत्स्वरूपयोग्यताघटितत्वात् तल्लक्षणस्येति पूर्वमेवोक्तत्वादिति। व्यभिचारज्ञान चोपाधिव्यभिचारित्वरूपविशेषदर्शनजन्य क्वचिल्लौकिकप्रत्यक्ष, क्वचिदुपाधिव्यभिचारित्वेन साध्यव्यभिचारानुमितिरू(प [1] पम्)। न च साक्षात्कारनिश्चये साक्षात्कारविपरीतज्ञानस्य विरोधित्वात् कथ व्यभिचारानुमिति र्व्याप्तिप्रत्यक्षविरोधिनीति वाच्यम्। अन्यत्र तथात्वेऽपि व्यभिचारज्ञानस्य तज्ज्ञानत्वेनैव प्रतिबन्धकत्वात्। अन्यथान्यत्र ग्राह्यसशयस्याप्रतिबन्धकत्वात् सन्दिग्धानैकान्तिकमप्यप्रतिबन्धक स्यात्। तथा च व्यभिचारानुमितिरप्यव्यभिचारप्रत्यक्षप्रतिबन्धिकैव।

इद तु शङ्क्यते — व्यभिचारानुमितिसामग्रीभूतस्य परामर्शस्यैवाव्यभिचारप्रत्यक्षप्रतिबन्धकत्वमस्तु। यद्धीर्यत्र प्रतिबन्धिका, तत्र तत्सामग्र्यपीति युक्तेस्तप्रतिबन्धकतावश्यकत्वयोभयसिद्धत्वात्। अन्यथा विशेषदर्शनादीना सशयादिप्रतिबन्धकतापि न स्यादिति।

अत्रोच्यते — अनुमितिप्रतिबन्धकत्व विना तत्सामग्रीभूतपरामर्शस्य प्रतिबन्धकत्वे मानाभाव। प्रतिबन्ध(क)र्धीसामग्रीत्वरूपविपक्षबाधकतर्काभावात्। न च पूर्वमेव तत्सामग्र्यैव प्रतिबन्धे जाते व्यभिचारानुमिति किं प्रतिबध्नात्विति वाच्यम्। प्रतिबन्धयोग्यतासत्त्वे परामर्शनाशकालीनव्याप्तिप्रत्यक्षस्य प्रमत्तस्य तया प्रतिबन्धसम्भवादिति दिक्।

उपाधिश्च द्विविध — निश्चितोपाधि सन्दिग्धोपाधिश्च। तत्राद्यस्य दूषकतोक्तैव। अन्त्यस्य तु साध्यव्यापकत्वसाधनाव्यापकत्वान्यतरसन्देहेन व्यभिचारसशयाद्यासञ्जकतया दूषकत्वम्। नन्विदमनुपपन्नम्। स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजन्यत्वस्य साधनाव्यापकत्वसशय पक्ष एव वाच्य। अन्यत्र मित्रातनये श्यामत्वनिश्चयेन शाकपाकजन्यत्वनिश्चयात्। तथा च तत्सशयेन पक्षे साध्याभावसशयात्मकव्यभिचारसशयो जननीय। स च न दोष, हेतुमत्त्वेन निश्चिते साध्यसशयात्मकव्यभिचारसशयस्यादोषत्वात्। अन्यथानुमानमात्रविलयप्रसङ्गादिति।

---

१ 'मेत' क पाठ

अत्रोपाध्याया — व्यभिचारसंशयमात्रमेव दूषणं, व्यभिचारज्ञानत्वेनैव लाघवात् प्रतिबन्धकत्वात् । तथा च हेतुमति साध्यसन्देहोऽपि प्रतिबन्धक एव । तर्कादिना तदपनये सत्यनुमानमवृत्तिरिति न तन्मात्रोच्छेद इति समाधत्ते ।

तत्र पक्षधरमिश्रा — व्यभिचारसंशयमात्रस्य प्रतिबन्धकत्वेऽनुमानमात्र एव पक्षीयव्यभिचारशङ्कापनोदनार्थं तर्कापेक्षापत्तेः, तर्कमूलभूतव्याप्तेरपि निश्चयार्थं तर्कान्तरानुसरणेनानवस्थाप्रसङ्गाच्चेति दूषणमाहुः ।

अत्र केचित् — साध्यसंशयः सर्वत्र भविष्यत्येवेत्यत्र मानाभावः, कोटिस्मृत्यादिहेतुनियमात् । तथा च सर्वत्र न तर्कापेक्षेति नैतद् दूषणमिति ।

अत्राय मिश्राणां समाधिः — सन्दिग्धसाध्यवति सर्वत्र तर्कापेक्षापत्तिः । नहि सर्वत्र तर्कापेक्षेति कश्चिद् ब्रूते, अनुभवसाक्षिकं वा । किन्त्वत्र तर्कमूलभूतव्याप्तेरपि पक्षीयसाध्यसन्देहेन निश्चयासम्भव इत्यत्रापि तर्कान्तरापेक्षायामनवस्थेति ।

तस्मादत्राय समाधिः — अनुमानमात्रोच्छेदापत्त्या सर्वत्र संशयः प्रतिबन्धक इति मास्तु । पक्षतावच्छेदकसंशयान्यसंशयत्वेन प्रतिबन्धकत्वात् । तथा च स्वारसिकसाध्यसंशयस्य पक्षतावच्छेदकतया न प्रतिबन्धकत्वमिति नानुमानमात्रोच्छेदः । अन्याहितसंशयस्तु न पक्षतावच्छेदक इति प्रतिबन्धकः स्यादेव । वस्तुतस्तूपाध्यादिसन्देहाहितसन्देहस्य पृथगेव विरोधित्वम्, अन्याहितसंशयस्य प्रामाण्यसंशयाहितार्थसंशयादेरिव प्रतिबन्धकतौचित्यादिति ।

इदं त्ववधेयं — पक्षधर्मतात् पूर्वमुपाधिसंशयस्य व्यभिचारादिसन्देहापादकत्वेन दूषकत्वं पक्षधर्मतानन्तरं च बाधसंशयापादकतया दोषत्वम् । न च साध्यसंशयतया बाधसंशयो न विरोधीति किं तदापादकत्वेनेति वाच्यम् । अन्याहितव्यभिचारसंशयवत् तादृशबाधसंशयस्यापि प्रतिबन्धकतायां युक्तिसाम्यादिति संक्षेपः ॥

उपाधिवादः समाप्तः ।

अथ पक्षधर्मतावादः ।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते । सा च पक्षतावच्छेदिका पक्षे च

१ [illegible]

सन्दिग्धसाध्यकत्वमिति प्राञ्च । तन्न । साध्यसंशयस्योपलक्षणत्वे निश्चितेऽप्यनुमित्यापातात । विशेषणत्वे चानुमितिपूर्वं नियमतः सत्ता वाच्या, सा चास(म्भा'-म्भ)विनी, व्याप्तिस्मृत्यादिव्यवहितत्वात् । अत एव सिसाधयिषितसाध्यधर्मकत्व तदित्यपि निरस्तम्, उक्तक्रमेण विशेषणतोपलक्षणत्वविकल्पप्रासादिति मणिकृत ।

अत्रेदं शङ्कचते — संशये विशेषणतोपलक्षणत्वविकल्पोऽस्तु, न तु सिसाधयिषायामपि । सा हि सिद्धिजनकीभूता सिद्धिविषयकेच्छा ईश्वरसाधारणा विवक्षितेति भवति विशेषणमेव । न चैव सिद्धसाधनोच्छेदः, भगवदिच्छाया नित्यतया तद्घटितपक्षतासत्त्वस्य दुर्वारत्वादिति वाच्यम् । फलीभूतसिद्धीच्छाया एव पक्षताघटकत्वात् सिद्धसाधनस्थले फलीभूतसिद्ध्यनुत्पादेन तद्गोचरभगवदिच्छाविरहात् तस्या फलैकफल्यत्वात् । अत एव घनगर्जितादावव्याप्तिर्निरस्ता । तत्रानुमितेरनुभूयमानत्वेन तद्गोचरभगवदिच्छासत्त्वादिति ।

अत्र ब्रूमः — एवं सति सिद्धसाधनस्थलेऽनुमितिर्दुर्वारा, प्रहरानन्तरोत्पत्स्यमानसिद्धिगोचरभगवदिच्छायास्तदापि सत्त्वेन पक्षतायाः सत्त्वात् । न च तस्याः सत्याः पक्षतासत्त्वेऽपि भाविप्रहरानन्तरक्षणस्यैव हेतोस्तदानीमभावान्न तस्यास्तदोत्पत्तिरिति वाच्यम् । तथा सति सिद्धसाधनस्थले सर्वत्रानुमित्यनुत्पादक्षणविशेषरूपहेतुविलम्बादेवास्त्विति पक्षता कारणमेव नेति कृतं भगवदिच्छायास्तत्कुक्षिनिक्षेपेण । किञ्च, सिद्धिसामग्रीसमवहितभगवदिच्छारूपसिसाधयिषाघटिता पक्षता ज्ञानमात्र एवाव्यभिचाराद्धेतुरस्तु । तथा चानुमित्यसाधारणजनकत्वव्याघात इति सिद्धिसमानाधिकरणसिसाधयिषाघटिता वाच्या । तथा च विशेषणत्वोपलक्षणत्वविकल्पो निर्विकल्प एव मणिकृतामिति नायं पन्था इति ।

अत्र मणिकृत — सिसाधयिषाविरहसहकृतसाधकमानाभाव पक्षता । (मा'स) च विशिष्टाभाव क्वचित साधकमानरूपविशेष्याविरहात्, क्वचित सिसाधयिषाविरहरूपविशेषणाविरहात्मकसिसाधयिषात, क्वचिदुभयत इत्याहुः ।

अत्रोपाध्याया — मान मिति तत्करण च । तथा च सिद्धित्करणान्यान्यत्वावच्छिन्नाभावत्वेन तदुभयाभावस्य हेतुत्व पक्षतापदवाच्यत्व च । तथा च सिद्धसाधनस्थले संशयोत्तरप्रत्यक्षस्थले च क्वापि न पक्षतेति नानुमितिरित्याहुः ।

अत्र मिश्राः — एवं सति तृणादीनामप्यन्यान्यत्वेन वह्निजनकत्वापत्तौ शक्तिवैजात्यान्यतरकल्पना भज्येत । न चानुगतकारणतावच्छेदकासम्भवात् तत्र वैजात्यकल्पनमिति मार्थं, किन्त्वनुभवसिद्धत्वादिति वाच्यम् । क्लेशेनान्यान्यत्वेनोपपत्तावतीन्द्रियशक्तिकल्पनायामतथाप्यप्रसक्तेः । तस्मादन्यान्यत्वं नावच्छेदकमिति वाच्यम् । तथा चात्रापि सिद्ध्यभावः साधकमानाभावश्च प्रत्येकमेवानुमितिहेतुः पक्षता च । लाघवात् सिद्ध्यभाव एव पक्षपदप्रवृत्तिनिमित्तमिदमुक्तमित्युपसंहारस्य मणौ दर्शनादिति ।

अत्र केचित् — तृणान्यान्यत्वेन हेतुत्वे तृणफूत्काराभ्यामिवारणि(मणि[१])फूत्काराभ्यामपि वह्निप्रसङ्गात् । हेतुतावच्छेदकावच्छिन्ने सहकारिसमवधानस्यैव कार्योपादकत्वात् । अत्र तु अन्यान्यत्वस्य हेतुतावच्छेदकप्रवेशे बाधकाभावः । प्रत्युताभावद्वयापेक्षयैकाभावहेतुतैव ज्यायसी । यच्च पक्षपदप्रवृत्तिनिमित्तत्वलाघवमभ्यधायि, तदज्ञानात् । नह्यत्र परमेश्वरसङ्केत(ति[१])तः, येन स लघुन्येव कल्प्येत । अपि तु शास्त्रपरिभाषा । तत्र च गौरवमतन्त्रम् । अत एव मणि(कण्ठे[१] ग्रन्थे) सशयोत्तरप्रत्यक्षे सामग्रीमत्त्वादनुमितावापादितायां पक्षतविरहान्नानुमितिरिति क(ण्ठाव[१] ण्ठ)रवेणाभिहितमिति ।

अत्रायमभिसन्धिर्मिश्राणाम् — अरणिफूत्काराभ्यां कार्योपपत्तेरनेकशक्तिमत्त्वेन कारणतायामपि साम्याद् दृष्टेनान्यान्यत्वेनैवोपपत्तावतीन्द्रियशक्तिकल्पनायामानाभावाद् अन्यान्यत्वमवच्छेदककोटिप्रविष्टं न भवतीत्यवश्यं वाच्यम् । किञ्च, एककारणताकल्पना कारणताद्वयकल्पनाविरोधिनी तत्रैव, यत्र प्रत्येककारणतावच्छेदकद्वयाघटितं कारणतावच्छेदकम् । इह तु प्रत्येकाभावकारणतावच्छेदकस्यैकाभावनिष्ठकारणतावच्छेदके प्रवेशाद् अतिरिक्तान्यपदार्थप्रवेशाच्च कुत्रैकाभावहेतुतायां लाघवशङ्कापि । यच्चोक्तं शास्त्रकारपरिभाषायां गौर(व[१] वम्) किञ्चित्करमिति । तदत्यन्तबोधात् । शास्त्रकारतात्पर्यस्य कल्प्यत्वस्थले तत्रापि लाघवादरात् । सशयोत्तरप्रत्यक्षेऽनुमित्यभावस्य पक्षताविरहात् प्रत्यक्षसामग्रीबलवत्त्वाद् वा सम्भव इति मशये, भमाने विषये प्रत्यक्षसामग्र्या बलवत्त्वादित्यादि मणिग्रन्थानुसारेण लाघवानुसारेण च पक्षतायाः सिद्ध्यभावस्यैव प्रमाणमस्मरात् । किं बहुना, एवं सति कार्यमात्रं एवैकमन्यान्यत्वमवच्छेदकमस्त्विति गत

दण्डत्वादेः कारणतावच्छेदकत्वेन । यदि च दण्डचैकान्यान्यत्व दण्डत्वादिघटि-तमिति तदेव लाघवादवच्छेदकमङ्गीक्रियते, तदा प्रकृतेऽपि दीयतां दृष्टि । तस्मात् सिसाधयिषाविरहसहकृतसिद्ध्यभाव एव पक्षता, सिसाधयिषा चानुमितिगोचरेच्छामात्रं, सा च सिद्धित्वप्रकारानुमितित्वप्रकारिका वेति विशेषो नादरणीय. ।

नन्विद लक्षणमनुपपन्नम । सिसाधयिषा हि तल्लिङ्गकतत्पक्षकतत्साध्यक-तत्पुरुषीयेच्छा पक्षताघटिका वाच्या, अन्यथातिप्रसङ्गात् । तथा च यस्य घनगर्जिताद्यनुमितौ नेच्छा, तस्य तत्सिसाधयिषाविरहेण पक्षताविरहाद् गर्जि-तेन घनानुमानं न स्यादिति चेद्, न । फलीभूतसिद्धावीश्वरेच्छा स्येच्छा च प्रयोजिका । तथा च फलीभूतसिद्धिप्रयोजकतत्पक्षक(तत्)सा-ध्यकेच्छाविरहसमाना-धिकरणसिद्ध्यभावो यदात्मनि, तदात्मनि पक्षताङ्गीकाराद् घनगर्जितादावर्षाश्वरे-च्छामादाय प्रसि(द्धि)द्धेरदुष्टत्वात् । न च सिद्धसाधनस्थलेऽप्यनुमिति स्याद्, ईश्वरेच्छाविरहविशिष्टसिद्ध्यभावस्य सिद्धिमत्त्वेऽपि सत्त्वादिति वाच्यम । ईश्वरे च्छाविरहसमानाधिकरणसिद्धेरेव सिद्धिमदात्मनि सत्त्वेन तदभावाभावात । अन्ये त्वेच्छाया अन्यात्मन्यवृत्तेः । अस्तु वा तल्लिङ्गकतत्पक्षकतत्साध्यकसमानाधिकरणे-च्छैव पक्षताघटिका, अतो न सिद्धसाधनस्थलेऽतिप्रसङ्गोऽपि । न चैवं यत्र क-दापि स्वस्य साध्येच्छा नास्ति, तत्राप्रसिद्धिरिति वाच्यम् । तत्र विशिष्टाभाव-रूपपक्षतायाः हेतुत्वे मानाभावात् । नहि सर्वैक्यरूपेण तत्त्वा हेतुत्व, तल्लिङ्ग त्वादिप्रवेशेनानानुगमात् । तथा च तत्र सिद्धसाधनाभावमात्रेणैव कारण, साध्याद्य तिप्रसङ्गाच । अन्यत्र तु विशिष्टाभाव इति व्याप्तिसिद्धिद्वारीति पुनरुपदर्शनम् ।

ननु तथापि विशेषणाभावघटितविशिष्टाभाव कारण इति न सम्भवति, सिद्धिसमयेऽपि साध्यविशेषणाभावेनैकदेशसम्बन्धात् । केवलस्य विशेषणस्यैवैकदा-नवस्थितेः । न च सिसाधयिषाघटितसमग्रो विशिष्टाभाव । तथा सति सिद्ध-साधनस्थलेऽप्यनुमितिप्रसङ्गात् । यत्किञ्चित्सम्बन्धेनेति चेद्, न । यत्र सि द्धिसमयेसिद्धिजनक सम्बन्धस्य सम्बन्धमुखेनाभावस्य सम्बन्धेन सिसाधयिषेति, तत्र विशेषणाभावघटितविशिष्टाभावस्य हेतुत्वसम्भवात्, सिद्धिसमयेऽनेकसम्बन्धेन पुनरनवस्थानाद्दुर्निरूपत्वाच्चेति दिक् ।

पक्षधरमिश्रास्तु — द्वित्रक्षणान्तरितायामपि सिसाधयिषायामनुमितिदर्शनात् सिद्धिसामान्येच्छाया परामर्शोत्पत्त्युत्तरजातायामप्यनुमितिद्वयादर्शनाच्च सिसाधयिषोत्पत्त्युत्तरकालीनस्वविषयसिद्ध्यनुत्पादकाल एव तद्योग्यतारूप पक्षतावटक । यद्वा सिसाधयिषोत्पत्त्युत्तरकालीनत्वमपि न विशेषणम् । न चैव सिद्धौ जातायां सिसाधयिषातोऽनुमितिर्न स्यात्, सिसाधयिषाविषयीभूतपूर्वसिद्ध्यनुत्पादकालाभावादिति वाच्यम् । इच्छायामनागतविषयत्वनियमेन पूर्वसिद्धे सिसाधयिषाविषयत्वाभावेनैवानतिप्रसङ्गात् । तथा च सिसाधयिषाविषयसिद्ध्यनुत्पादकाल एव सिसाधयिषायोग्यतारूप पक्षतावटक । वस्तुतस्तु — सिसाधयिषाविषयसिद्ध्यननुगुणानन्तरितानुत्पादकाल एव तद्योग्यतारूप पक्षतावटक । अत एवाद्य सिसाधयिषाया जातायामपि दैवात् सिद्ध्यनुत्पादे ध्वस्तद्धटितपक्षतातो नानुमिति , अन्तरायकालस्य सिद्ध्यननुगुणत्वात् । फलबलात् तथा कल्पनादित्याहु । अत्र च प्रथमपक्षेऽद्य सिसाधयिषाया दैवात् सिद्ध्यनुत्पादे ध्वस्तद्धटितपक्षतानोऽनुमितिप्रसङ्ग । सिसाधयिषाविषयसिद्ध्यनुत्पादकालसत्त्वादिति दूषणाच्चरमपक्ष एव साधीयानिति द्रष्टव्यम् । अत एव यावज्जीवमनुमिनुयामितीच्छायामपि न यावज्जीवमनुमित्युदय । तादृशसिसाधयिषाया सत्यामप्यनुमित्युत्पादस्यानुभवासिद्धतयान्तरायकालस्य सिद्ध्यननुगुणान्तरितत्वकल्पनात् । फलबलस्यैव तत्तत्पक्षत्वादिति । नन्वेव सशयोत्तरप्रत्यक्षस्थलेऽनुमितिरेव स्यात्, सिसाधयिषाविरहसहकृतसिद्ध्यभावरूपपक्षतापरिपूर्णानुमितिसामग्र्या परामर्शात्मिकाया सत्त्वादिति चेद्, न । समानविषयकसिद्धिकरणान्तराभावस्यापि अनुमितिसामग्रीघटकत्वात् । सशयोत्तरप्रत्यक्षे च समानविषयकानुमानातिरिक्तसिद्धिकरणस्य प्रत्यक्षस्यैव सत्त्वान्नानुमिति । तत्रापि सशयानन्तरमनुमितिरस्त्वितीच्छायामनुमितिदर्शनादनुमित्सोत्तेजिका । तथा चानुमित्साविरहसहकृतानुमानातिरिक्तसाधकमानाभाव पक्षतापदाप्रतिपाद्योऽन्यूनानतिहेतुरिति नातिप्रसङ्ग इति वदन्ति ।

तत्रेद शङ्क्यते — तत्रानुमित्सा किमनुमितिगोचरेच्छामात्रम्, उतानुमितित्वप्रकारेच्छा । नाद्य । सिद्धिर्मेऽस्त्वितीच्छायामपि साधकमानस्थलेऽनुमित्यापत्ते । उत्तेजिकाया अनुमितिगोचरेच्छाया सिद्धित्वप्रकारिकाया सत्त्वात् । नान्त्य । सशयानन्तर प्रत्यक्षा-यसिद्धिर्मेऽस्त्वितीच्छायामनुमितिर्न स्यात् । तदि-

कत्वमनुभवसिद्धमिति गुरुरपि विशिष्टाभाव कारणत्वेनाङ्गीकियते, तदा प्रकृतेऽपि तुल्यमिति ।

अत्रेद विचार्यते—एव सति विशेषादर्शनविशिष्टसशयाभाव एव प्रत्यक्षे हेतुरस्त्विति तदुत्तरप्रत्यक्षे विशेषदर्शन हेतुरिति न स्यात्। तथाच विशेषसामग्र्युच्छेदप्रसङ्ग इति समोऽयमनुयोग । किञ्च, मण्यादिस्थले उत्तेजकानामननुगतत्वान्न विशेषसामग्रीकल्पन, प्रकृते च सिसाधयिषाहेतुत्वे बाधकाभावात्। यत्तु—सिद्धे प्रतिबन्धकत्वज्ञान विना सिसाधयिषाया विशेषकारणता निश्चेतु न शक्यते, सामान्यसामग्रीत एव कार्यसम्भवात्। प्रतिबन्धकत्व च कारणीभूताभावप्रतियोगित्वमित्युपजीव्यतयोत्तरकाले तत्र गाह्यते । किन्तु तत्रोत्तेजक(त्व)मात्र कल्प्यते । एवमप्रामाण्यादिस्थलेऽपीति । तन्न। सिद्धस्थलीयानुमितौ सिसाधयिषाया अन्वयव्यतिरेकाभ्यामेव हेतुतानिश्चयान (तु') तदर्थं सिद्धिप्रतिबन्धकत्वज्ञान पूर्वं(मु'म)पेक्षित, येनोपनीव्यविरोध स्यात्। अस्तु वा तदपेक्षा । उत्तरकालीनलाघवप्रति(ब'स)धानेन तत्त्यागे बाधकाभावात्। अन्यथा नित कार्यान्वितशक्तिवादिनेति। यदपि—सिद्ध्यभावस्यानुमितावहेतुत्वे सिद्धसाधनस्थलेऽनुमित्यापत्ति । न च सिद्ध्युत्तरानुमितौ सिसाधयिषा हेतुरिति तदभावात् तदभाव इति वाच्यम्। सिद्धयनुत्तरानुमितौ तथापि बाधकाभावात् तत्सामग्रीसत्त्वात्। न च सिद्धयनुत्तरानुमितौ सिद्धयभाव कारणमिति तदभावादेव तदभाव इति वाच्यम्। तथा सति सामग्रीद्वयकल्पने विपरीतगौरवाद् विशिष्टाभाव एव हेतुरस्त्विति नव्यदूषणम्। तदपि न। विशेषदर्शनप्रतिबन्देरनुद्धारात्। अत एव निश्चितार्थसशये प्रामाण्यसशयो विशेषसामग्रीति सिद्धान्त । अन्यथा तत्रापि विशिष्टाभावहेतुतापत्तेरिति ।

अत्रार्याचीना —यत्रोत्तेजकस्य फल प्रति हेतुत्व प्रमाणान्तरेण सिद्धमस्ति, तत्र विशेषसाम(ग्र्यै'ग्र्ये)व कल्प्यते । न विशिष्टाभाव , यथा सशयोत्तरप्रत्यक्षे । तत्र गुणत्वेन विशेषदर्शनप्रमाया सशयोत्तरप्रमा प्रति हेतुत्वकल्पनात्। उत्तरकालेऽपि सिद्धकारणभावस्यैव विशेषदर्शनस्य हेतुत्व कल्प्यते। यत्र तु नैव, तत्रानुगततया विशिष्टाभाव एव हेतु कल्प्यते दाहे मण्यभाव इव। तदत्र सिसाधयिषाया कथमप्यनुमित्यहेतुत्वाद् विशिष्टाभावो हेतुत्वेन कल्प्यत इति वदन्ति ।

हात् । अत एवानुमितिधारामप्रसङ्गभिया सिद्धि प्रतिबन्धिकेति निरस्त, परामर्शाभावादेव तदभावसम्भवात् । न चानुमितिरेव लिङ्गविषयकतया परामर्श इति वाच्यम् । लिङ्गोपहितलैङ्गिकभानस्याप्ये निरम्यत्वादिति कथ पक्षतानुमितिहेतुरिति ।

अत्रोच्यते — एव सति सशयोत्तरप्रत्यक्षान-तर साक्षात्करोमीत्यनुव्यवसायो न स्याद्, न स्याच्च तदनुरोधात् प्रत्यक्षसामग्रीबलवत्त्वकल्पन, तत्प्रत्यक्षे व्याप्यस्यापि जनकीभूतविशेषदर्शनविषयस्य विषयतया परामर्शरूपतत्प्रत्यक्षादनुमित्युत्पादस्यैव सम्भवात् । भिन्ने विषयेऽनुमितिसामग्रीबलवत्त्वात् । तस्मात तत्र सिद्धिसत्त्वान्नानुमितिरिति वाच्यम् । ततस्तदभावोऽवश्यमनुमितिहेतु । किञ्च, यत्र व्याप्यवत्त्व पक्षतावच्छेदक, तत्रानुमितिपरम्परव स्याद्, नानुमित्यनुव्यवसाय । पक्षतावच्छेदकतया व्याप्यस्यानुमितो भानेन पूर्वपूर्वानुमितेः परामर्शात्मिकाया सत्त्वादित्यवश्य सिद्धयभावस्तत्र कारणमिति सक्षेप ॥

इति पक्षधर्मतावाद ।

अथ परामर्शवादः ।

पक्षधर्मस्य व्याप्तिविशिष्टयधीरनुमितिहेतु । ननु व्याप्यतावच्छेदकरूपेण व्याप्तिधीस्तेनैव रूपेण पक्षताधीरप्यनुमितिहेतु । न तु व्याप्तिविशिष्टपक्षधर्मताधीस्तत्र हेतु । तद्धेतोरिति न्यायेन तज्जनकादुक्तादेवानुमितिसम्भवात् । न च व्याप्तिस्मृतौ धूमत्वरूपोपनायकदर्शने च पक्षधर्मे व्याप्तिविशिष्टयज्ञानमावश्यकमिति तदेव हेतुरिति वाच्यम् । भिन्नविषयेऽनुमितिसामग्र्या बलवत्त्वेन परामर्शोत्पत्तिक्षणेऽनुमितिसामग्रीसत्त्वेनानुमितेरवोत्पादात् । न च पक्षधर्मे व्याप्यभेदज्ञाने सत्यनुमितिर्नेति तद्भेदधीहेतुरिति वाच्यम् । धूमत्वरूपव्याप्तिनियतधर्मज्ञाने व्याप्यभेदज्ञानस्यैवासम्भवात् । न च समानप्रकारकज्ञान विशेषधीप्रतिबन्धकमिति धूमत्वेन व्याप्तिज्ञानेऽपि तद्भूमत्वेन तदभावज्ञानमस्तिति वाच्यम् । यद्धर्मावच्छेदेन यन्निश्चय , तद्भटितधर्मप्रकारकनद्व्यतिरेकज्ञानम्यासम्भवात । अन्यथा घटत्वावच्छिन्न द्रव्यमिति ज्ञाने सत्यय नीलघटो द्रव्य न वेति ज्ञाना

पत्तेः । भवतु वा व्याप्यपक्षधर्मयोर्भेदाग्रहोऽप्यनुमितिहेतु., अभेदज्ञानजनकत्वेन तस्यावश्यकत्वात् तत एवानुमित्युत्तरतावन्तरभेदज्ञानकल्पनायां गौरवात् । न च भेदग्रहस्यानुमितौ प्रतिबन्धकतायामभेदज्ञानस्य तत्र हेतुत्वमावश्यकं, जनकज्ञान विघटयत एव ज्ञानस्य प्रतिबन्धकत्वादिति वाच्यम् । तथा सति परामर्शे भेदधी प्रतिबन्धिका न स्यात्, तत्राभेदधीहेतुत्वस्य त्वयाप्यनभ्युपगमाद्, व्याप्तौ विशेषणान्तरप्रवेशे त्वप्रयोजकत्वादिति ।

ज्ञानत्वेनैव हेतुता, न तु तन्नियतधर्मप्रकारकपक्षधर्मताज्ञानत्वेनेति पक्षधरचरणा ।

वस्तुतस्तु — नीलधूमत्वादेरपि व्याप्त्यनतिप्रसक्तत्वरूपव्याप्तिनियतत्वसत्त्वात् तत्प्रकारकज्ञानादप्यनुमिति स्यात् । तथा च व्यर्थतादोष इव न स्यात् । न च तादृशलघुधर्मावटितत्वमपि नियतत्वघटकम् । तथा सति व्याप्यतावच्छेदकप्रकारकज्ञानस्यैव हेतुतागमनाद्, अनतिप्रसक्तत्वे सति तादृशलघुधर्मावटितस्यैवावच्छेदकपदार्थत्वात् । तथा च धूमालोकान्यान्यत्वेन पक्षधर्मताज्ञानेऽनुमितिर्न स्यादिति मणिकृच्चरणैर्वज्रलेपायितम् । किञ्च, व्याप्तिनियतत्वेन ज्ञायमानधर्मप्रकारकत्वमतिप्रसङ्गभीत्या वाच्यम् । तथा चातिगौरवमनुभवश्च । नहि धूमो वह्निव्याप्य इति ज्ञाने सति धूमत्वस्य वह्निव्याप्तिव्याप्यत्वाज्ञानेऽनुमितिर्न भवति । धूमस्य वह्निव्याप्तिग्रहसामग्रीतो धूमत्वस्य वह्निव्याप्तिव्याप्यत्वज्ञानसामग्र्या भिन्नत्वादिति सिद्धे लाघवादनतिप्रसङ्गाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानस्यानुमितिहेतुत्वमिति ।

ननु व्याप्तिविशिष्टस्य पक्षधर्मे बोद्धुमशक्यत्वे, पक्षीयसाध्यासन्निकर्षेण तन्नियतसामानाधिकरण्यात्मकव्याप्तेरिन्द्रियेणाग्रहात् । न च व्याप्तेरुपनीतभानमपि, पूर्वमज्ञानादिति चेत्, न । महानसीयधूमवह्निसहचारदर्शनादिना व्याप्तौ प्रागेव धूमत्वपुरस्कारेण ग्रहणात् पक्षधर्मधूमे धूमत्वदर्शनानन्तरं तदुपनयात् । यद्धर्मावच्छेदेन यद्धर्मग्रहे, तद्धर्मग्रहस्य तदुपनायकत्वात् । विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहरूपविशिष्टप्रत्यक्षसामग्र्याश्चाधिकत्वात् । न च व्याप्तिरूपविशेषणं न ज्ञातमिति वाच्यम् । व्याप्तेरेकत्वा महानसीयवह्निधूमग्रहादेव पूर्वं ग्रहणादिदानीं च तत्स्मरणानन्तरं पक्षधर्मधूमे तद्विशिष्टज्ञाने बाधसामग्र्यादिति मणिकृत ।

अत्र वदन्ति व्याप्तिः सामानाधिकरण्यात्मिका । सा च प्रत्येकं भिन्नेति पर्वतीयवह्निधूमसामानाधिकरण्यस्य प्रागज्ञानेन कथं तज्ज्ञानोदयः । न च सामानाधिकरण्यावच्छेदकरूपेण परम्परासम्बन्धेन व्यधिकरणसामानाधिकरण्यमपि व्याप्तिः, तस्य च प्रागपि ज्ञानादुपपत्तय इति वाच्यम् । सामानाधिकरण्यज्ञानस्यैव तदुभयधर्मिकस्य लघुत्वेन हेतुत्वात् । न च तज्ज्ञानासम्भवः । लिङ्गज्ञानेऽपि पूर

वह्निमामानाधिकरण्यत्वेन ज्ञानस्य प्राक् सम्भवादिति महानसीयधूमपर्वतीयधूमयो-रेक्यव्याप्तिपक्षोऽनुपपन्न इति ।

अत्रोच्यते — यद्यविशेषणताहेत्वाभासतायां अवच्छेदकलक्षणव्याप्तिपक्ष एवोपपत्तेस्तदनुरोधात् तज्ज्ञानमेवानुमितिहेतुरिति वाच्यम्। तथा च तदभिप्रायेणैव केन हि सा व्याप्तिरिति मणि । यद्वा एवंव्याप्तिरित्यस्य महानसीयधूमव्याप्त्या पर्वतीयधूमव्याप्तिरस्त्यमिति नार्थः, किन्तु पूर्वानुभूतेदानीमनुभूयमानयोरैक्यम् । महानसीयधूमव्याप्तिग्रहस्थले धूमव्याप्तित्वेन पर्वतीयधूमव्याप्तिरपि ग्रहात् तदुपनये बाधकाभाव इति ।

केचित् तु — व्याप्त्या सह ज्ञानं न प्रत्यासत्तिः, प्रत्यभिज्ञानामिनगुणप्रत्यक्षे संयुक्तसमवायस्यैव प्रत्यासत्तित्वेन ज्ञानस्यानासत्तित्वात्, किन्तु पर्वतधूमसंयोग रूपव्याप्त्या सह संयुक्तसमवाय एव प्रत्यासत्तिरिति वदन्ति । तत्तु चिन्त्यम्। गुणाभावप्रत्यक्षं संयुक्तसमवायं विनापि गुणस्य भानेन त्वदुक्तनियमस्य व्यभिचारात्। न च तद्भिन्नत्वमपि विशेषणम्। सामान्यलक्षणादिजन्यप्रत्यक्षं तथापि व्यभिचारात्। न चासत्त्यन्ताभावे सत्येव ज्ञानस्यासत्तित्वमितीह संयुक्तसमवायसत्त्वान्न तदासत्तिरिति वाच्यम्। आसत्त्यन्तराभावस्थले ज्ञानस्यासत्तिता कल्प्यते। तत्र चासत्त्यन्तराभावस्य गौरवेणासत्तितावच्छेदकता न कल्प्यते । मानाभावात् । तस्माद्विह ज्ञानं संयुक्तसमवायश्चोभयमपि प्रत्यासत्तिरिति ।

इदं त्वधेयम् — विशिष्टसामानाधिकरण्या(त्मि'त्स)क्व्याप्त्या सह ज्ञानमेवास्तु, तावदंशे संयुक्तसमवायासम्भवात्। तदेकदेशेन संयोगेन सहोभयमपीति। यत्तु विशेषणसन्निकर्षः कारणमेव नेति किं व्याप्तिसन्निकर्षेणेति। तन्न। घटसन्निकर्षे सति पटप्रत्यक्षापत्त्या तत्प्रत्यक्षे तदिन्द्रियसन्निकर्षहेतुतासिद्धौ विशेषणसन्निकर्षस्यापि हेतुतासिद्धिरित्युक्तं प्रत्यक्षमणिसारे इति दिक् ।

इदं तु विचार्यते — यथा धूमत्वावच्छेदेन व्याप्तिनिर्णयात् पक्षधर्मे धूमत्वनिर्णयोपनीतव्याप्तिभानं, तथा धूमवत्त्वावच्छेदेन वह्निमत्त्वनिर्णयात् पर्वते धूमवत्त्वनिर्णयानन्तरं प्रत्यक्षमेवास्तु समानविषये प्रत्यक्षसामग्रीबलवत्त्वस्य सर्वाभ्युपग(म'त)त्वादिति ।

अत्र केचित — पर्वते वह्निप्रत्यक्षं लौकिकं न सम्भवति, लौकिकद्रव्यप्रत्यक्षे इन्द्रियसंयोगस्य हेतुत्वात्, वह्नेश्चासंयुक्तत्वात् । नाप्यलौकिकम् । तथा सति नियतलिङ्गपरामर्शापेक्षा न स्यात् । उपनीतभानान्तरवदुपपत्तेः ।

किञ्च, मानान्तरविलयापत्त्या सर्वत्रोपनीतभानप्रत्यक्षसामग्री दुर्बलेति कल्प्यम्। तथा च कथं प्रत्यक्षमिति समादधते ।

तत्र शङ्क्यते — उपनीतवह्निप्रत्यक्षमस्तु। अस्तु च परामर्शापेक्षा। उपनायकधर्मज्ञानस्योपनीतभानेऽपेक्षितत्वात् । व्याप्यवत्त्वस्य चोपनायकत्वात् । न च धूमवत्त्वावच्छेदेन वह्निमत्त्वग्रहणात् तन्मात्रज्ञानमपेक्ष्यतां, न तु व्याप्त्युपनयपर्यन्तमिति तात्पर्यमिति वाच्यम्। प्रत्यक्षत्वाविशेषेऽपि चाक्षुषादिप्रत्यक्षे तत्तच्चक्षुराद्यसाधारणापेक्षावदनुमितिरूप उपनीतप्रत्यक्षे तृतीयलिङ्गपरामर्शापेक्षायां दोषाभावात्। पक्षधर्मधूमे धूमत्वज्ञानमात्रमपेक्षितं, न तु व्याप्त्युपनय इति वदन्तं प्रत्युक्तापादनस्येष्टापत्तिपराहतत्वाच्च । यच्च किञ्चेत्युक्त, तदपि न । उपनीतभाने नान्यथासिद्धिमापादयतो मानान्तरविलोपस्येष्टत्वात्। किञ्च, उपनीतभानसामग्र्या इतरज्ञानसामग्र्यपेक्षया दुर्बलत्वे संशयानन्तर भ्रमरूपविशेषदर्शने सति भ्रमरूपव्यापकप्रत्यक्षं न स्याद्, अनुमितिसामग्रीसत्त्वात् । न च दोषघटितोपनीतप्रत्यक्षसामग्र्यपेक्षयानुमित्यादिसामग्री बलवतीति वाच्यम्। तथा सति भ्रमानुमितिः क्वापि न स्याद्, दोषघटितोपनीतप्रत्यक्षसामग्र्या एव तत्र सत्त्वात्। यदपि समाहितमुपनीतप्रत्यक्षाङ्गीकारे धूमवान् वह्निमानित्यनुमितिरेव स्यान्न तु पर्वतो वह्निमानिति, उपनायकधर्मावच्छिन्नत्वेनैव ज्ञाते धर्मिण्युपनीतप्रत्यक्षसामग्र्याः सत्त्वादिति । तदपि न । उपनायकधर्मविशिष्टे धर्मिण्युपनयो न तु तद्विशिष्ट एव, गौरवादिति पर्वतत्वभानसामग्र्या तद्भानमपि स्यादेव । किञ्चैवमिदं चन्दनं सुरभीत्युपनीत प्रत्यक्षं न स्याद्, इदन्त्वावच्छेदेन सौरभ्याज्ञानादिति ।

अत्र नव्याः—वह्निमनुमिनोमीत्यनुव्यवसायेनानुमितित्वजाति सिद्धा। सा च न मानसत्वव्याप्या। तथा सति साक्षात्करोमीति तदाकारापत्ते । वह्निं न साक्षात्करोमि किन्त्वनुमिनोमीति तदाकारविरोधाच्च । तथा चानुमितिरूपविलक्षणज्ञानसिद्धावुपनीतप्रत्यक्षसामग्र्यास्तत्सामग्र्यपेक्षया दौर्बल्य कल्प्यमिति । न चैव सति प्रागुक्तदोष । प्रत्यक्षमात्रप्रयोजकदोषघटितोपनीतभानसामग्र्या अनुमित्यादिसामग्र्यपेक्षया दुर्बलत्वात्। सशयोत्तरभ्रमे च प्रत्यक्षस्यानुभूयमानतया तन्मात्रप्रयोजकदोषघटितैव सामग्रीति नानुपपत्ति । अत एव न भ्रमानुमित्युच्छेदोऽपि, तत्रानुमितेरनुभूयमानतया प्रत्यक्षमात्रप्रयोजकदोषाघटिततया तादृशोपनीतभानसामग्र्या दुर्बलत्वाद्, दोषस्य फलबलकल्प्यत्वादिति वदन्ति ।

तथा च ज्ञानरूपोपनीतान्तरप्रत्यक्षसामग्र्या तादृशं प्रत्यक्षं कुतो न स्याद्, यद्यनुमितिसामग्री तत्र न प्रतिबन्धिका । न चास्तु तादृशोपनीतप्रत्यक्षे उपनीतप्रत्यक्षविशेषरूपानुमितिसामग्र्याः प्रतिबन्धकत्वमिति वाच्यम् । अनुमितिसामग्रीप्रतिबन्ध्यतावच्छेदकतया तत्रोपनीतप्रत्यक्षत्वस्यैव कल्पनाद्, न त्वनुमितिभिन्नोपनीतप्रत्यक्षत्वस्य, गौरवात् । तद्बलाच्चानुमितेः प्रत्यक्षभिन्नत्वमपि कल्प्यते । अत एवानुमितित्वजातेरनुभवत्वसाक्षाद्व्याप्यत्वकल्पनापेक्षया तद्व्याप्यप्रत्यक्षत्वव्याप्यमानसत्वव्याप्यताकल्पनागौरवमपि न भवति । अत एव च वह्निं न साक्षात्करोमीत्यस्य न लौकिकप्रत्यक्षत्वाभावविषयत्वकल्पना, सामान्याभावविषयत्वेनोपपत्तेः । अनुमितेः प्रत्यक्षवैलक्षण्यस्योक्तयुक्त्या साधितत्वादिति दिक् ।

ननु तथापि व्यापकत्वपरामर्शापेक्षया व्याप्यत्वपरामर्शस्यानुमितिहेतुत्वे किं विनिगमकं, प्रत्युत व्याप्यत्वे सामानाधिकरण्यभागस्याधिकस्य प्रवेशेन गौरवम् । न चैवं पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शाकारः स्यात् । तथा च तत्रोपसर्जनीभूतस्य पर्वतस्यानुमितौ विशेष्यता न स्याद्, जनकज्ञानोपसर्जनीभूतस्य जन्यज्ञानेऽपि तथात्वादिति वाच्यम् । भूतले घटाभाव इति ज्ञानजन्ये घटाभाववद् भूतलमिति ज्ञाने व्यभिचारेणोक्तव्याप्तेरभावात् । परामर्शस्वभावादेवानुमितेः पक्षविशेष्यकत्वोपपत्तेः ।

अत्र मिश्राः—पर्वतवृत्तिधूमव्यापकत्वं वह्नौ तदा ज्ञातुं न शक्यते, वह्नेर्विशेष्यस्य लौकिकसन्निकर्षाभावेन बहिरिन्द्रियाप्रवृत्तेः । मनसश्च बहिरर्थे स्वातन्त्र्याभावात् । न च ज्ञानान्तरोपनीतपर्वतीयधूमव्यापकत्वं मनसा ग्राह्यमिति नास्वातन्त्र्यमिति वाच्यम् । यदि पर्वतीयधूमव्यापकत्वं स्मृतं सद् वह्नावुपनेयं, तदा तस्यापि वह्निवदनुमितिविषयतापत्तौ सर्वत्र तस्याः समूहालम्बनत्वापातात् । किञ्च, साध्यसामानाधिकरण्यं व्यापकत्वेऽपि प्रवेश्यमेव । अन्यथाकाशस्यापि व्यापकतापातात् । धूमवन्निष्ठाभावस्य प्रतियोग्यसमानदेशस्य घटाभावादेरप्रतियोगित्वादाकाशस्य । आकाशाभावस्य प्रतियोगिदेशाप्रसिद्ध्या समानदेशत्वाभावात् । तस्मादनियमादुभयपरामर्शो हेतुरिति वदन्ति ।

तत् तु विचार्यम् । पर्वतीयधूमव्यापकत्वमुपनीयता स्मृत्या । न चैतावता तद्धर्मिणोऽप्युपनयनियमः, येन तस्यानुमितौ भाने समूहालम्बनत्वं स्यात् । न चैकानुभव एव विशिष्टसंस्कारद्वारा विशिष्टस्मारक इति वाच्यम् ।

कुण्डलादिविशिष्टदेवदत्तानुभवे सति विशेषणसंस्कारानुद्बोधवदुपपत्ते । प्रमुष्टतत्ताकस्मृतिवदुपपत्तेश्च । गृह्यता वा पर्वतीयधूमव्यापक तद्रूपादे (१)। न चैतावता तस्यानुमितिविषयतास्ति । तेषा प्रत्यक्षसिद्धतया सिद्धसाधनेनानुमित्युदयायोगात् । अस्तु वा प्रत्येक स्मृताना पदार्थाना वह्नौ धूमव्यापकत्व धूमे च पक्षवृत्तित्व मिति विशेष्ये विशेषणमिति न्यायावतारात् ग्रहणमिति । यच्च किञ्चेत्युक्त, तदपि न । आकाशस्य व्यापकत्वेऽपि क्षत्यभाव । बाधादेव तदननुमिते । वस्तुतो व्यापकत्वमेव न, स्वप्रतियोगिसमानदेशभिन्नत्वस्याकाशाभावेऽपि सत्त्वात् । स्वोपादानेत्यादो (१) तथैव स्वीकारात् । भवतु वाकाशव्यावृत्त्यर्थं साधिकरणत्व विशेषणम्। तावतापि व्याप्यत्वापेक्षया लाघवमागतमेवेति ।

उपाध्यायास्तु — साध्याप्रतियोगिकसमानाधिकरणाभावकत्वमेव व्याप्यत्वमस्तु, तथा चात्रापि सामानाधिकरण्याप्रवेशान्न तदपेक्षया व्यापकत्व लघ्विति न तद्धीहेतु । किञ्च, कारणीभूतज्ञाने यावद्विषयकतया हेतुत्व, तत्रोपसर्जनतया भातस्य कार्यभूतज्ञानेऽपि तथात्वमिति नियम । भूतले घटाभाव इत्यादौ घटाभावादिविषयकत्वेन हेतुत्वान्न व्यभिचार । तथा च व्यापकत्वपरामर्शहेतुतापक्षे पक्षविशेष्यकानुमितिर्न स्यादिति व्याप्यत्वपरामर्शो हेतुरित्याहु ।

अत्र मिश्रा — व्याप्यत्वे सामानाधिकरण्याप्रवेशेऽपि व्यापकत्वापेक्षया विनिगमकमप्राप्तमेव । किञ्च, व्याप्यत्वे साध्याप्रतियोगिकसमानाधिकरणयावदभावकत्व प्रवेश्यम् । अन्यथा व्यभिचारिण्यतिव्याप्त्यापातात् । स्वसमानाधिकरणाभावाप्रतियोगित्वस्य सामान्याभावरूपस्य प्रवेशान्न तत्साधारण्यमिति न यावत्प्रवेश इति व्यापकत्वमेव लघ्विति तद्धीरेव हेतुरिति । यच्च जनकेत्यादिव्याप्त्या पक्षविशेष्यकत्व न स्यादित्युक्त, तदपि न । भूतले घटाभाव इत्यादिज्ञानजन्यज्ञानवद् विशेषणविशेष्याभावोपपत्तावुक्तव्याप्तेरप्रयोजकत्वादिति वदन्ति । (य'अ) त्र यद्यपि व्यापकत्वेऽपि यावत्त्व प्रवेश्यमेव, अन्यथा हेतुसमानाधिकरणघटाभावप्रतियोगित्वसामान्याभावस्य व्यभिचारिण्यपि सत्त्वेनातिव्याप्त्यापातात् । तथा च व्यापकत्वे क लाघवम् । तथापि विनिगमनाविरह एव तात्पर्यम् । वस्तुतो भवतु सामानाधिकरण्यावशेषिता व्याप्ति , तथापि सामानाधिकरण्यगर्भव्याप्तिधीहेतुत्वसिद्धान्तो गत एवेति तात्पर्यम् । तस्माद् व्याप्यत्वापेक्षया सामानाधिकरण्यागर्भत्वन व्यापकत्व लघ्विति तद्धीरेव हेतुरस्तु ।

अत्रोच्यते — सामानाधिकरण्यसशये तद्व्यतिरेकनिश्चये च सति नानुमितिरित्यनुभवसिद्धम् । तथा च यत्सशयेत्यादिव्याप्त्या तद्धीरेव हेतु । अत एव विरुद्धो हेत्वाभास । अन्यथा जनकीभूतज्ञानाविरोधितया तस्याप्रतिबन्धकतापत्ते । न च विरुद्धत्वेनाव्यभिचारज्ञानाविघटनम् । ग्राह्याभावानवगाहित्वात् । न च विरुद्धत्वेन व्यभिचारानुमानम् । व्याप्तिज्ञानदशाया तदभावेनानुमित्यप्रतिबन्धापत्त्या प्रतिबन्धनियमघटितहेत्वाभासतानुपपत्ते । एव व्यभिचारधीप्रतिबन्धकत्वानुरोधादव्यभिचाराशधीरपि हेतुरित्यव्यभिचरितसामानाधिकरण्यधीहेतुत्वसिद्धिरिति ।

गौडास्तु — सामानाधिकरण्यग्रहविपर्यीभूतसाध्यसम्बन्धस्यैवानुमितौ भानात् तद्धीरवश्य हेतु , न व्यापकताधीमात्रम् । तथा सत्यनुमितौ साध्यसम्बन्धभाने नियमाभावेन सम्बन्धान्तरेण सामानाधिकरण्यज्ञाने सम्बन्धान्तरेण साध्यभानापातात् । न च यत्सम्बन्धेनाव्यभिचारग्रह , तत्सम्बन्धेनानुमितौ साध्यमानमिति वाच्यम् । सम्बन्धद्वयेनाव्यभिचारग्रहेऽपि सामानाधिकरण्यविषयीभूतसम्बन्धस्यैव भानादिति वदन्ति ।

तच्चिन्त्यम् । सम्बन्धद्वयेन सामानाधिकरण्यद्वयग्रहस्थले सम्बन्धद्वयस्याप्यनुमितौ भानापातात् । तत्र चेष्टापादने अव्यभिचारधीविषयसम्बन्धद्वयस्यापि भाने तन्नात्वस्य वक्तु शक्यत्वादिति सक्षेप ।

इति परामर्शवाद ।

अथ लिङ्गकरणतावादः ।

अनुमितौ च लिङ्गपरामर्श करण , न तु परामृश्यमानलिङ्गम् । न च परामर्शमात्र न हेतु , किन्तु लिङ्गपरामर्श एव । तथा च विशिष्टकारणताग्राहकस्य विशेषणेऽपि कारणताग्राहकत्वम् । कथमन्यथा दण्डसयोगहेतुतासिद्धिरिति वाच्यम् । तत्र हि दण्ड विना सयोगासत्त्वादुभयोरपि विनिगमनाविरहाद्धेतुत्वमुपपद्यते । ज्ञानविद्यमानता न विषयविद्यमानतानियता , येनात्रापि तथा सम्भाव्येत । अतीतादिलिङ्गज्ञानादप्यनुमिते । न च तत्रापि लिङ्गप्रसादिरपि व्याप्य एवेति स एव हेतु । तन्नाज्ञानात् । ज्ञातस्य च धूमस्यासत्त्वात् । अत एव धूमात्यन्ताभा-

वात्यन्ताभावत्वमेव त्रितयसाधारण व्याप्यतावच्छेदकमिति निरस्तम् । धूमत्वप्र
कारकज्ञानादनुमित्यनुत्पादापातात् । किञ्च, यत्र पर्वते धूमभ्रमाद् वह्निभ्रम , तत्र
व्याप्य किमपि नास्तीति कथ तस्यानुमितिहेतुता । तथा च तत्र परामर्शस्य हेतु-
त्वात् तत्सत्यत्वादेव प्रमानुमित्युपपत्तेर्न यत्किञ्चिद्व्याप्यस्य प्रमानुमितौ गुणत्वेनापि
हेतुत्वकल्पनम् । किं बहुना, यत्र भाविसृष्ट्यभाव सर्वमुक्त्यानुमीयते, तत्र
भाविव्यातिरिक्तव्याप्याभावेनानुमितिर्न प्रमा स्यादिति लिङ्गकरणतापक्षो न क्षोदक्षम
इत्युपेक्ष्यते । नन्वनुमितौ परामर्शश्चरमकारणतया नियतापार इति न करण,
करणान्तर च नास्त्येवेति कथमनुमान प्रमाणमिति चेद्, न । व्याप्तिज्ञानस्य
परामर्शव्यापारकस्यानुमितिकरणत्वादिति मणिकृत ।

अत्र वदन्ति — पर्वतवृत्तिधूमे वह्निव्याप्तिरिति परामर्शे व्याप्तिविशेष्यके
व्याप्तिज्ञान न हेतुरिति तज्जन्यानुमितौ व्याप्तिज्ञानस्य व्यभिचार । किञ्च, विश
कलितव्यभिचाराभावसहचारदर्शनयो मत्त्वे पर्वतीयधूमे वह्निसामानाधिकरण्य
वह्नौ धूमसमानाधिकरणभावाप्रतियोगित्व च विशेष्ये विशेषणमिति न्यायेन यत्र
गृहीत्वा परामर्श उत्पद्यते, तत्र परामर्शपूर्वं व्याप्तिज्ञान नेति व्यभिचार । अपि
च, स्मृतिरूपपरामर्शादनुमितौ व्याप्तिज्ञान व्यवहितत्वान्न हेतु , सस्कारस्यानुमि-
त्यहेतुतया तद्द्वाराव्यवधानस्यासम्भवात् । किं बहुना, व्याप्तिज्ञानहेतुत्व एव मा
नाभाव , परामर्श एव जनकत्वादन्यथासिद्धे । न चानुमिते सकरणत्वानुरोधात्
तद्धीहेतुताकल्पनम् । पक्षधर्मताज्ञानादेरेव करणादनुमित्युपपत्तेरिति ।

अत्राहु — व्याप्तिपक्षधर्मतादे सर्वस्यापि ज्ञानमनुमितौ करणम् । तच्च न
प्रत्येकम्, अननुगमात् । किन्तु, परामर्शजनकज्ञानत्वेन । तथा च यदेव यत्र परामर्श
जनकीभूत ज्ञान, तदेव तत्र करणमिति न व्यभिचार । न चानेन रूपेण हेतुत्वेऽन्य
प्रतीत्यन्यथासिद्धिरिति वाच्यम् । अन्यमित्यस्य व्यापारान्यमित्यर्थस्य बहुशो निवे
दितत्वात् । अन्यथा दण्डत्वस्य हस्तादिसाधारण(स्य?)चक्रभ्रमिजनकत्वातिरिक्तस्य
निर्वक्तुमशक्यतया तत्राप्यन्यथासिद्ध्यापत्ते । यत्तु — तत्रापि चक्रभ्रमिजनकता
येन रूपण, तेनैव घटजनकताप्यस्तु । सा च न चक्रभ्रमिजनकत्वेन, आत्माश्र
यादित्यन्यदेव तज्जनकतावच्छेदकमङ्गीकार्यमित्यमित्यत्र व्यापारान्यत्वार्थत्वे मा-
नाभाव इति । तत्र । भ्रमिं प्रत्यननुगतरूपेण विशेषतो हेतुत्वेऽपि घटत्वावच्छि-
न्नकार्यं प्रति भ्रमिजनकत्वेनानुगमे दोषाभावात् । न च स्मृतिरूपपरामर्शस्थले किं

ज्ञान करणमिति वाच्यम्। पूर्वानुभवस्येव तत्र करणत्वात्। न च संस्कारव्यवहित स इति वाच्यम्। संस्कारद्वारा परामर्शं प्रति परामर्शद्वारा चानुमितिं प्रत्यव्यवधानात्। अस्तु वा परामर्शजनकत्वेनैव हेतुता, न तु ज्ञानत्वान्तर्भाव। तथा च संस्कार एव तत्र कारणम्। न च तज्जन्यत्वे स्मृतित्वापत्ति। तत्त्वेन जन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्। अन्यथा तद्ध्वंसेऽतिप्रसङ्गात्। न चैव परामर्शजनकस्य कालादेरपि करणत्वापात। इष्टत्वात्।

केचित तु — व्याप्तिज्ञानत्वेन लाघवात् करणत्वे निश्चिते व्याप्तिविशेष्यक परामर्शादेर्नानुमितिरित्येव कल्प्यत इति वदन्ति। तच्चिन्त्यम्। पक्षधर्मताज्ञानत्वादिनापि करणत्वे लाघवतात्पर्यात्। तस्माद् विनिगमनाविरहात् सर्वेषा करणत्वमिति युक्तक्रमेणैवानुगम इति तत्त्वम्। अत एवानुमिते क्रियात्वेन करणजन्यत्वानुमाने लाघवान्मन करणत्व विषय इति परामर्शव्यापारक मनस्तत्र करणमित्युपाध्याय मतमपास्तम्। करणजन्यत्वानुमाने लाघवात् कालकरणत्वस्यैव विषयत्वापातात्। मनसामनेकत्वात् तदपेक्षया कालस्यैकत्वेन लघुत्वात्। एव दिक्करणत्वेऽपि लाघवम्। तस्माद् विनिगमनाविरहात् सर्वेषामपि करणत्वमिति।

मिश्रास्तु — मन करणत्वे मानसत्वापत्ति। मानसत्वे मानान्तरासहकृत मनोजन्यत्वस्य तन्त्रत्वात्। न च सन्निकृष्टमनोजन्यत्व तत्र प्रयोजक, तच्च नेहेति वाच्यम्। परामर्शस्यैवात्र ज्ञानरूपसन्निकर्षत्वान्मानसत्वस्य दुर्वारत्वादित्याहु। तत् तु न सम्यक्। वह्निमनुमिनोमि न साक्षात्करोमीति प्रतीत्या साक्षात्त्वाभावस्य निर्णयात् परामर्शस्यासत्तित्वाकल्पनात् सन्निकृष्टमनोजन्यत्वाभावेन मानसत्वाभावादिति।

ननु परामर्श एवानुमितौ करणमस्तु। न च तस्य व्यापाराभाव। विषयपरिशोधकतर्कस्येव तद्व्यापारत्वात्। न च तर्के परामर्शजन्य इति न तद्व्यापार इति वाच्यम्। यदि निर्वह्नि स्यान्निर्धूम स्यादित्याकारस्य तस्य धूमाभावापादनरूपस्य व्यावसिकधूमवत्त्वज्ञानजन्यतया तादृशतर्कस्य परामर्शजन्यत्वावश्यकत्वादिति चेद्, न। येन रूपेण कारणता, तेन रूपेण व्यापारस्य वाच्यत्वात्। कारणतायाश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन विवक्षितत्वात्। तर्कस्य च धूमवत्त्वज्ञानमात्रजन्यत्वात्। किञ्च, तर्क शङ्कानिधूननद्वारोपयोगी। शङ्का च न सर्व-

त्रेति नानुमितौ तस्य नियतपूर्वसत्तारूपहेतुतेति न परामर्शव्यापारत्वमिति तत्त्वम् ।

केचित् तु—विषयपरिशोधकतर्कस्यानुपयोग एव । क्व व्यापारता । न च विरोधिशङ्कानिवर्तकतया तदुपयोगी । ग्राह्यसंशयस्याविरोधित्वात् । विरोधित्वे वा परामर्शरूपविशेषदर्शनाच्छङ्काया एवाभाव , येन तन्निवृत्त्यर्थं तर्कान्तरापेक्षा स्यादिति वदन्ति ।

अत्र प्राच्य —विरोधिजिज्ञासानिवृत्त्यर्थं तर्कोऽपेक्ष्यते, तस्यास्त्वनिष्टप्रसङ्गात्मकतर्कना(व')श्यत्वात् । न च विरोधिजिज्ञासाया. प्रतिबन्धकत्वे मानाभाव । कामिनीजिज्ञासादिप्रतिबन्धकत्वानुरोधेन तदावश्यकत्वादित्याहु । तच्चिन्त्यम् । कामिनीजिज्ञासावह्न्यभावजिज्ञासासाधारणस्य विरोधिजिज्ञासात्वस्यैकस्य ब्रह्मणापि निर्वक्तुमशक्यत्वात् । तस्मात् कामिन्यादिजिज्ञासाया फलबलेन तद्रूपेण प्रतिबन्धकत्वेऽपि साध्याभावजिज्ञासाया प्रतिबन्धकत्वे मानाभावादिति ।

मिश्रास्तु—शङ्का द्विविधा स्वरसवाहिनी आहिता च । तत्राद्याया अप्रतिबन्धकत्वेऽपि चरमायास्तथात्वमस्त्येव । अत प्रकृतेऽपि साध्याभावसाधकनिबन्धना साध्याभावशङ्कानिष्टमुपनयता तर्केण निवर्त्यते । साध्याभावसाधक किमपि नास्तीति तर्कावतारेण निर्णयाद्, आधायकशङ्कानिरहे सत्याहितशङ्कानुत्पत्त्या चानुमानोपपत्तेरित्याहु ।

अत्र कश्चित्—विरोधिनिर्णयत्वेनैव प्रतिबन्धकत्वात् स्वारसिकी अन्याहिता वा शङ्का न प्रतिबन्धिकेत्याह । तदसत् । एव सत्युपाध्यादिसन्देहाहितव्यभिचारादिसन्देहस्य प्रतिबन्धकत्वाभावप्रसङ्गात् । तथा चान्याहितशङ्का प्रतिबन्धिकैवेति दिक् ॥

इति लिङ्गकरणतावाद ।

अथ केवलान्वयिवादः ।

लिङ्ग च त्रिविध केवलान्वयिसाध्यक केवलव्यतिरेक्यन्वयव्यतिरेकि चेति । तत्राद्य यथा घट प्रमेयो द्रव्यत्वादिति । अत्र केवलमन्वयसहचारे-

णैव व्याप्तिग्रहः । साध्यव्यतिरेकाप्रसिद्धया व्यतिरेकसहचारासम्भवात् । विचारप्रयोजकसंशयोऽपि मेयत्वं घटनिष्ठाभावप्रतियोगि न वेत्येव, साध्यसिद्धिनिवर्त्यसंशयस्यैव तत्प्रयोजकत्वात् । ननु किमिदं केवलान्वयित्वम् । अत्यन्ताभा(व ! वा)प्रतियोगित्वमिति चेद्, न । संयोगाभावाकाशाभावादावव्याप्तेः । तस्यापि संयोगादिरूपात्यन्ताभावप्रतियोगित्वाद्, अभावाभावस्य भा(वा ! वत्वा)दिति ।

अत्र कश्चिद् — अभावाभावो न प्रतियोगिरूपः । तथा सति घटवति भूतले घटान्योन्याभावबुद्धिर्न स्यात्, तदभावात्मकस्य प्रतियोगिनः सत्त्वात् । तस्मादभावाभावाभिन्न एव । स च संयोगाभावादेर्नास्तीति नाव्याप्तिरित्याह । तन्न । अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वाद्, अन्योन्याभावानावस्य प्रतियोगितावच्छेदकधर्मरूपत्वात्, तेनैव सह तस्य विरोधाद्, अभावप्रतियोगिकपृथगभावकल्पनायां गौरवादनवस्थाप्रसङ्गाच्चेति प्राञ्चः ।

अत्र पक्षधरमिश्राः — अत्यन्ताभावाभावो न प्रतियोगिमात्रम् । तथा सति संयोगेन घटसत्त्वे समवायेनापि तदभावस्यासत्त्वप्रसङ्गात् । प्रतियोगिनो विरोधिनः सत्त्वात् । न च तत्र मास्तु समवायारोप्यकघटाभाव इति वाच्यम् । तथा सति समवायेन घटो नास्तीति प्रतीतिविरोधात् । तथा चारोप्यसम्बन्धावच्छिन्नप्रतियोग्येवाभावाभावो वाच्य इत्यावश्यकत्वादागोप्यसम्बन्ध एवाभावाभावोऽस्त्विति वदन्ति ।

तत्र नव्याः — अभावाभावस्यारोप्यसम्बन्धरूपत्वे रूपसमवायवति वायौ रूपाभावो न स्यात् । समवायरूपस्याभावाभावस्य सत्त्वादिति दूषणमाहुः । तदभव्यम् । विशेषणतावच्छेदकविशिष्टसमवायस्य तत्रारोप्यसम्बन्धत्वात्, तस्य च तदाभावेन रूपाभावसत्त्वाविरोधादिति ।

इदं तु विचार्यते — सम्बन्धमात्रमपि नाभावाभाव । केवलभूतले भूतसंयुक्ते सति द्रव्यभावो न स्यात् । आगोप्यभूतसंयोगस्य सत्त्वात् । तथा च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकारोप्यसम्बन्धो वाच्यः । तथा च विनिगमनाविरहेणारोप्यसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्न एवाभावाभावोऽस्तु । न चान्योन्याभावाभावत्वं तादात्म्यरूपागोप्यसम्बन्धस्य भूतसंयुक्तेऽस्त्यन्यत्रापि नास्तीति वाच्यम् । तत्रापि नाद्या स्यादवच्छिन्नप्रतियोगिन एव [illegible] । विशेष्यसम्बन्धस्य विशेषणिताश्रयत्व . न तु प्रतियोगितावच्छेदक-

प्रदेशोऽपि। अन्यथा समवायावच्छिन्नाकाशाभावाभावस्याकाशसमवायस्य समवायावच्छिन्नाकाशस्य वाप्रसिद्ध्यापत्तेः। किं च, यो यदभाव न तदभाव इति व्याप्त्या प्रतियोग्यसमानाधिकरणाभाव, न त्वारोप्यसम्बन्ध। प्रतियोगिनश्चारोप्यसम्बन्धेन (सह?) अभावविरोध इत्येकसम्बन्धेन प्रतियोगिसत्त्वे तदन्यसम्बन्धेन तदभावो न विरुद्ध। तस्मादभावाभाव प्रतियोग्येवेति संयोगाभावाकाशाभावादेरपि संयोगाकाशादिस्वाभावप्रतियोगि सदत्यन्ताभावाप्रतियोगित्व केवलान्वयिलक्षणमनुपपन्नमिति।

अत्र मणिकृत — वृत्तिमदत्यन्ताभावाप्रतियोगित्व केवलान्वयित्वम्। आकाशश्च न वृत्तिमानिति नाकाशाभावाव्याप्तिरित्याहु। नन्विदमनुपपन्नम्। वृत्तिमत्त्वे दत्तेऽप्याकाशाभावाव्याप्तिस्तदवस्था। इदानींमाकाश इति प्रतीत्याकाशस्याप्रि वृत्तिमत्त्वात् संयोगेनाकाशस्य मूलत्वादिवृत्तित्वाच्च। एव संयोगाभावेऽप्यव्याप्ति, संयोगत्वाभाव प्रतियोगित्वात्, संयोगस्य च वृत्तिमत्त्वादिति चेद्, न। स्ववृत्तिविरोधिवृत्तेरेव वृत्तित्वेन विवक्षितत्वात्। भवति च स्वरूपसम्बन्धावच्छिन्नाकाशवृत्ति समवायावच्छिन्नाकाशाभावाविरोधिनीति विशिष्टाभावसत्त्वान्नाव्याप्ति। अत एव संयोगाभावेऽपि नाव्याप्ति, संयोगवृत्ते संयोगाभाववृत्त्यविरोधित्वात्। न चैव वृत्तिमत्त्वमव्याप्तिवारकतया भागासिद्धिवारकत्वाद् व्यर्थम्। विशिष्टाभावतया सार्थक्यादित्येके। अव्याप्तिवारकत्वापि व्यवहारे साध्येऽप्रसिद्धिवारकतया व्याप्तिग्रहोपयोगित्वादित्यन्ये। वस्तुतोऽत्यन्ताभावाप्रतियोगित्वापेक्षया वृत्तिमदत्यन्ताभावाप्रतियोगित्वमधिकदेशवृत्तीति प्रमाविषयत्ववद् विशेषणत्वान्न व्यर्थतेति प्रत्यक्षमणिसारे विवेचितम्।

सिद्धान्तु — वृत्तिमदिति विशेषण नाव्याप्तिवारक, किन्त्वप्रसिद्धिवारकम्। तथाहि — मेयत्वादेरपि समवायसम्बन्धेनाप्यकाल्यन्ताभावप्रतियोगित्वसत्त्वादत्यन्ताभावाप्रतियोगिनोऽप्रसिद्धिरेव। न च मेयत्वस्य सर्वत्र सत्त्वात् कथ तदत्यन्ताभाव इति वाच्यम्। समवायसम्बन्धेन तस्य काल्यसत्त्वात्। तेन सम्बन्धेन तदभावस्य सर्वत्र सत्त्वात्। प्रतियोग्यवृत्तिसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वात्। न चैव व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमापत्ति। प्रतियोगितावच्छेदकसामानाधिकरण्यात्। आरोप्यसम्बन्धत्वाङ्गीकारे बाधकाभावात्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनोऽप्रसिद्धतया ज्ञानासम्भवेन व्याप्ति

रणधर्मावच्छिन्नाभावानङ्गीकार । इह त्वारोप्यसम्बन्धस्य न ज्ञानमपेक्षित, येन व्यधिकरणसम्बन्धावच्छिन्नाभावोऽपि न स्यात् । समर्गस्य सर्वत्रप्रसिद्धत्वेनाग्रेप्यत्वादिति वदन्ति ।

अत्र शङ्कयते — आकाशसमवायस्याप्रसिद्धस्य कथमारोप । भूतलादौ च घटादिसयोगोऽत्र प्रसिद्ध एवारोप्यते । निराधारोऽत्रमारोप । स चाधिकरण साध्य । न चेच्छात्मक तदज्ञाते सम्भवतीति न समवायसम्बन्धावच्छिन्नाकाशाधारोप इति ।

अत्र प्रतिभाति — घटसंयोगमात्रं नारोपविषय , किन्तु भूतले घटसयोग । स च पूर्वप्रसिद्ध एव । अप्रसिद्धावपि तस्यारोपे प्रमाणा वा क्वापि नापेक्षा । संसर्गप्रसिद्धेरनङ्गत्वात् । न च ससर्गप्रसिद्धेरनङ्गत्वेऽप्याकाशसमवायस्याप्रसिद्धस्य कथमारोप इति वाच्यम् । आकाशस्यैव समवायलक्षणसम्बन्धेनारोप्यत्वात् । आकाशस्य समवायस्य च सत्त्वेनाप्रसिद्धत्वाभावात् । अत एव निराधेत्यपि त, ससर्गज्ञानस्येच्छाया तन्त्रत्वाभावात् । अन्यथा सुखत्वप्रकारकज्ञानानन्तरं मम सुखमस्त्वितीच्छा न स्यात्, सुखसमवायस्य पूर्वमज्ञानादिति । वस्तुतोऽन्योन्याभावप्रतियोगितानवच्छेदकत्व केवलान्वयित्वम् । घटावच्छिन्नान्योन्याभावनिरूपितत्व घटावच्छिन्नान्योन्याभावाभावादिति न व्याप्यवासिद्धिरिति तत्त्वम् ।

वय तु — एकत्रतीयसम्बन्धेन सर्ववृत्तित्व केवलान्वयित्वम् । अस्ति च प्रमेयत्वादेस्तथात्व, स्वरूपसम्बन्धेन जगद्वृत्तित्वात् । घटादस्तु न तथात्व, क्वचित् संयोगेन क्वचित् समवायेन क्वचित् स्वरूपसम्बन्धेन वृत्तेः । न चैव घटाभावस्यापि जगद्वृत्तित्वात् केवलान्वयित्वापत्ति । कपालादावपि सम्बन्धान्तरेण तदभावनियमादिति वाच्यम् । घटाभावत्वादिना केवलान्वयित्वस्येष्टत्वात् । सयोगावच्छिन्नघटाभावत्वादिना त्वतथात्व, भूतलादाववृत्तेरिति ब्रूम ।

ननु प्रमेयत्वं कथं केवलान्वयि, प्रमाविषयत्वरूपस्य तस्य प्रमानद्विषयत्वयोरननुगमेनाननुगतत्वादिति चेद्, न । प्रमात्वेनोपस्थिता प्रमाव्यक्तयन्तर्द्विषयत्वानुगमिका इति प्राञ्च ।

तत्र शङ्कयते — प्रमात्वमपि यद्यद्धर्मत्वेनाननुगत कथ प्रमाव्यक्त्यनुगमक मस्तु । किञ्च, विशेष्यतावच्छेदक यद्येक तदा पर विशेषणानुगमेनानुगमस्वीकार । अन्यथा देवदत्तयज्ञदत्तौ छत्रिणौ इत्यत्रापि छत्रित्वेनोभयानुगमप्रसङ्गात् । तथा च विषयत्वानुगम कथ प्रमात्वानुगतप्रमयेति ।

काले व्यतिरेकित्वप्रसङ्गः । न चेष्टापत्तिः । तदा तस्य केवलव्यतिरेकित्वादेवेति वाच्यम् । केवलान्वयिसाध्यकत्वेन केवलान्वयितया तद्विरुद्धकेवलव्यतिरेकित्वायोगादिति ।

अत्र प्रतिभाति — केवलान्वयिभिन्नत्वे सति केवलव्यतिरेकसहचारग्राह्यव्याप्तिकत्वं यस्य यदा, स तदा केवलव्यतिरेकी । संयोगाभावसाध्यकं च केवलान्वय्येवेति न तत्रातिप्रसङ्गः । न च केवलव्यतिरेकिभिन्नत्वे सति केवलान्वयिसाध्यकत्वमेव केवलान्वयित्वमस्त्विति संयोगाभावसाध्यकः केवलव्यतिरेक्येवास्त्विति वाच्यम् । अन्वयसहचारमात्रेण व्याप्तिग्रहदशायां तस्य तदा केवलव्यतिरेकसहचारमात्रग्राह्यव्याप्तिकत्वाभावेन केवलव्यतिरेकित्वासम्भवेन केवलान्वयित्वस्यावश्यं वाच्यतया केवलव्यतिरेकिभिन्नत्वघटितलक्षणायोगादव्याप्तिः । अन्योन्याभावस्य तद्घटत्वभावात् । न च तदातनकेवलव्यतिरेकिभिन्नत्वमर्थः । तच्चान्वयसहचारमात्रग्राह्यव्याप्तिकतादशायामस्त्येवेति नाव्याप्तिरिति वाच्यम् । एतदपेक्षया केवलान्वयिभिन्नत्वस्यैव लघुतया व्यतिरेकिलक्षणे प्रवेशौचित्यात् । तदातनत्वस्य तत्राप्रवेशात् । एवं सति केवलान्वयित्वकेवलव्यतिरेकित्वयोर्न सङ्करशङ्कापीति युक्तमुत्पश्यामः ।

अन्वयव्यतिरेकित्वं तु अन्वयव्यतिरेकोभयसहचारग्राह्यव्याप्तिकत्वमिति सर्वं । तदपि चिन्त्यते — प्रत्येकमन्वयो व्यतिरेकश्च यत्र व्याप्तिग्राहकस्तत्त्वमित्यर्थो वा मिलितौ यत्र तद्ग्राहकावित्यर्थो वाभिमतः । नाद्यः । केवलान्वयिनि केवलव्यतिरेकिणि चातिव्याप्तेः । नान्त्यः । वह्निसाध्यकेऽन्वयसहचारमात्रेण व्याप्तिग्रहदशायां तुरीयतापत्तेः । केवलान्वयित्वस्य केवलव्यतिरेकित्वस्य वा लक्षणाभावादिति ।

अत्र ब्रूमः — केवलान्वयिभिन्नत्वे सति केवलव्यतिरे(कि ? क)सहचाराग्राह्यव्याप्तिकत्वदशावर्तित्वमन्वयव्यतिरेकित्वम् । इदं लक्षणं च केवलमन्वयसहचारेण सहचाराभ्यां (वा) व्याप्तिग्रहदशायामस्तीति न कोऽपि दोषः ।

इदं त्ववधेयं — केवलव्यतिरेकित्वान्वयव्यतिरेकित्वयोः कालभेदेन सङ्करोऽस्त्येव । केवलान्वयित्वस्य केनापि सङ्करो नेति दिक् ।

ननु व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेनानुमितौ हेतुत्वाद् व्यतिरेकिस्थले व्याप्तिपक्षधर्मताज्ञानयोः व्यतिरेकान्वयविषयकत्वेन भिन्नविषयकत्वनियमात् कथ-

मनुमितिरिति चेत्, न। व्यतिरेकसहचारेणान्वय व्याप्तिग्रहात् व्याप्तिविशिष्ट पक्षधर्मताधीसम्भवात्। न चायमहचारो कथम व्यभिचारीति वाच्यम्। प्रतियोग्यनुयोगिभावस्य नियामक वाद्। यद्वा, व्यतिरेकसहचारात् व्यतिरेक-व्याप्तिधीरेव। न चैव पक्षधर्मताभावादनुमित्यनुदयापात्। व्याप्तिज्ञानस्यानुमिति त्वावच्छेदेन हेतुवाद् अन्यथानुमितौ पक्षधर्मस्य व्याप्तिनुमिता सामानाधि व्याप्यत्वाभावप्रतियोगिज्ञानस्य विशेषणमावश्यकमित्यादिति मणिकृत्।

अत्र वदन्ति — व्यतिरेकसहचारात्-अन्वयव्याप्तिधी कथम्, अधिकरणा वसन्निकर्षात्। न च यत्राधिकरणादिसन्निकर्षस्तत्र प्रथम पक्ष, अन्यत्र तु द्वितीय पक्ष इति वाच्यम्। तथाप्यन्वयसहचारव्यतिरेकसहचारयोरननुगमाद् व्याप्ति(ता)ग्राहकत्वानुपपत्ति। किञ्च, यत्र सहचाराभ्यां मिलित्वा व्याप्तिग्रहस्तत्र प्रत्येकसहचारधीजन्यव्याप्तिधियोर्दुरवस्थ्य वाच्यम्। तच्च विषयदृत नेति जातिर्वा वाच्यम्। तच्च चानुपपादितत्वा सङ्गरादसम्भवीति।

अत्राहु अन्वयव्यतिरेकसहचारयोर्न प्रत्येक प्रयोजकता, येनोक्तदोष प्रसज्येत। किन्तु यभिचारज्ञानविरोधिसहचारज्ञानत्वेनानुगतेनेति नाननुगमो न वा नातिसङ्करोऽपि। नह्येकदण्डजन्यघटापेक्षया दण्डद्वयजन्यघटस्य वैलक्षण्य मस्ति। तथा च सहचारद्वयधीजन्यव्याप्तिज्ञाने तथैवेति। यत् त्वत्र दूषण सह-चारज्ञाने विद्यमानेऽपि बह्वादौ धूमव्यभिचारज्ञानात् सहचारज्ञान तद्बुद्धिविरोधीति कथमुक्तक्रमेणानुगम इति। तत्र। स्वाधिकरणे व्यभिचारधीविरोधित्वस्य विवक्षि-तत्वादिति प्रागेवोक्तत्वात्। यथा चैव नातिप्रसङ्गस्तथा सहचारग्रन्थ एव व्युत्पा-दितम्। अत एव सहचारधीर्व्याप्तिग्रहे विशेषणज्ञानत्वेन हेतुरिति क्रमविशेष णीभूतव्यतिरेकसहचारस्यान्वयव्याप्तिग्राहकत्वमिति कस्यचित् प्रलपितमपास्तम्। विरुद्धस्थलीयव्याप्तिभ्रमानुरोधेन सहचारधीत्वेनापि हेतुत्वस्य प्राग् व्यवस्थाप नात्। न चैवमपि स्वसहचारज्ञानत्वेनैव हेतुत्वेऽपि स्वव्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभाव इति वाच्यम्। स्वसहचारज्ञानस्यैव व्यभिचारज्ञानाविरोधिसह चारज्ञानत्वेन सामान्येन हेतुत्वात्। न च तस्य सामान्यत्वेऽपि स्वसहचारज्ञान-त्वस्य विशेष्यस्य लघुशरीरत्वमिति वाच्यम्। तथा सति प्रमेयत्वादिना स्वसह-चारज्ञानेऽपि व्याप्तिग्रहप्रसङ्गात्। तस्माद् व्यभिचारज्ञानविरोधिसहचारज्ञान हेतु र्वाच्य। तथा च व्यतिरेकसहचारस्यान्वयव्याप्तिग्राहकत्वमपनेनीयमिति दिक्।

द्वितीयपक्षे तु शङ्कचते — विशेषसामग्रीद्वयकल्पने मानाभाव । व्यतिरेकसहचारेण व्यतिरेकव्याप्तिग्रहपक्षेऽपि व्यतिरेकिण्यंशे परामर्शस्यैव हेतुत्वसम्भवात् । हेतुनिष्ठव्यभिचारज्ञानविरोधिव्याप्तिवैशिष्ट्यविषयकपक्षधर्मताज्ञानस्यैव परामर्शत्वात् तस्य च सर्वानुमितिसाधारण्यादिति ।

अत्र मिश्राः — अन्वय्यनुमितौ व्यापकतावच्छेदकप्रकारकत्वस्य व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारकत्वस्य चानुभवसिद्धकार्यवैलक्षण्यस्यान्यथानुपपत्त्या विशेषसामग्रीद्वयमवश्यं कल्प्यमेव । अन्यथा कार्यवैजात्यमाकस्मिकं स्यात् । तथा च तत्र एवातिप्रसङ्गभङ्गे सामान्यसामग्र्यनुगमे मानाभाव । अत एव टीकादौ सर्वत्र नेदं निरात्मकं जीवच्छरीरमिति व्यतिरेकमुखेनैव व्यतिरेकमुपदर्शनमित्याहुः ।

तत्रेदं विचार्यते — एवं सत्यन्वय्यतिरेकिणि व्यापकतावच्छेदकप्रकारिका व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारिका चैकानुमितिः स्यात् । तथा चानुभवविरोधः । न च व्यतिरेकसहचारात् तत्रान्वयव्याप्तिर्धीरेव, तत्सामग्रीभूतापिकरणसन्निकर्षसत्त्वादिति तत्र व्यापकतावच्छेदकवह्नित्वादिप्रकारिकैवानुमितिः, न वह्न्यभावाभावत्वादिप्रकारिकेति वाच्यम् । व्यतिरेकसहचारस्यान्वयव्यतिरेकोभयव्याप्तिग्रहं प्रति कस्यकारणभावत्वेनेतरसामग्रीसमवधाने सत्युभयव्याप्तिग्राहकत्वाविरोधादिति । न चान्वयव्यतिरेकिणि परस्परविरोधेनानुमितिरेव नोभयव्याप्तिग्रहदशायामिति वाच्यम् । अनुभवविरोधादिति ।

अत्र ब्रूमः — उभयव्याप्तिग्रहदशायामपि वह्निमानित्याकारानुमितेरेवोत्पत्त्या लाघवेन वह्नित्वप्रकारकानुमितेरेव निश्चयेन तत्सामग्र्या वह्न्यभावाभावत्वप्रकारकानुमितिप्रतिबन्धकत्वं कल्प्यते । प्रतिबन्धकताया मण्यादिवत् प्रतिबन्धककल्प्यत्वात् । यत्तत्र नव्यैर्दूषणमुक्तं — प्रतिज्ञानुमित्योः समानाकारतयेतरभेदाभावाभावत्वप्रकारकानुमितिसमानाकारा इतरभेदाभावाभावती पृथिवीति प्रतिज्ञा स्यान्न त्वितरभेदवतीति । तदज्ञानात् । व्यतिरेकसहचारादन्वयव्याप्तिग्रहपक्षे इतरभेदवतीत्याकारानुविरोधात् । व्यतिरेकव्याप्तिग्रहपक्षे तु नेदं निरात्मकं जीवच्छरीरमित्येव प्रतिज्ञाकारादिति । यत्तु — व्यतिरेकस्थले व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारकानुमितिर्नोच्यैव । अन्यथा यत्र क्रमेण प्रमेयत्वादिव्यतिरेकग्रहाद् व्यतिरेकसहचारज्ञानं, तेन व्यतिरेकव्याप्तिग्रहः, तत्र प्रमेयत्वप्रकारकानु

मिति स्यात् । न चेष्टापत्ति । जनकीभूतव्याप्तिज्ञानस्य भ्रमत्वेन प्रमानुमित्यभ्भवादित्यनुमितिभ्रमत्वनिर्वाहाय प्रमेयत्वाभावाभाव वप्रकारक मनुमितेरङ्गीकार्य मेवेति । तत्तु न । वह्निमति भूयोदर्शने भ्रमभ्रमेण वह्न्यनुमितेर्विषयबाधेन प्रमा त्वमत प्रमेयत्वप्रकारकानुमितेरपि प्रमात्वे बाधकाभावादिति न सिध्येत् ।

इद तु शङ्कयते—व्यतिरेकिणि साध्याभावव्यापकाभावप्रतियोगित्व न नियामकम्। सयोगेन रूपानुमानापातात्, रूपाभावव्यापकसयोगाभावप्रतियोगित्वात् सयोगस्य । सयोगाभावस्य केवलान्वयितया सर्वव्यापकत्वात् । एव द्रव्यत्वेन सयोगानुमान न स्यात् । सयोगाभावाव्यापकत्वाद् द्रव्यत्वाभावस्येति ।

अत्राहु —प्रतियोगिविरुद्धसाध्याभावव्यापकप्रतियोगिविरुद्धाभावप्रतियोगित्व नियामकम् । तथा चाद्याभावविशेषणादव्याप्तेर्द्वितीयाभावविशेषणादतिव्याप्तेश्च निरास इति ।

अत्रेद चिन्त्यते — एव सत्यय सयोगविशेषाभावत्वात् विभागविशेषाभावत्वादित्यत्र व्यतिरेकव्याप्तिग्रहदशायामनुमितिर्न स्यात् । साध्याभावहेत्वभावयो सयोगविभागरूपयो प्रतियोगिविरुद्धत्वाभावादिति ।

अत्र कश्चित — तत्रानुमितिर्न भवत्येव, उक्तहे(तु)त्वसभवादिति । तत् तुच्छम् । निर्वचनासामर्थ्यमात्रेणवानुभवापलापस्य बाधग्रस्तत्वादिति ।

अत्र नूम — सयोगाभावसाध्यकस्य केवलान्वयितेन तत्र व्यतिरेकसहचारादन्वयव्याप्तिग्रह इत्येव वाच्यम् । तथा च तत्र परामर्श एव हेतु , न तूक्त, तस्य व्यतिरेकसाध्यकानुमितावेव हेतुत्वात् । यद्वा, यत्राव्याप्यवृत्तितानियता भावप्रतियोगि साध्य हेतुर्वा, तत्र प्रतियोगिविरुद्धत्व न विशेषणम् । अतिप्रसङ्गाल्लाघवाच्च । सकलसाधारणैकनियामकस्य ब्रह्मणापि वक्तुमशक्यत्वादिति ।

इद तु विचारणीय—किं वस्तुगत्या साध्याभावव्यापकत्वज्ञानमुपयोगि, उत साध्याभावत्वेन ज्ञायमानस्य व्यापकत्वज्ञान वा । नाद्य । यत्र पटादौ घटाभावत्वमारोप्य तद्व्यापकतया लोष्टत्वादि गृह्यते, तत्र लोष्टत्वाद्यभावेन घटानुमानापातात् । नान्त्य । अप्रसिद्धसाध्यकव्याप्ते, तत्र साध्याप्रसिद्ध्या तदभावत्वेन ज्ञानासम्भवात् । एव हेत्वभावेऽपि विकल्पनीयमिति ।

अत्रायं समाधिः — यद्रूपावच्छिन्नव्यापकतया यद्रूपावच्छिन्न ज्ञायते, तद्रूपावच्छिन्नाभावत्वप्रकारिका तद्रूपावच्छिन्नोपस्थितिकाभावज्ञानादनुमिति· । अस्ति चैतदप्रसिद्धसाध्यकेऽपि । अप्रामाण्यत्वेनोपस्थिताप्रामाण्यव्यापकताज्ञानात् तदभावत्वेनानुमितेरारोपस्थलेऽप्युक्तमत्स्येवेति न काचिदनुपपत्ति· । अधिकं च प्रत्यक्षमणिसारे सुव्यक्तमिति नेह तन्यते ।

इदं त्ववधेयं — व्यतिरेकिणि व्यतिरेकव्याप्तिग्रहपक्षे पक्षतावच्छेदकस्य हेतुत्वे दोष एव ना(स्ति ? स्तीति) पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यनुमानमविरुद्धम् । अन्वयव्याप्तिग्रहपक्षेऽपि नानुपपत्तिः । पृथिवीत्वमितरभेदव्याप्यमिति ज्ञानेऽपि पृथिवीविशेष्यकेतराविशेषणेतरभेदविशेषणकज्ञानस्योद्देश्यस्याभावेन पक्षतावच्छेदकहेत्वभेदनिबन्धनासिद्धसाधनानवकाशात् । अनुमितिसमानाकारासिद्धेरेव प्रतिबन्धकत्वात् । व्याप्तिबुद्धौ पृथिवीत्वस्य विशेष्यत्वात् । इतरभेदस्य सामानाधिकरण्यविशेषणतया भानाच्चानुमितिसमानाकारताविरहात् । अस्तु वा समानविषयसिद्धिमात्र प्रतिबन्धकम् । तथापि पृथिवीविशेष्यकेतरभेदविशेषणकसिद्धेरुद्देश्याया असिद्धत्वात् सिसाधयिषागर्भपक्षतामत्त्वमस्तीति नानुपपत्ति· । प्राच्यस्तु — गन्धवत्त्वमेव पक्षतावच्छेदक, न पृथिवीत्वमिति नोक्तदोष इत्याहु ।

ननु पृथिवी इतरेभ्यो भिद्यते इत्यादिव्यतिरेकिणि साध्यप्रसिद्धया पक्षतापटकसंशयसाध्यरूपविशेषणज्ञानान्वयव्यतिरेकान्यतरव्याप्तिज्ञानात्मकानुमितिप्रयोजकानामभावात् कथं सेति चेत् । अत्र काश्चिद् — इतराप्रतियोगिकभेदाभाव एव साध्यः । इतराप्रतियोगिकभेदस्य घटभेदस्याभावो घट एव प्रसिद्धः । स च पृथिवीत्वावच्छेदेन सिध्यन्नेक एव सिध्यतीति न तत्पृथिव्या स्वभेदाभावमादाय सिद्धसाधनम् । न चैवमुक्तो विशिष्टाभाव सिध्यतु, न त्वितरभेद इति वाच्यम् । भेदरूपविशेष्यवति विशिष्टाभावस्येतराप्रतियोगित्वरूपविशेषणाभावमादाय सिद्धचेतरभेदसिद्धिरिति । तन्न । एवमपि विशिष्टाभावत्वप्रकारिकानुमिति स्याद्, न त्वितरभेद(त्व)प्रकारिकेति ।

अत्र प्राच्य — पृथिव्यामेव साध्यप्रसिद्धिः । पृथिवी जलभिन्ना न वेत्यादित्रयोदशकोटिकैकसंशयेन तत्रा त्रयोदशभेदावगतेः । न चैव पृ० एव साध्यप्रसिद्धया सिद्धसाधनम् । निश्चयार्थं व्यतिरेकिप्रवृत्ते । अन्यथा पक्षे साध्यसन्देहस्य सर्वत्र सत्त्वेनानुमानमात्रविलोपापादित्याहु· ।

ब्रूते । अथायमाशय साध्यसाधनसामानाधिकरण्यमशय प्रतिबन्धक इति । तदपि न । ग्राह्यसशयस्याप्रतिबन्धकत्वात् ।

केचित् तु — विशिष्टज्ञाने विशेषणनिश्चयत्वेन हेतुता वाच्या । अन्यथा स्थाणुर्वा पुरुषो वेति सशयानन्तर स्थाणुत्वविशेषणज्ञानात् स्थाणुरिति निश्चयज्ञानापातात् । तथा च प्रतियोगिनोऽप्यभावविशेषणतया तन्निश्चय विना नाभावनिश्चय इति सशयरूपसाध्यप्रसिद्धिरकिञ्चित्करीति । तदप्यभद्रम् । सशयोत्तर स्थाणुरिति विशिष्टप्रत्यक्षे विशेषदर्शनस्य हेतुतया तदभावादेव तदनुत्पादात् । तत्सत्त्वे चेष्टापादनात् । किञ्चैव सशयानन्तर सशयो न स्यात् । निश्चयरूपविशेषणज्ञानाभावात् ।

गौडास्तु — पृथिव्या तदितरभेदसशये कथ व्यतिरेकिप्रवृत्ति , हेतो साध्याभावसामानाधिकरण्यात्मकव्यभिचारसशयात् । न चानुमानमात्रोच्छेदकतया हेतुर्मति साध्यसशयो न विरोधीति वाच्यम् । व्यापकाभाववत्तया निश्चिते व्याप्यसशयात्मकव्यभिचारसशयस्य सन्दिग्धानैकान्तिकतानुरोधेन प्रतिबन्धकत्वाङ्गीकारात् प्रकृतेऽपि पृथिवीत्वाभावरूपव्यापकाभाववत्तया निश्चयादितरभेदाभावरूपव्याप्यसशयस्यावश्य प्रतिबन्धकत्वात् । तथा च सशयरूपसाध्यप्रसिद्धिर्न तन्त्र, प्रत्युत विरोधिनीति वदन्ति । तदपि न भद्रम् । भवत्वेव, तथापि व्यतिरेक याप्तिर्मा गृह्यता, तत्रोक्तव्यभिचारसशयस्य प्रतिबन्धकत्वात् । आचार्यास्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रह वदन्तो नेव पर्यनुयोज्या, निरनुयोज्यानुयोगप्रसङ्गात् । तस्मान्मात्सर्यमुत्सार्य सम्यग् विचारणीयमेतत् सूरिभिरिति ।

मणिकृतस्तु — नेह साध्याप्रसिद्धि । घटादावेवेतरभेदस्य प्रत्यक्षसिद्धत्वात् । घटो न जलादिरिति प्रतीते । न चेतराकाशादेरयोग्यतया कथ तद्भेद प्रत्यक्ष इति वाच्यम् । अयोग्यप्रतियोगित्वेऽपि योग्यानुपलब्धिसत्त्वेन ग्रहणसम्भवात् । प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकानुपलब्धेरेव तत्त्वात् । तत्राधाराप्रि घटो यदि तत् स्यात्, तत्तयोपल(भे²भ्ये)तेत्यादिना सत्त्वात् । अत एव स्तम्भे पिशाचान्योन्याभाव प्रत्यक्ष । न चैव सिद्धसाधन, घटत्वादि पक्षतया तत्र साध्यस्य सिद्धत्वादिति वाच्यम् । एकदेशे साध्यसिद्धावपि सर्वा पृथिवीतरभिन्नेत्युद्देश्यप्रतीत्यभावेन सिद्धसाधनानवकाशात् । पक्षतावच्छेदकनानात्व एवाशात सिद्धसाधनात् । अत एवानित्ये गन्धवत्त्वे इत्यत्र अनित्या वागिति सिद्धेरुद्दे-

तथा सति घटेऽप्याकाशत्वसत्त्वगमनादिति योग्यव्यक्तिवृत्तिजातितयोपलम्भापादनं तस्य घटे कर्तुं शक्यत एवेति कथं तद्भेदो न प्रत्यक्षः। एवं घटे यदि विशेष-(त्वं?वत्त्वं) स्याद्, ऐन्द्रियकवृत्ति स्यात्। तथा च प्रत्यक्षं स्यात्। अतीन्द्रियमात्रवृत्तित्वेनैव तस्यायोग्यत्वादिति विशेषादिविरहोऽपि प्रत्यक्ष इति वदन्ति।

अत्र शङ्क्यते — यद्यापादितयोग्यतया उपलम्भापादनेनाभावः प्रत्यक्षः, तदा घटेऽणुपरिमाणाभावज्ञानापातः। अणुपरिमाणं यदि घटवृत्ति स्यात्, तदा योग्यवृत्तिपरिमाणत्वेन योग्यं स्यात्। तथा च गृह्येतेत्यापादनसम्भवादिति।

अत्र ब्रूमः — यदधिकरणे आपाद्यमानं तस्यायोग्यतां नापादयति, तत्र तदभावो योग्यानुपलब्धिर्ग्राह्यः। अणुपरिमाणं च घटे आपाद्यमानं तस्यायोग्यतामेवापादयति, अणुपरिमाणवत्त्वेनैवायोग्यत्वात्। पिशाचत्वाकाशत्वादिकं च जातिरूपतयापाद्यमानमधिकरणयोग्यतान्तर्भूतयोग्यतांकं न योग्याधिकरणे घटादावयोग्यतामापादयतीति तदत्यन्ताभावस्तद्वदन्योन्याभावो वा भवत्येव प्रत्यक्षः। अत एव यत्र प्रतियोग्यधिकरणयोरन्यतरस्मिन्नन्यतरसंसर्गं आपाद्यमानोऽन्यतरस्मिन् नायोग्यतामापादयति, तत्र तदधिकरणे तदभावः प्रत्यक्षो योग्यानुपलब्ध्या भवत्येवेति योग्यानुपलब्ध्यर्थः। अर्थान्तरस्य निर्वक्तुमशक्तेः। अत एव वायावुद्भूतरूपसंसर्ग आपाद्यमानस्तत्र योग्यतामेवापादयति, उद्भूतरूपवत्त्वेनैव बहिर्द्रव्यस्य योग्यतावत्त्वादिति तदभावः प्रत्यक्ष एव। अत एव च स्तम्भेऽपि पिशाचत्वसंसर्गं आपाद्यमानस्तत्र नायोग्यतामापादयति, व्यक्तियोग्यतायां जातियोग्यताया अतन्त्रत्वात्। प्रत्युत व्यक्तियोग्यतया तत्र पिशाचत्वस्यैव योग्यतापाद्यत इति तदत्यन्ताभावस्तद्वदन्योन्याभावो वा घटादौ प्रत्यक्ष इति किमधिकं पल्लवेनेति। यद्वा, आकाशत्वादिनाकाशभेदज्ञानाभावेऽपि पृथिवीतरत्वस्य पृथिव्यन्योन्याभाववत्त्वस्य योग्यतया तेन रूपेणोपलम्भापादनसम्भवात् तेन रूपेण भेदज्ञाने बाधकाभावः। येन रूपेण यत्र यदुपलम्भापादनं, तद्रूपावच्छिन्नतदभावस्य तत्र सामग्रीसत्त्वेन प्रत्यक्षत्वात्। अत एव घटो न रूपमित्यादिसर्वसाक्षिकः प्रत्ययः। अन्यथा रूपत्वावच्छिन्नाभावस्यातीन्द्रियप्रतियोगिकतया प्रत्यक्षत्वापातात्। तस्मादुक्तमेव नियामकमिति।

इदं तु ध्येयं — पृथिवी इतरभिन्नेत्यत्रेतरत्वेनाभावस्याप्युपस्थितेस्तदन्योन्याभावोऽपि साध्यः, न तु तेन सह स्वरूपभेदः। साध्यभेदे मानाभावात्। न

च पृथिवीतरत्व पृथिव्यन्योन्याभावस्वरूपम्। तच्च नाभावेऽस्ति। अभावप्रतियोगिसामानाधिकरण्योरनङ्गीकारादिति वाच्यम्। पृथिवीत्वासामानाधिकरण्यावच्छिन्नमेयत्वरूपभावाभावसाधारणाधिकरणतावच्छेदकावच्छिन्नस्याभावाधिकरणस्याप्यभावस्याङ्गीकारे बाधकाभावात्। किं बहुना, पृथिवीभिन्नसर्वविषयकबुद्धिविषयत्वरूपभावाभावसाधारणाधिकरणतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नतया जलादिपदभावस्याप्यन्योन्याभावसाधनमप्यूहमेव। युक्त चैतत्। अभावप्रतियोगिसोऽभावाधिकरणको वा नाभावोऽभ्युपेयत इत्यत्र वह्नेरप्रतियोगिनैव वह्न्यधिकरणेनैवोपपत्तेर्नातिरिक्तकल्पनमित्येव बीजम्। भावाभावसाधारणधर्मावच्छिन्नाभावप्रतियोगिकाभावाधिकरणकाभावातिरिक्ताभावस्यानङ्गीकारात्। अभावेन सह (स्व)रूपभेदस्य साध्यत्वादिति मणिकृद्वचन चाभावप्रतियोगिकाभावानङ्गीकारेऽपि नानुपपत्तिरित्यभिप्रायेणेति।

इद तु विचार्यते — पक्षतावच्छेदकभेद एवाश्रित सिद्धसाधनमिति यन्मणिकृतोक्त, तत्र मृष्यन्ते। पक्षतावच्छेदकभेदेऽपि यदि तत्सामानाधिकरण्यमात्रेण सिद्धि साध्यस्योद्देश्या, तदैकदेशे साध्यसिध्यानुमितिप्रतिबन्धादश्रित सिद्धसाधनं भवत्येव। पक्षतावच्छेदकभेदेऽपि यदि समूहालम्बनानुमितिरुद्देश्या, तदा अनुमितिरूपक्षतावच्छेदकावच्छेदेन साध्यसिद्धावप्युपपत्तेरिति नाश्रित सिद्धसाधनमित्यत सिद्धसाधने पक्षतावच्छेदकभेदो न तन्त्र, अन्ययव्यतिरेकव्यभिचारादिति।

अत्र मिश्रा — सिद्धसाधनिषयगर्भपक्षतामाश्रित्य नाय विचार, किन्तु सिद्धसाधनमादाय। तत्र च साधनसमानकालसिद्धे प्रतिबन्धकत्वात् तदभावविशिष्टेन हेतुनेति यावत्प्रकारकज्ञानीयत्वेनाभिमतत्वात् अत्र पक्षता नास्तीति तदंशेऽनुमितिप्रतिबन्धकत्वेन सिद्धसाधन पक्षतावच्छेदकभेदात् भवति। पक्षतावच्छेदकभेदे तु पक्षतैक्यभेदयोरेऽपि पृथिवी वह्निमत्त्वसिद्ध्यभावात् पक्षता न क्षतेति नाश्रित सिद्धसाधनमिति वदन्ति। वस्तुतस्तु — पृथिवीत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे साध्याश्रयत्वादेव ज्ञातया सिद्धसाधनमेव, उद्देश्यसिद्धेः। अथ पृथिवी वह्निमत्त्वेन साध्यसिद्धिरुद्देश्या, तदा तदसिद्ध्या नाश्रित सिद्धसाधनमिति पक्षतावच्छेदकभेदे समयधाप्यस्य सिद्धसाधन नास्त्येव। यत्र तु पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरुद्देश्या, तत्रापि पक्षता-

वच्छेदकनानात्वे एकपक्षतावच्छेदकावच्छेदेन सिद्ध्यापरपक्षतावच्छेदकावच्छेदेनासिद्ध्या भवत्यंशतः सिद्धसाधनमिति पक्षतावच्छेदकनानात्वं तत्र तन्त्रमुक्तं, पक्षतावच्छेदकैक्ये सति सिद्धसाधनादेवेति दिक् ।

यच्चोक्तं मणिकृता — घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वेनेतरभेदसंशयो भविष्यतीति, तत् समानप्रकारकत्वेनैव संशयनिश्चययोः प्रतिबन्धकत्वमभिप्रेत्य। अत एव धूमवत्त्वेन वह्निमत्त्वनिश्चयेऽपि पर्वतत्वेन वह्निसंशय उदाहृतः। यद्यप्येवं सति घटत्वेन निश्चयानन्तर प्रमेयघटोऽस्ति न वेति संशयापातः, एवं भूतले घट इति ज्ञानानन्तर घटवद् भूतलं न वेति संशयापातः, निश्चयस्य भिन्नप्रकारकत्वेनाप्रतिबन्धकत्वात्। तथा च समानविषयकत्वेन प्रतिबन्धकता वाच्या। तथा च पृथिवीत्वेनापि घटे कथमितरभेदसंशयः, घटत्वेन रूपेण तन्निश्चयसत्त्वादिति। तथापि समानविषयकत्वेनापि प्रतिबन्धकताङ्गीकारे घटत्वेन निर्णयानन्तर नीलघटत्वेन संशयो न स्यात्। तस्माद् यद्रूपेण निर्णयस्तद्रूपव्यापकत्वेन गृहीतो यो धर्मस्तदवच्छिन्नत्वेनोपस्थिते न संशय इति वाच्यम्। तथा च यत्र घटत्वव्यापकता पृथिवीत्वस्य न गृहीता, तादृशस्थले पृथिवीत्वेन संशयो भविष्यतीत्येतत्परोऽयं मणिः। अत एवेदंपर्वतत्वेन वह्निनिश्चये पर्वतत्वेन न वह्निसंशय इति सिद्धान्तः। पर्वतत्वस्य इदंपर्वतत्वव्यापकतया ग्रहात्। अत एव यदा पृथिवीत्वे घट(त्व)व्यापकतापि दैवाद् गृहीता, तत्र कथं पृथिवीत्वेन रूपेण संशय इत्याक्षेपं मनसि निधाय मणिकृता पक्षान्तरमुक्त—यद्वा घटादिभिन्नपृथिवीत्वेन पक्षतेत्यास्तां ग्रन्थविस्तरः।

नन्वेवमपि आकाशमितरेभ्यो भिद्यते आकाशत्वादित्यादिव्यतिरेकिणि साध्याप्रसिद्धिर्नोद्धृतैव। नहि पृथिव्येकदेशे घटादौ साध्यप्रसिद्धिवत् तत्राप्येकदेशे तथा अस्तीति चेत्। अत्र मणिकृतः — त्रयोदशान्योन्याभावास्त्रयोदशसु प्रत्येकं प्रसिद्धाः पृथिव्यादौ साध्यन्ते। यद्वा, जल तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववद् द्रव्यत्वात् तेजोवदिति त्रयोदशभिन्नत्वस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्व साध्यत इति न साध्याप्रसिद्धिरित्याहुः।

अत्रोपाध्यायाः — प्रत्येकान्योन्याभावत्वमिह साध्यतावच्छेदकमुत समुदिताभावत्वम्। नाद्यः, असाधारण्याद्, जलादिभिन्नवाय्वादेः सपक्षात् पृथिवीत्वहेतोर्व्यावृत्तत्वात्। नान्त्यः, अभावसमुदायस्याप्रसिद्धत्वादिति प्रथमपक्षे दूषणं समर्पयन्ति।

तत्र मिश्रा — साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्या नासाधारण्यं, किं त्वनुमितिविषयतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्या। तच्चेहाप्रसिद्धं, समुदितस्यानुमितिविषयस्यान्यत्राप्रसिद्धेरिति नासाधारण्यमिति भूपयन्ति। तच्चिन्तनीयम्। असाधारण्यं सत्प्रतिपक्षतया दोषावहम्। न च प्रत्येकं साध्यवद्वृत्तित्वे तत् सम्भवति। अभावसमुदायरूपानुमितिविषयविरोधाभावादिति खलु मिश्राणामभिसन्धिः। स चायुक्तः। प्रत्येकं साध्यवद्वृत्त्या प्रत्येकसाध्याभावसिद्धिसामग्र्या मिलितसाध्यसिद्धे प्रतिबन्धनियमात्। समुदायाभावज्ञानस्य समुदायज्ञानविरोधित्वात्। किं बहुना, प्रत्येकसाध्यसाधने मिलितसिद्धिवत् प्रत्येकसाध्यवद्वृत्त्या प्रत्येकाभावे साध्यमाने मिलिताभावसिद्धिरप्यनुमितिविरोधिनी दुर्वारेति नायं पन्थाः। तस्मादसाधारण्यदशाविशेषे दोष इतीह विशेषदर्शनसत्त्वान्न तदवतार इत्येव समाधानम्।

वस्तुतस्तु — स्वस्वाधिकरणस्थितानामेव जलादिभेदानां त्रयोदशत्वं गृहीत्वा त्रयोदशत्वावच्छिन्नभेदा पृथिव्या साध्यन्ते। त्रयोदशत्वावच्छिन्नभेदवत्तया च न जलादेर्ज्ञानं, तद्भेदस्य तत्राज्ञानादिति नासाधारण्यम्। अत एव व्यतिरेकव्याप्तिग्रहोऽपि नानुपपन्नः। जलादौ व्यासज्यवृत्तित्रयोदशत्वरूपधर्मावच्छिन्नभेदाभावस्य सत्त्वात्। व्यासज्यवृत्तिधर्मस्य यत्किञ्चिदाश्रयासत्त्वेन सत्त्वाज्जलादौ स्वभेदाभावेन विशिष्टाभावसत्त्वात्। अत एव च नान्वयित्वशङ्कापि, त्रयोदशत्वावच्छिन्नभेदवत् सपक्षस्याभावादिति युक्तमुत्पश्यामः। यद्वेति द्वितीयपक्षे यद्यपि जलं तेजः प्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववदित्यनेन पृथिव्यन्योन्याभावो जले सिध्यति, न तु जलान्योन्याभावः पृथिव्यामित्युद्देश्यासिद्धिः, तथापि तेजःप्रभृतिद्वादशभिन्ननिष्ठान्योन्याभावप्रतियोगित्वं तदर्थ इति भवति पृथिव्या जलभेदस्यापि सिद्धिरिति मिश्राः।

वस्तुतस्तूक्तानुमानानन्तरं यद् यद्भिन्नं, तत् तन्निष्ठभेदप्रतियोगीति ज्ञानसहितेन मनसोत्तरकालं जलभेदोऽपि पृथिव्या गृह्यत इति मणिकृदाशयः। वस्तु तस्तु इतरे भेदप्रतियोगिनः मेयत्वादित्यनुमानेन लाघवादेकभेदप्रतियोगित्वं विषय (इति) इतरत्वावच्छिन्नभेदः सामान्यतः प्रसिद्धः पृथिव्या साध्यत इति न कोऽपि दोष इति प्रतिभाति।

प्राञ्चस्तु — अभावसाध्यको व्यतिरेकी क्वचित् साध्यप्रसिद्धिं विनापि सा

धयितुं शक्यते, यत्र भाव सुप्रसिद्ध इतीहापीतरतादात्म्यजडत्वादिव्यापकतया पृथिवीत्वाभावग्रहात् तदभावरूपेण पृथिवीत्वेन तद्भेद पूर्वप्रसिद्ध एव सिध्यति, सामग्री(स)त्त्वादिति नान्वयित्व, नासाधारण्य, न व्याप्तिग्रहानुपपत्तिर्नेति वदन्ति।

अत्रेद विचार्यते — इतरतादात्म्यजडत्वादिव्यापकतया हेत्वभावग्रहाद् हेतुना जडत्वा(द्य)त्यन्ताभावसिद्धिरस्तु। जलाद्यन्योन्याभावासिद्धिस्तु कुत। व्यापकाभावेन व्याप्याभावस्यैव सिद्धे, वह्न्यभावेन धूमाभाववदिति।

अत्रोपाध्याया — जडत्वाद्यत्यन्ताभाव एव जला(द्य)न्योन्याभाव, न तु भिन्न, प्रमाणाभावात् कूसेनैव धर्मात्यन्ताभावेन धर्म्यन्योन्याभावनुदच्युपपत्तौ तन्नियामकधर्म्यन्तरकल्पनागौरवाच्चेति।

अत्र मिश्रा — धर्म्यन्योन्याभावधर्मात्यन्ताभावयोरैक्य न घटते। तथा सति घटे पटत्व न, घट पटो न इति प्रतीत्योर्वैचित्र्य न स्याद्, विषयभेदाभावात्। किञ्च, वायौ रूपात्यन्ताभाव प्रत्यक्ष, रूपवदन्योन्याभावस्तु न प्रत्यक्ष, अन्योन्याभावे योग्याधिकरणत्वस्य योग्यतावच्छेदकत्वादिति स्वोक्तिविरोध। एकस्य योग्यत्वायोग्यत्वयोर्विरोधात्। अपि चैव सति घटत्वात्यन्ताभावधीर्न स्याद्, घटत्वत्वरूपप्रतियोगितावच्छेदकप्रकारकधीसाध्यत्वात्। तस्य च घटेतराश्रितत्वघटितस्य घटत्वात्यन्ताभावधीसाध्यतयात्माश्रयाज्जातुमशक्यत्वादिति समादधते।

अत्रेद शङ्क्यते — घटे पटत्व नेत्यत्र पटत्वससर्ग आरोप्य। घट पटो नेत्यत्र तु पटत्वमेव तादात्म्यरूपमारोप्यमित्येव भेद। न त्वभावाग्रेऽपि भेद। किञ्च. घटान्योन्याभावाभावो घटत्वमिति त्वयाप्युररीक्रियते। तथा च यो यदभाव स तदभाव इति व्याप्त्या घटत्वप्रतियोगिकत्व तद्वदन्योन्याभावेऽवश्यमभ्युपेयमेवेति प्रतीतिर्वैचित्र्य यथाकथञ्चित् समर्थनीयम्। यच्च वायौ रूपवदन्योन्याभावाप्रत्यक्षत्वेन स्वोक्तिविरोध इत्युक्तम्। तदपि न। अन्योन्याभावत्वप्रकारकधर्मीता वधिकरणयोग्यतायास्तत्रत्यस्य मयाङ्गीकारद् वायौ रूपवदन्योन्याभावत्वप्रकारकप्रतीतिर्नास्तीति तद्वन्यार्थाद् विरोधगन्धाभावात्। यत्तोक्त घटत्वात्यन्ताभावधीर्न स्यादिति। तदपि न। घटत्वात्यन्ताभावत्वप्रकारकज्ञान एव घटत्व वक्तव्यस्य हेतुतया घटत्वविशिष्टज्ञानाद् घटान्योन्याभावत्वप्रकारकप्रतीत्यनन्तर घटेतरवृत्तित्वघटितघटत्वज्ञानसम्भवेन घटत्वात्यन्ताभाव(त्व)प्रकारकधीरुत्पद्यते। किं बहुना, प्रतियोगितावच्छेदकप्रकारकज्ञानमेवाभावविषय जनयतीति न नियम। तथा सति प्रमे-

यमिह नेति मत्यनापत्ते । किन्तु सप्रकारकप्रतियोगिज्ञानमभावधीहेतु । तथा च घटवृत्तित्वादिरूपातिप्रसक्तधर्मप्रकारकघटत्वज्ञानादपि घटत्वात्यन्ताभावधी सम्भवतीति न घटेतरावृत्तित्वज्ञान नियमतोऽपेक्ष्यत इत्यलमतिविस्तरेणेति ।

अत्र नव्या — यदि धर्मात्यन्ताभावधर्म्यन्योन्याभावयोरैक्य, तदा वृक्षे सयोगाभाववत् सयोगवदन्योन्याभावोऽप्यस्तीति भेदाभेदापत्त्या सिद्धान्तव्याकोप, भेदस्य स्वरूपभेदव्याप्यतया तस्य द्वित्वादिमद्वयोत्पत्तिनियामकतया द्वाविति बुद्धिप्रसङ्गश्चेति वदन्ति । तच्चिन्त्य — सिद्धान्तव्याकोपस्यापि युक्त्यभावेन धर्मिद्वयकल्पनागौरवेण च मोढव्यत्वात् । अत्यन्ताभावविशेषवदन्योन्याभावविशेषस्यैव स्वरूपभेदव्याप्यत्वाच्चैकस्मिन् वृक्षे द्वित्वाद्यनुत्पत्तेरित्यस्यापि वक्तु शक्यत्वादिति ।

अतेद प्रतिभाति — वस्तुभेदे सर्वत्र प्रतीतिरेव प्रमाणम् । सा च यथा घटपटयोरय घट, अय पट इत्याकारा विलक्षणेति तयोर्भेद, तथा घटत्वात्यन्ताभावे घटत्वप्रतियोगिकतया घटान्योन्याभावे घटप्रतियोगिकतयानुभूयमाने विलक्षणेति कथ तयोर्न भेद । अन्यथा घटप्रतियोगित्वानुभवो भ्रा(न्त न्ति) स्यात् । न चेष्टापत्ति । प्रगात्वेनैवोपपत्तौ भ्रमत्वाकल्पनात् । न चात्यन्तान्योन्याभावयोर्धामणोभेदकल्पनागौरवात् प्रतीतेर्भ्रमत्व कल्प्यमिति वाच्यम् । एव सति घटपटयोरपि भेदो न स्याद्, वैलक्षण्यप्रतीतेरुक्तक्रमेण भ्रमत्वकल्पनात् । धर्मिद्वयकल्पनागौरवस्य प्रतीतिबलात् प्रामाणिकत्वमिति यदि, तदा प्रकृतेऽपि तुल्यम् । न च यो यदभाव स तदभाव इति व्याप्त्या घटत्वाभावो घटान्योन्याभाव इति वाच्यम् । तादात्म्यसम्बन्धावच्छिन्नघटस्यैव घटान्योन्याभावाभावरूपतया घटत्वस्य तदभावरूपत्वाभावात् । किञ्च, सहभावनियतधर्मात्यन्ताभावधर्म्यन्योन्याभावयोरैक्ये तथाभूतवस्तुद्वयोच्छेद सर्वत्र प्रसज्येत । विलक्षणप्रतीत्योरपि त्वदुक्तरीत्या ध(मं र्मि)द्वयकल्पनागौरवेण वस्तुद्वयावस्थापकत्वात । व्यवस्थापकत्वे प्रकृतेऽपि स्यादिति दिक् ।

नन्वेव सति प्रकृते कथ जलाद्यन्योन्याभावसिद्धिरित्याक्षेपस्य कथ परिहार इति चेद्, इत्थ — तादात्म्यरूपसम्बन्धेनेतर प्रति व्यापकतया पृथिवीत्वाभावग्रहात् तदभावरूपेण पृथिवीत्वेन तादात्म्यसम्बन्धावच्छिन्नेत(र रा)भावस्य सिद्धे । यत्सम्बन्धावच्छिन्नव्यापकतया यद्ग्रह, तत्सम्बन्धावच्छिन्नाभावस्यैव तदभावेनानुमिते स एवान्योन्याभाव इति नानुपपत्ति । किञ्च, यद्व्यापकतया

हेत्वभावग्रहः, तद्विरोध्यभावस्तद्धेतुना सिध्यतीति प्रत्यक्षमणिसारे व्युत्पादितम्। तथा च जलत्वा(द्य)त्यन्ताभाववद् जलाद्यन्योन्याभावोऽपि जलत्वादिविरोध्यवश्यं सिध्यतीति सङ्क्षेपः। व्यतिरेक्युदाहरणस्थलान्तरं चातिविस्तारभिया नेह विशिष्य विविच्यत इति वेदितव्यम्॥

इति व्यतिरेकिग्रन्थः।

अथार्थापत्तिनिरासः।

एवं व्यतिरेकिणि निरूपितेऽर्थापत्तिर्नानुमानान्तर्भूतेति भट्टादिमतमपास्तम्। अर्थापत्तेरपि केवलव्यतिरेक्यनुमानरूपत्वात्। नन्विदमयुक्तं — ज्योतिःशास्त्रोदितलिङ्गादिना देवदत्तः शतवर्षजीवीति ज्ञात्वा प्रत्यक्षेण जीवी गृह एवेत्यवधार्य योग्यानुपलब्ध्या च गृहे नास्तीति यत्र निश्चितं, तत्र जीवित्वग्राहकगृहसत्त्वनियमग्राहकप्रमाणयोर्विरोधे इदं वा प्रमाणमिदं वेति सशयात् स जीवति न वेति संशयः, तदनन्तर जीवनकल्पने लाघवावतारे ज्योतिःशास्त्रप्रामाण्यरक्षादिरूपतर्कावतारे च जाते जीवनोपपादकबहिःसत्त्व तत्र कल्प्यते। तत्र प्रमाणसहकारिता तर्कस्य, तच्चान्यत्रेति प्रमाणद्वयविषयकप्रामाण्यसशयस्य तज्जन्यजीवनादिसंशयस्य वा सहकारी स इति सशयकारणिकार्थापत्तिरवश्यमङ्गीकार्या, अनुमितिसामग्रीविरहादिति चेत्। अत्र वदन्ति — 'प्रमाणयोरनयोरेक बाध्यं, विरुद्धार्थग्राहित्वादि'ति सामान्यतो दृष्टमवश्यमुभयसिद्धावतारमुररीकार्यम्। अन्यथार्थद्वयकल्पनाप्रसङ्गात्। तथा चात्रानुमाने जीवनतर्कादिसहकृते गृहनियमग्राहिणो बाध्यत्वं विषय इति निष्परिपन्थिजीवनग्राहिप्रमाणाज्जीवित्वलिङ्गनिश्चयाद् अनुमान एव बहिःसत्त्व ज्ञायते देवदत्तो बहिरस्ति जीवित्वे सति गृहासत्त्वादिति (कथंकृत)मर्थापत्त्या।

नन्वनयोरेकं प्रमाणमिति ज्ञानानन्तर जीवनादिसशयानन्तर च यत्र तर्कावतारस्तत्र तदा सामान्यतो दृष्टावतारस्य नष्टत्वात् संशयसहकार्येव तर्क इति कुतो नार्थापत्तिर्मानमिति चेद्, न। संशयानन्तरमपि तर्कावतारो विमर्शसाध्य इति किञ्चिद् विलम्बावश्यकत्वे पुनः सशयस्त्वयापि कल्प्यः। तद् वरं कृत्स्नप्रमाणभावस्य सामान्यतो दृष्टस्यैवावतारः कल्प्यतां, किमर्थापत्त्या मानान्तरेण।

एवमनुपपत्तिकरणता(णा)प्यर्थापत्तिरपास्ता । जीविनो गृहाभावत्व बहि सत्त्व विनानुपपन्न तत् करपयतीति हि सा । सा च पूर्वानुमानेनैव गतार्था । ननु गृहे ऽभावनिश्चयो बहि सत्त्व देवदत्ते कथमनुमापयतु, व्यधिकरणत्वात् । पक्षधर्मताज्ञानस्यानुमापकताया तन्त्रत्वात् । न च गृहनिष्ठाभावप्रतियोगित्व देवदत्तवृत्ति तत्र बहि सत्त्वानुमापकमिति वाच्यम् । तस्य ग्रहणानियमादिति चेद् । अत्राहु — गृहे देवदत्तस्याभाव इति ज्ञाने षष्ठ्यर्थसम्बन्धस्य प्रतियोगित्वस्य प्रकारतया गृहनिष्ठाभावप्रतियोगित्वस्य लिङ्गस्यावश्यमुपस्थानादनुमानप्रवृत्तिरिति न सामग्री दुर्भिक्षमिति नार्थापत्तिस्तद्बहिर्भूतेति ।

अत्रेदमालोचयाम — गृहे देवदत्तस्याभाव इत्यत्र षष्ठ्यर्थप्रतियोगित्वरूप सम्बन्धभानेऽपि प्रतियोगित्वत्वभाने मानाभाव । षष्ठ्या सम्बन्धत्वेनैव सम्बन्धोपस्थापकत्वात् । अ यथा नानार्थत्वप्रसङ्गात् । किञ्च, गृहे देवदत्तो नेति ज्ञानस्थलेऽनुमितिसामग्र्यसम्भव एव । ससर्गमर्यादया प्रतियोगित्वरूपलिङ्गस्य भानेऽपि प्रतियोगित्वत्वरूपलिङ्गतावच्छेदकप्रकारकज्ञानस्यानुमितिहेतोरसम्भवात् । न च नहि सत्त्व विना गृहनिष्ठाभावप्रतियोगित्वमनुपपन्नमिति ज्ञानमर्थापत्तिवादिनापि हेतुतया वाच्य, तथा च प्रतियोगित्वत्व(रूप)प्रकारकज्ञानमुभयसमाधेयमिति वाच्यम् । गृह देवदत्ताभावो देवदत्ते बहि सत्त्व विनानुपपन्न इति ज्ञानस्यार्थापत्तिवादिना हेतुत्वेनाङ्गीकारेण तन्मते प्रतियोगित्वत्वप्रकारकज्ञानानावश्यकत्वात् । न च ससर्गमर्यादया प्रतियोगित्वभानानन्तर मानस तत्प्रकारकज्ञानमस्तु, प्रमाणान्तरकल्पनातो लाघवमिति वाच्यम् । सामग्रीबलेन प्रमाणान्तरसिद्धावीदृगौरवस्य फलमुखत्वेनानोपस्थात् । अन्यथोपनीतभानेनाऽयथासिद्धमनुमानमपि मानान्तर न स्यात् । अनुमिनोमीत्यनुव्यवसायवदर्थापयामीत्यनुव्यवसायस्यात्रापि सत्त्वात् । एवञ्च यत्परि सविता तदा भूमेरालोक्यत्ता, यदा नद्या पूराधिक्य तदा तत्पूर्वदेशे वृष्टिरित्यादिसर्वमर्थापत्तिरेव । यधिकरणेनानुपपत्तेरर्थापत्तित्वात् । अत्र च सामानाधिकरण्यज्ञानान्यतयानुमितित्वनातेरभावात् । एवमिह साध्याधिकरणवृत्तिनानागमनपतितमित्यनुमित्यपेक्षया वैलक्षण्यम् । तस्मादनुमान *सामानाधिकरण्येनावश्यम्भावधी, अर्थापत्तिश्च व्यधिकरणेनावश्यम्भावधीरिति परस्पर वैलक्षण्यात् तयोर्वैलक्षण्यमिति पृथक् प्रमाणमेवार्थापत्तिरिति ।

* 'समानाधिकरणत्व' इति वा स्यात् ।

स्यैवेति तदुपात्त, न तु तद्यवच्छेदक(त्व²)म्। तज्जनकत्वनकतापर्यन्तमसम्भवाप
नुत्तये। अन्यथानुमितिचरमकारणपरामर्शजनकीभूत मानसज्ञान, शाब्द नेति
तज्जनकवाक्यत्वमसम्भव्येव स्यात्। यथा च शाब्दज्ञानमेवाहत्य चरमकारण
परामर्श जनयति, तथा वक्ष्यते। शाब्दज्ञानपद तु 'नायमाभास, तल्लक्षणा
योगादि'ति न्यायबहिर्भूतकण्टकोद्धारवाक्यातिव्याप्तिवारणाय। तदपि चरमकार
ण(क²)परामर्शजनक(जनक)योग्यताजनकमेव। न च शाब्दमपि तज्ज्ञान भवत्येवेत्य
तिव्याप्तिस्तदवस्थेवेति वाच्यम्। शाब्दज्ञानत्वेन तत्प्रयोजकत्वस्य विवक्षितत्वात्।
न्यायजन्यज्ञानस्य शाब्दज्ञानत्वेनैव तथात्वात्। कण्टकोद्धारजन्यज्ञानस्य च
योग्यताज्ञानत्वेनैव तत्प्रयोजकत्वाच्छाब्दमशाब्द वा भवत्वित्यत्र न कश्चिद्
विशेष। वाक्यपद चातीक्ते वह्निव्याप्यवानयमवाधिताग्निरिति वाक्यावयवावय
वेऽतिव्याप्तिवारणाय। तदर्थश्च वाक्यान्तराघटकवाक्यत्वमिति नातिव्याप्ति।
नन्वेवमपि, पर्वते वह्नि, धूमो यत, धूमश्च वह्निमन्मात्रवृत्ति, अत
स्तादृशधूमे पर्वतवृत्तित्व, तस्मादस्ति पर्वते वह्निरित्यादिन्यायसमानार्थकन्या
यानात्मक(त्व¹)वाक्येऽतिव्याप्तिरिति चेद्, न। तत्र सर्वसम्प्रदायमवमत्यानेन
कृत इत्थ प्रयोग इति विरोधिजिज्ञासया परामर्शानुत्पादात् तत्प्रयोजकत्वगर्भल
क्षणाभावेनातिव्याप्तिनिरासादिति तात्पर्य वर्णयन्ति।

अत्र नव्या — न्यायजन्यज्ञानस्यापि विशेषणज्ञानत्वेनैव परामर्श प्रति
प्रयोजकत्व, न तु शाब्दत्वेनेत्यसम्भव। न चान्वयव्यतिरेकाभ्या वादिनस्तथा
विधपरामर्श प्रति शाब्दत्वेनैव प्रयोजकत्वम्। तथा सति कृतसमयवाद्युक्तप्रयोग
प्रयोज्यपरामर्श प्रति कण्टकोद्धारजन्यज्ञानस्यापि शाब्दज्ञानत्वेनैव प्रयोजकत्वमि
त्यतिव्याप्तितादवस्थ्यात्। किञ्च, पवते वह्नि, धूमो यत इत्यादिन्यायसमानार्थके
वाक्येऽतिव्याप्तिस्तदवस्थैव। न च प्रागुक्तरीत्या तद्वारणम्। सभाक्षोभादिना
तादृशसप्रदायविस्मरणे विरोधिजिज्ञासानुत्पादेन तादृशवाक्यस्यापि परामर्शप्रयो-
जकशाब्दज्ञानजनकतानपायादिति यातेर्वज्रलेपत्वादिति।

अत्रेद प्रतिभाति — सम्प्रदायाभिज्ञसम्भ्रान्तभादिप्रयोगप्रयोज्यपरामर्श
त्वावच्छिन्नप्रयोजक यच्छाब्दज्ञान, तज्जनकवाक्यत्व विवक्षितम्। कण्टकोद्धार-
वाक्य तु न तथा। समयमन्तरेण वादप्रवृत्तो तज्जन्यशाब्दज्ञान विनाप्युक्तपरा-
मर्शोत्पत्त्योक्तपरामर्शत्वावच्छिन्नप्रयोजकज्ञानजनकताविरहात्। एव न्यायसमाना-

र्थैकवाक्येऽप्यतिव्याप्तिरपास्ता। सम्प्रदायाभिज्ञासम्भ्रान्तस्य तादृशवाक्यश्रवणाद् विरोधिजिज्ञासया परामर्शानुत्पादात्। अत एवाबाल्यं न्यायसमानार्थकवाक्य एव व्युत्पन्नो यस्तस्य विरोधिजिज्ञासानुत्पत्त्यातिव्याप्तिरिति निरस्तम्। तस्य सम्प्रदायानभिज्ञत्वात्। तत् प्रति तन्न्यायत्वस्येष्टापत्तिपराघातादापादयितुमशक्यत्वादित्यपि कश्चित्।

इदं तु शङ्क्यते — तादृशपरामर्शप्रयोजकत्व फलोपधानं स्वरूपयोग्यता वा। नाद्यः। दैवात् प्रतिबन्धादिवशाद् यत्र न परामर्शोत्पादः, तत्र न्यायलक्षणाव्याप्तेः। नान्त्यः। स्वरूपयोग्यतावच्छेदकापरिचयात्। परिचये च तदेव लक्षणमस्तु। किमनेन। किञ्च, प्रतिज्ञादिष्ववयवेष्वतिव्याप्तिः। वाक्यसमुदायरूपस्य न्यायस्य समुदायेप्रतिज्ञाद्यनतिरिक्तत्वात्, तज्जन्यज्ञानस्य प्रतिज्ञादिजन्यत्वादिति।

अत्र ब्रूमः — वाद्युक्तप्रयोगस्थलीयपरामर्शव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिज्ञानजनकतापर्याप्त्यधिकरणत्व विवक्षितम्। तच्च क्वचित् परामर्शानुत्पादेऽप्यस्त्येवेति नाव्याप्तिः। प्रत्येकावयवानां च तादृशज्ञानजनकतापर्याप्त्यधिकरणत्वं नास्तीति न प्रत्येकावयवातिव्याप्तिरिति दिक्। एतल्लक्षणेन प्रतिज्ञादिवाक्यपञ्चकत्वमुपलक्ष्यत इति केचित्। तन्न। प्रतिज्ञादिवाक्यस्य न्यायघटितत्वेनात्माश्रयादिदोषप्रसङ्गात्। आकाङ्क्षा(प्र!)क्रमोक्तवाक्यपञ्चकत्वमुपलक्ष्यत इत्यपरे। तदपि न। पर्वते वह्निरित्यादिवाक्यपञ्चकातिव्याप्तेः, प्रतिज्ञावाक्यस्याकाङ्क्षाक्रमं विनाप्यभिधानाच्चेति।

ननु न्यायजन्यज्ञानं साक्षादेवानुमितिचरमकारणपरामर्शं जनयतु, किं मध्ये ज्ञानान्तरेण। एवं च लक्षणे जनकत्वमेव प्रवेशयितुमुचितं, न तु जनकजनकत्वमिति चेद्। अत्र मिश्राः — न्यायजन्यज्ञानस्य वादिवाक्यजन्यतया नित्यमप्रामाण्यशङ्काकलङ्किततया विशिष्टवैशिष्ट्यबोधे न सामर्थ्यमिति तेन पदार्थोपस्थितिरूपेण धूमविशिष्टे वह्निवैशिष्ट्यमित्यादिज्ञानं व्याप्त्यादिविषयकं जन्यते। तेन विशिष्टवैशिष्ट्यावगाहिपरामर्श उत्पद्यत इति न्यायजन्यज्ञानं परामर्शप्रयोजकमेव न तु तज्जनकमिति नानुपपत्तिरिति वदन्ति।

अत्र शङ्क्यते — अप्रामाण्यसंशयोऽपि धर्मिज्ञानकोट्युपस्थित्यादिसाध्यतया सर्वत्र नावश्यक इति यत्रैव न धर्म्यादिधीः, तत्र तदभावेन न्यायजन्यज्ञाना-

दनुमितिचरमकारणपरामर्श एव साक्षादुत्पाद्यतां, किमन्तरा विशिष्टवैशिष्ट्यानव-गाहिपरामर्शस्वीकारेण। न चैव शाब्दपरामर्श एवानुमितिहेतुरस्तु। व्याप्तिविशि-ष्टलिङ्गे पक्षधर्मतावशिष्ट्यावगाहिपरामर्शस्यानुमितिहेतोः शाब्दरूपत्वाभावान्मानसपरा-मर्शस्वीकारात्। उदाहरणोपनीतव्याप्तेरुपनयोपनीतपक्षधर्मतायाश्चैकत्र द्वयमिति न्यायेन न्यायजन्यपरामर्शेन विषयीकरणात् तस्य विशिष्टवैशिष्ट्यानवगाहित्वात्। न चोपनयावयवोपनीतव्याप्तिविशिष्टपक्षधर्मत्वं कुतो न विषयीकरोति तदिति वाच्यम्। उपनयस्योदाहरणोपनीतव्याप्त्यंशेऽनुवादरूपतया तदुपनायकत्वाभावात्। अननुवाद्यस्य वाक्योपनेयत्वाद् इत्युपाध्यायमतमेव रमणीयमिति।

अत्रेदं प्रतिभाति — न्यायजन्यज्ञानेऽप्रामाण्यशङ्काविरहे तत एवानुमित्यु-त्पत्तौ मानस परामर्शः सर्वथा व्यर्थ एव। न चोक्तगत्या तत्सार्थकता। अवान्त-रवा(क्यस्यो!क्यार्थस्यो)पस्थितत्वमात्रस्यैव महावाक्यार्थबोधविषयतायां तन्त्रत्वाद्, अननुवाद्यत्वस्य तत्प्रवेशे गौरवात्। न चैवमनुवाद्यस्यापि वाक्यप्रतिपाद्यत्वे 'लो-हितोष्णीषा ऋत्विज. प्रचरन्ती'त्यत्र लौहित्यवदुष्णीषस्यापि सोष्णीषा इति वाक्यान्तरप्राप्तस्य प्रतिपाद्यत्वापत्तिरिति वाच्यम्। लोहितोष्णीषा इति वाक्यज-न्यप्रतीतिविषयत्वस्य प्रतिपाद्यत्वस्य लौहित्यवदुष्णीषेऽपि सत्त्वेन तदापादनस्येष्टा-पत्तिपराहतत्वात। तद्वाक्यतात्पर्यविषयत्वलक्षणप्रतिपाद्यत्वस्य त्वन्यतः प्राप्ते उ-ष्णीषे लौहित्यवदभावात्। तस्मादुपाध्यायमतं न साधु। मिश्रमतमप्यप्रामाण्य-शङ्काक्रान्तत्वस्य परामर्शेऽनावश्यकतया क्वचित्कपरमेव। तथा च क्वचिन्याय-जन्यपरामर्शात् साक्षादेवानुमितिहेतुपरामर्शोत्पत्तिः, क्वचिन्मध्यवर्तिमानसपरा-मर्शजनकद्वारा। तथा चानुमितिचरमकारणपरामर्शव्यतिरेकप्रयोजकव्यतिरेकप्रति-योगित्वं जनकजनकसाधारणं लक्षणं विवक्षितमिति पक्षधरमिश्राभिप्रायः।

नन्वेवमपि, यत्राप्रामाण्यशङ्काविरहेण न्यायजन्यपरामर्शादेवानुमितिः, तत्र न्याये लक्षणमिदमव्याप्तमेवेति चेद्, अत्र ब्रूम. — वादिप्रतिवाद्यापन्नानुमितित्वा-वच्छिन्नं प्रति जनकत्वप्रयोजकत्वान्यतरवद् यच्छाब्दज्ञान, तज्जनकत्वस्य लक्ष-णार्थत्वात्। तथा साक्षादनुमितिजनकत्वात् तज्जनकपरामर्शप्रयोजकत्वाद् वेति न किञ्चिदनुपपन्नम्। न च्वान्तु — शब्दपरामर्शस्याबाधितत्वादिविषयकत्वाभावेन ततो नानुमिति., किन्तु मानसोऽबाधितत्वादिविषयकपरामर्शोऽवश्य वाच्य एव-त्याह्व.।

इदं तु विचार्यते — ईश्वरास्तित्वज्ञानवतो नैयायिकस्य तन्नास्तित्वबोधकवादिवाक्यादन्वयबोध एव न, अयोग्यतानिर्णयसत्त्वात्। तथा च शाब्दज्ञानजनकत्वं कथं न्यायलक्षणमिति।

अत्रोच्यते — मदीयं येनेश्वरसत्त्वज्ञानं प्रमाणेन जनितं, 'तदेतदीयनास्तितावोधकप्रमाणाद् दुर्बलं बलीयो वेति संशयेनाहितात् स्वज्ञानाप्रामाण्यसंशयादास्कन्दित तदयोग्यताज्ञान शाब्दज्ञानप्रतिवन्धाय न प्रभवतीति शाब्दज्ञान न्यायवाक्यादुत्पद्यत एव। वाधकाभावात्।

नव्यास्तु — वाधस्यानाहार्यज्ञानविरोधितया प्रत्यक्षादिवदनाहार्यशाब्दादिविरोधित्वेऽपि वादिवाक्यादाहार्यशाब्दज्ञाने वाधकाभावः। एव सत्प्रतिपक्षादावप्याहार्यानुमितिद्वयमुत्पद्यत एवेति समादधते।

नन्विदमनुपपन्नम्। प्रत्यक्षे भिन्नरूपेण वाधस्य विरोधित्वमिति तत्रानाहार्यप्रत्यक्षत्वस्य तत्प्रतिवध्यतावच्छेदकत्वेऽपि परोक्षत्वरूपवाधसामान्यप्रतिवध्यतावच्छेदकेऽनाहार्यत्वविशेषणे मानाभावात् कथमाहार्य परोक्षं वाधे सत्युत्पद्यतामिति चेद्, अत्र प्रतिभाति — साक्षात्का(रि?र)निर्णये साक्षात्का(रि?र)वाधत्वेन, सा(रि?र)त्का(रि?र)निर्णयान्यज्ञाने वाधत्वेनावश्य प्रतिवन्धकता वाच्या। अन्यथा सशयसाधारणप्रतिवध्यतावच्छेदकालाभप्रसङ्गात्। तत्र विरोधिज्ञानमात्रस्यानुमित्यादिप्रतिवन्धकत्वात् प्रत्यक्षान्तरसाधारण्यविरहात्। तथा चा(हा)र्यसशयानुरोधाद् द्वितीयप्रतिवध्यतावच्छेदकेऽप्यनाहार्यत्वविशेषणमावश्यकमिति वाधे सत्यप्याहार्यशाब्दज्ञाने वाधकाभाव इति।

इद तु चिन्त्यं — शाब्दज्ञानं प्रति योग्यतायीर्हेतुरिति कथमयोग्यतानिर्णये सति शाब्दधीः, योग्यताज्ञानविरहात्। न चाहार्ययोग्यताज्ञानादेवाहार्यशाब्दधीरिति वाच्यम्। विशेषसामग्रीकल्पने मानाभावात्। फलस्याप्यनिर्णयात्। न च लाघवाद् योग्यताज्ञानमेव हेतुः, तच्चाहार्यसाधारणमिति वाच्यम्।

[illegible] । तस्मादाहार्यनिर्णय-

[illegible] । तत्र लाघवाच्छाब्दधीत्व-

मेव तत्कार्यतावच्छेदकमस्तु। न त्वाहार्ययोग्यताज्ञानत्वेनाहार्यशाब्दज्ञानहेतुता, प्रमाणाभावाद् गौरवाच्चेति दिक्।

अनुमितिचरमकारणपरामर्शप्रयोजकशाब्दज्ञानजनकस्वरूपयोग्यतावच्छेद-

कावच्छिन्नवाक्यत्व लक्षणम् । तच्च बाधादिवशादजनितान्वयबोधेऽप्यस्त्येवेति नानुपपत्तिः । योग्यतावच्छेदकं तु प्रतिज्ञादिपञ्चकगोचरधीविशेष्यतापर्याप्त्यधिकरणत्वमिति वस्तुगतिरिति सङ्क्षेपः ॥

इति न्यायलक्षणम् ।

अथावयवलक्षणम् ।

अवयवलक्षणं तु न्यायजन्यज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् । न च न्यायावयवप्रतिज्ञाद्यवयवातिव्याप्ति । तस्य न्यायजन्यज्ञानजनकशाब्दज्ञानाजनकतया तज्जनकत्वाभावादिति केचित् । तन्न । प्रतिज्ञाजन्यज्ञानस्य तदवयवजन्यत्वात् समुदायिभिन्नसमुदायाभावादतिव्याप्तितादवस्थ्यात् । तस्माद् न्यायभिन्नवाक्यान्तराघटकवाक्यत्व विवक्षितम् । तच्चावयवावयवे नास्तीति नातिव्याप्ति. । अवयवावयवस्यावयवघटकत्वादिति नव्याः । तदपि न भव्यम् । न्यायान्तर्भूतावयवद्वयरूपवाक्यघटकतयावयवेऽप्येतल्लक्षणासत्त्वात् । किञ्च, न्यायजन्यज्ञानजनकयोग्यताज्ञानजनके कण्टकोद्धारवाक्येऽतिव्याप्तिः । न च यज्जन्यज्ञानस्य वाक्यजन्यज्ञानत्वेन न्यायजन्यज्ञानजनकता, तत्त्वं विवक्षितम् । अत एव वाक्यपदमपि । योग्यताज्ञानस्य च न वाक्यजन्यज्ञानत्वेन तथात्वमिति वाच्यम् । शाब्दज्ञानपदेनैव तदर्थलाभे वाक्यपदानर्थक्यप्रसङ्गात् । भवतु वा यथाकथञ्चित् तद्दोषोद्धार । अवयवावयवातिव्याप्तिर्दुरुद्धरा । न च न्यायजन्यज्ञानजनकजनकतापर्याप्त्यधिकरणत्व लक्षणार्थं । तच्च नावयवावयवे, किन्तु समुदित इति नातिव्याप्तिरिति वाच्यम् । तथा सत्यसम्भवापातात् । न्यायजन्यज्ञानजनकजनकतायाः प्रतिज्ञादिष्वपर्याप्तिरिति ।

तस्मादिदमत्र तत्त्वं — न्यायान्तर्भूतप्रतिज्ञादिपञ्चकस्य परस्परसाकाङ्क्षत्वमिति सर्वसिद्धम् । तथा च न्यायान्तर्भूतप्रतिज्ञादिपञ्चकपरस्पराकाङ्क्षापर्याप्त्यधिकरणत्व लक्षणम् । अवयवावयवे च न तथा, प्रत्येकाकाङ्क्षायाः प्रत्येकावयव एव पर्याप्ते । यद्वा, प्रतिज्ञादिपञ्चकप्रतियोगिकान्योन्याभाववत्प्रतियोगिकान्योन्याभाववत्त्व प्रतिज्ञादिपञ्चकविशेष्यकधीविशेष्यतावच्छेदकधर्मवत्त्व (वा) लक्षणम् । तच्च प्रतिज्ञारगादिकमेवेति न कोऽपि दोष इति दिक् ॥

इत्यवयवलक्षणम् ।

अथ प्रतिज्ञाग्रन्थः ।

अवयवाश्चोदाहरणान्तास्त्रय इति मीमांसकाः । उदाहरणोपनयौ द्वावेवावयवाविति बौद्धाः । आकाङ्क्षाक्रमानुरोधाद् अवयवाश्चक्रमिति वृद्धाः । ते च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि । तत्र प्रतिज्ञात्व न्यायघटकत्वे सत्यनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकपदसमुदा(य १यत्वम्) । प्रतिज्ञैकदेशे च समुदायत्वाभावान्नातिव्याप्ति । सत्यन्तेनोदासीनप्रतिज्ञासमानाकारवाक्यव्युदास । पाषाणमय पर्वतो वह्निमानित्यत्र पक्षोपस्थापकपदसमुदायेऽनुमित्यनतिरिक्तविषयकशाब्दज्ञानजनकेऽतिव्याप्तिवारणायान्यूनपदम् । न चावयवान्तरस्य पक्षतावच्छेदकावोध(क)तयानुमित्यन्यूनपदादेव वारणेऽनुमित्यनतिरिक्तपदवैयर्थ्यमिति वाच्यम् । सर्वनामपदस्य बुद्धिस्थप्रकारवाचितया तस्मादय वह्निमानित्यत्र पर्वतत्वप्रकारकबोधादतिव्याप्त्यानतिरिक्तपदस्यावश्यकत्वात् । न चैवमपि अय वह्निमान् इति निगमनैकदेशातिव्याप्तिस्तदवस्थैवेति वाच्यम् । निगमनैकदेशान्यत्वस्यापि विशेषणत्वात् । न च प्रतिज्ञाया ज्ञानलक्षणयानुमित्यनतिरिक्तविषयकज्ञानजनकत्वासत्त्वादसम्भव इति वाच्यम् । तत्रापि प्राथमिकबोधस्य मुख्यार्थविषयकस्य (ज्ञानस्य १जनक)तयैव लक्षणस्य नेयत्वात् । हेत्ववयवमहणानन्तर चानुपपत्त्योत्तरकाल ज्ञानलक्षणाकल्पनात् ।

इद तु शङ्क्यते—मेयत्व सर्ववृत्ति केवलान्वयिधर्मत्वादित्यादिप्रतिज्ञायामव्याप्ति । तत्र सर्वस्यैवानुमितिविषयतया तदतिरिक्तासिद्धेरिति ।

अत्राहु —अनुमितिविषयतासम व्याप्तिविषयताकत्वमन्यूनानतिरिक्तविषय-(त्वे १केवलेन)न विवक्षितमिति न काप्यप्रसिद्धिर्न वातिव्याप्तिरिति । नन्वेवमपि व्यतिरेकिप्रतिज्ञायामव्याप्ति । अनुमिते साध्याभावाभावत्वप्रकारकतया प्रतिज्ञाया न्यूनविषयकत्वादिति चेत् । तत्र प्रतिज्ञाया अपि नेद निरात्मक जीवच्छरीरमित्येवमाकारायाः एव प्रयोगात् । क्वचित् तथाप्रयोगस्तु व्यतिरेकसहचारादन्वयव्याप्तिमहाभिप्रायेणेति द्रष्टव्यम् । यद्वा, यन्न्यायावयवत्वावच्छेदेन लिङ्गविषयकशाब्दज्ञाननजनकतानियम , तदन्यन्यायावयवत्व प्रतिज्ञात्वमिति कापि नातिप्रसङ्ग. । अत्र च विप्रतिपत्तिवाक्यादेव साध्यत्वापत्तौ प्रतिज्ञावयवो व्यर्थ इति देष्यपनादेयम् । विप्रतिपत्तिवाक्यस्य पञ्चपरिमहादिना व्यवधानात् । आवृत्ति-

स्वरूपा च साध्योपस्थापकपदस्यैव । सैव प्रतिज्ञाशब्देति क व्यर्थता । किञ्च, वि प्रतिपत्त्या साध्यतदभावोपस्थित्या क हेत्वन्वय । योग्यतया वादिवाक्येऽन्वया नियमात् । अपि च, प्रतिज्ञावाक्ये हेतुत्वान्यथानुपपत्त्या ज्ञानलक्षणेति वक्ष्यते । तथा च न विप्रतिपत्त्या तदन्यथासिद्धि , भिन्नविषयकत्वादिति सदेप ॥

इति प्रतिज्ञाग्रन्थ ।

अथ हेतुग्रन्थः ।

साध्यनिर्देशानन्तर कुत इत्याकाङ्क्षाया हेतुताव्यञ्जकविभक्तिमल्लिङ्गवच नमवोचित, पक्षधर्मतादेस्तदाकाङ्क्षाविरहेण तत्प्रतिपादकपदोपादानेऽप्राप्तकाल तापातादिति प्रतिज्ञानन्तर हेतूपन्यास । हेतुत्व च न्यायप्रविष्टत्वे सति साध्या विषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वमिति मणिकृत । नन्वत्र सत्यन्तेन हेतुसमानाकारोदासानवाक्य, साध्याविषयकत्वेन तस्मादिति निगमनाश , हेतुविभक्तिमदित्यनेन यो यो धूमवानित्युदाहरणैकदेशश्च वार्यता नाम । शब्दोऽनित्य सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वादित्यत्र हेतुचर माशातिव्याप्ति केन वारणीया । किञ्च, इद प्रमेयवद् घटादित्यत्र हेतावव्याप्ति । प्रमेयरूपसाध्याविषयकज्ञानाप्रसिद्धे । अपि च, वायु प्रत्यक्ष प्रत्यक्षस्पर्शाश्रयत्वादित्यत्राव्याप्ति , साध्याविषयकशाब्दधीजनकत्वादिति ।

अत्राच्यते—चरमशब्दपदाद् य(द)वच्छेदेन हेतुविभक्तिसमभिव्याहार, तदवच्छिन्नशब्दत्व लक्षण सूचितम् । सामान्य(व)त्त्वे सतीत्यत्र सतिसप्तम्या सामानाधिकरण्यार्थकाया बलेन विशिष्ट एव हेतुविभक्तिसमभिव्याहार इति न विशिष्टे लक्षणाव्याप्ति । न च चरमाशेऽतिव्याप्ति । साध्याविषयकत्व च साध्यतावच्छेदकावच्छिन्नाविषयकत्वम् । तच्च प्रमेयसाध्येऽप्यस्त्येवेति न तत्रा व्याप्ति । साध्याविषयकेत्यत्र न(न्तो ऽभो) व्यत्यास । तेन साध्याविषयकशाब्द ज्ञाननजनता यस्य न्यायप्रविष्टस्य नियता, तद्भिन्नमित्यर्थे पर्यवस्यति । हेतुरू पन्यायप्रविष्टस्य च न सवत्र साध्याविषयकज्ञाननजनकत्वमिति प्रत्यक्षस्पर्शादित्यादौ नाव्याप्ति । तस्मादिति निगमनागस्य च सर्वत्र साध्याविषयकज्ञानजनकतेति तद्भिन्नत्वाभावान्न तत्रातिव्याप्तिरिति दिक् ।

यच्च मणिकृता लक्षणान्तरमुक्तं पञ्चम्यन्तलाक्षणिकपदघटितमनुमितिपरवाक्यत्वमिति । तत्र वदन्ति — न्यायाप्रविष्टवाक्यमनुमितिपरपदेन न्यायप्रविष्टत्वार्थेन वार्यते, निगमनातिव्याप्तिश्च लाक्षणिकपदेनापाक्रियते, तत्र तस्मादिति सर्वनाम्न सर्वशक्ततया च लक्षणाविरहात् । प्रतिज्ञाया चातिव्याप्तिवारणाय पञ्चम्यन्तपदं यदुपात्तं, तत् कुतः । न च प्रतिज्ञाया ज्ञानलक्षणासत्त्वादतिव्याप्तिर्मा भूदित्येव(तत्)तदर्थं पञ्चम्यन्तपदमिति वाच्यम् । हेतुपदेन ज्ञापकहेतोरभिधानात् पञ्चम्यापि ज्ञापकत्वस्य प्रतिपादनात् । तथा च धूमप्रयोज्यज्ञानविषयत्वं वह्नौ साध्यत्वमिति किं लक्षणया । एवं वह्निविषयकज्ञानजनकज्ञानविषयत्वरूपं वह्निज्ञापकत्वं धूमे पञ्चम्या प्रतिपाद्य(त) इति हेतावपि न लक्षणेत्यसम्भवो लक्षणस्य । किञ्च, हेतुपदेन ज्ञानलक्षणाया वृत्तिद्वयविरोधापत्त्या ज्ञानमात्रस्योपस्थितिर्वाच्या । तथा च लिङ्गस्यानुपस्थित्या तस्य गमकत्वाकाङ्क्षा न स्यात् । प्रत्युत ज्ञान एव गमकत्वाकाङ्क्षा स्यात् । अपि च, 'स्वायत्ते शब्दप्रयोगे किमित्यवाचकपदं प्रयो(ज्यामीक्ष्यामहे)' इति न्यायाद् धूमज्ञानादिति प्रयोगापत्तिः । तस्मात् प्रयोजकत्वे पञ्चमीत्येव साधु, न तु ज्ञानलक्षणेति ।

अत्र मिश्राः — हेतुत्वशक्ताया पञ्चम्या प्रयोजकत्वे न शक्तिः, मानाभावादिति लक्षणा वाच्या । तच्च न सम्भवति, सुब्विभक्तौ लक्षणाविरहस्य शब्दखण्डे प्रतिपादितत्वात् । न चैवं 'तत्त्वज्ञानान्नि श्रेयसाधिगमः' इत्यत्र तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमिति व्याख्यानात् तस्य च नि श्रेयसाहेतुत्वात् कथं पञ्चमीसङ्गतिरिति वाच्यम् । तत्रानन्यथासिद्धत्वाशविशेषण परित्यज्य नियतपूर्ववृत्तित्वरूपविशेष्यांशोपस्थितौ लक्षणाविरहात् । विशेष्ये चैकदेशेऽप्याकाङ्क्षासत्त्वेनान्वयात् । अस्तु वा तदनुरोधा(द्) नियतपूर्ववर्तित्वमात्रे पञ्चमीशक्तिः । उक्तरूपप्रयोजकत्वशक्तौ मानाभावात् । यच्च लक्षणापक्षे वृत्तिद्वयविरोधाद् न लिङ्गोपस्थितिरिति दूषणमदायि, तदपि न । ज्ञानलक्षणयैव तदुपस्थितेस्तत्र गमकत्वाकाङ्क्षासम्भवात् । अन्यथा पाकाद् रक्तिमत्यनन्वितं स्यात् । पाकस्य रक्तिमगुण एव हे(तु)त्वान्वयात् । तस्य च गुणिलक्षणिकरक्तपदाद् वृत्तिद्वयविरोधादनुपस्थितेः । तस्माद् गुणिलक्षणयैव तदुपस्थितिर्वाच्या । तथा च प्रकृतेऽपि समानम् । न चैवं लक्षणया प्राधान्येनोपस्थिते ज्ञान एव गमकत्वाकाङ्क्षा स्यादिति वाच्यम् । व्याप्तिविषयकत्वेन पक्षे ज्ञानं गमकम् । तच्च तदा, यदि धूमो

व्याप्य इति । तदभिप्रेत्याकाङ्क्षायामेवोदाहरणप्रवृत्ते । अस्तु वा विशेषणतयाप्युपस्थिते लिङ्गे गमकत्वाकाङ्क्षा, उपस्थितिमात्रस्यैव तत्र तन्त्रत्वात् । यच्च धूमज्ञानादित्याकारकप्रयोगापत्तिरित्युक्तं, तदपि न । तथा सति तज्ज्ञानलाभापातात् । हेतुविभक्तिसमभिव्याहृतधूमादिपदे ज्ञानलक्षणाया निरूढत्वाङ्गीकारात् । अत एव घटं करोतीत्यादाववयवलक्षणायामपि न घटावयवं करोतीति प्रयोग इति समादधते ।

तत्रेदं विचार्यते — प्रतिज्ञायामेका ज्ञानलक्षणा हेतौ चापरेति लक्षणाद्वयं कल्प्यताम् उत हेतुत्वशक्तपञ्चम्या प्रयोजकत्वमात्रलक्षणेति । तत्रान्त्ये लाघवात् तदेवास्तु । तद्बलाच्च सुब्विभक्तौ लक्षणा नेत्यस्य तत्राभावः कल्प्यते । न च पञ्चम्या ज्ञापकत्वमुपस्थाप्यम् । तत्र चैकदेशो ज्ञानमिति साध्यस्य पदार्थस्य तेन कथमन्वयोऽस्तु, 'पदार्थः पदार्थेने'ति व्युत्पत्तेरिति वाच्यम् । ससम्बन्धिकस्थले एकदेशान्वयस्यापि स्वीकारात् । अन्यथा चैत्रमातेत्यादौ चैत्रस्य जनकत्वेन पदार्थकदेशान्वयो न स्यादिति । यच्च ज्ञानलक्षणया विषयस्य लिङ्गस्योपस्थितिरिति समाहितं, तदपि न । अन्यतृत्यान्योपस्थितावतिप्रसङ्गात् । न चैवं पाकाद् रक्तमित्यत्रापि गुणिलाक्षणिके गुणस्यानुपस्थितौ कथं तत्र पाकहेतुत्वान्वय इति वाच्यम् । तत्र 'गुणे शुक्ल' इत्यनुशासनाद् गुणिन्यपि रक्तादिपदस्य शक्त्या तयोभयोपस्थितौ पाकहेतु(क)त्वस्य गुणेऽन्वयसम्भवात् । यच्चोक्तं हे(तु)त्ववयवे निरूढलक्षणेति, तदपि न । निरूढत्वानिरुक्ते । नियततदर्थतात्पर्यमेव तदिति चेद्, न । तात्पर्यस्य पुरुषाधीनतया तदसम्भवात् । न चान्यवृत्तित्वेऽप्यसाधुत्वमित्येव निरूढत्वं, बहुव्रीह्यादिपदवदिति वाच्यम् । एवं सति धूमपदस्यात्र निरूढतया स्वार्थे क्वापि साधुत्वं न स्यात् । न च न्यायप्रविष्टहेत्ववयवत्वावच्छेदेन तथा, न सर्वत्रेति वाच्यम् । एवं सति घोषादिपदसमभिव्याहारावच्छिन्नगङ्गादिपदानामपि निरूढत्वापत्त्या गत निरूढानिरूढविभागेनेति ।

अत्र प्रतिभाति — विषयाधिक्याल्पत्वकृतं हि गौरव लाघव वावतरति, न तु लक्षणैक्यानैक्यकृतम् । तथा च प्रकृते प्रतिज्ञाहेतुपदयोर्ज्ञानलक्षणाया ज्ञानद्वय विषय । हेतुत्वज्ञापकपदमात्रे प्रयोजकत्वलक्षणायाश्च ज्ञानजनकज्ञानविषयत्व विषय इति ज्ञानद्वय जनकत्व विषयत्व च विषय इति महद् गौरवमिति पदद्वयलक्षणैव लघीयसी । न चैव धूमपदाद् ज्ञानोपस्थितिरेव स्याद्, न तु धूमो-

पस्थितिः, अन्यवृत्त्यान्योपस्थित्यभावादित्युक्तमिति वाच्यम्। किञ्चिन्नियामकसंसर्गत्वेऽन्यवृत्त्याप्यन्योपस्थितेः। कथमन्यथा गङ्गांशस्यावच्छेदकतया भानम्। कथं वा तीरत्वांशभानम्। तत्र लक्षणाविरहस्य शब्दपरिच्छेदे सुव्यक्तत्वात्। तथा च यद्धीति न्यायाद् ज्ञानलक्षणया विषयोपस्थितिरस्तु। किञ्च, मणिकृन्मते वृत्तिद्वयविरोधो न दोषायेति शक्त्या धूमो लक्षणया ज्ञानमुपस्थितमस्तु। दोषाभावात्। भवतु वा वृत्तिद्वयविरोधः क्वचिद् दोषाय, न तु सर्वत्र। अन्यथा लम्बकर्णादिपदात् कर्णस्यानुपस्थितौ तदानयनाद्यभावप्रसङ्गात्। यच्च रक्तादिपदस्य गुणिनि शक्तिरेवेत्युक्तं, तदपि न। किं रक्तपदस्य रक्तत्वविशिष्टरक्तगुण एका गुणिनि चापरा शक्तिः, तत्रापि शुद्धगुणिनि वा रक्तत्वविशिष्टरक्तगुणविशिष्टगुणिनि वा, रक्तत्वविशिष्टरक्तगुणविशिष्टगुणिन्येवैका शक्तिर्न गुणांशे पृथक् शक्तिरिति। नाद्यः। एकयैव शक्त्योपपत्तौ शक्तिद्वये गौरवात्। न च सा गुणिन्येवास्तु। शुद्धस्य गुणिनो रक्तादिपदादनुपस्थितौ रक्तत्वादिविशिष्टरक्तादिविशिष्टे सा वाच्या। तथा च लाघवाद् रक्तत्वादिविशिष्टे एव सास्तु। अत एवान्त्यपक्षोऽप्यपास्तः। न चैवमनुशासनविरोधः। अनुशासनस्य साधुत्वज्ञापकत्वात्। शक्तेश्चानन्यलभ्यत्वादिकल्प्यत्वात्। न चैव लक्षणया सर्वं सर्वत्र साधु भवत्येवेत्यनुशासनं विफलं स्यादेवेति वाच्यम्। लक्षणयापि तत्रैव साधुत्वमिति ज्ञापयितुमनुशासनाद् व्यत्ययानुशासनवदिति शब्दपरिच्छेदे वक्ष्यमाणत्वात्। किं बहुना, पाकाद् गन्धो घट इत्यादौ का गतिः। गन्धपदस्य गुणिनि शक्तेः केनाप्यनङ्गीकारात्। तस्मात् तत्र गुणिलक्षणयैव गुणस्योपस्थितौ पाकहेतुत्वान्वय इति। यच्च निरूढत्वं निर्वक्तुमशक्यमित्युक्तं, तदपि न। हेतुपञ्चम्यन्तत्वावच्छेदेन ज्ञाने नियतानादितात्पर्यस्यैव निरूढत्वनियामकत्वाद्, अनादितात्पर्यपूर्वकलक्षणाया एव निरूढलक्षणात्वात्, तादृशस्य पदस्य लक्ष्यादन्यत्रासामर्थ्यनियमात्। न चैवं गङ्गापदं समभिव्याहारविशेषावच्छिन्नं निरूढलाक्षणिकं स्यादिति वाच्यम्। तादृशस्य सत्त्वे इष्टत्वात्। शुद्धस्य चातथात्वादित्यलमतिविस्तरेण। एतेन "पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्व हेतुलक्षणमनुपपन्नम्। अयमात्मा ज्ञानादित्यत्र ज्ञानज्ञानस्य शक्त्यैवोपस्थितौ लक्षणाविरहेणाव्य
पसाध्यं
ज्ञापकवाक्ये हेतुवाक्ये वा न लक्षणेत्यव्याप्तिः। तत्त्वादित्यादिहेतावप्यव्याप्तिः।

सर्वनामपदे लक्षणाविरहादि"त्यादिदूषणमपास्तम् । न्यायमविष्टहेतुपक्षसम्बन्धावच्छेदेनैव निरूढलक्षणाङ्गीकारात् । शक्तेस्तदपेक्षया दुर्बलत्वात् । अत एव सर्वनामपदेऽपि तत्र लक्षणास्त्येवेति न काप्यतिप्रसङ्ग इति सङ्क्षेपः ।

अत्र च कथाया पक्षधर्मताप्रतिपादनाय मीमांसकवद् मतुप प्रयोगो न कार्यः । अनाक्षिप्तपक्षधर्मताप्रतिपादनाय प्रथम तदभिधानेऽप्राप्तकालतापातात् । एतदभिप्रायेणैव मणिकृतोक्त — कथाया धूमादित्येव प्रयोक्तव्य न धूमवत्त्वाद् (इति), मतुपो व्यर्थत्वादिति । न च तत्र धूमवत्त्वे व्यर्थविशेषणतया व्याप्तिर्ग्रहीतु न शक्यत इत्येवाभिप्राय इति वाच्यम् । धूमसम्बन्धस्यापि धूमवद् वह्निव्याप्यतया व्यर्थत्वासम्भवात् । समानाधिकरणलघुगुरुद्वयसन्निवेश एव व्यर्थत्वस्य दोषत्वादिति बहुशो निवेदनात् । न चैवमपि धूमवत्त्वादित्युक्ते पर प्रत्यप्राप्तकालत्वरूपो निग्रहो दातु न शक्यते, यावता धूमवत्त्वमेवाहमत्र हेतुमकरव न तु मतुपा पक्षधर्मता प्रतिपादयामीति वादिना वक्तु शक्यत्वादिति वाच्यम् । उदाहरणोपनयाभ्या हेतुतानिर्णये निग्रहस्य दातु शक्यत्वात् । नहि धूमवत्त्वे हेतुत्वेन विवक्षिते यो यो धूमवानित्युदाहरणं धूमवाश्चायमित्युपनयो वा युज्यते । अपि तु धूमवत्त्वानित्युदाहरण. धूमवत्त्ववाश्चायमित्युपनय इति दिक् ॥

इति हेतुग्रन्थ ।

अथोदाहरणग्रन्थः ।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षाया व्याप्तिपक्षधर्मतयोरुपदर्शनप्राप्तो व्याप्तेरनुमितिजनकीभूतपरामर्शविशेषणतया प्रथमोपस्थितितया पक्षधर्मताया अश्च तत्ससर्गतयोपस्थित्यनियमात् प्रागुपस्थितिक्रमप्राप्ताकाङ्क्षावशात् प्रथम व्याप्तेः प्रदर्शनार्थमुदाहरणम् । तत्र यद्यप्युदाहरणे व्याप्तिरभावादिनानापदार्थगर्भा न पदार्थो न वाक्यार्थ इति तत्प्रदर्शनार्थमुदाहरण न घटते, तथापि यो य इत्यादिना हेत्वधिकरणे सर्वत्र साध्यसबन्धप्रतिपादनात् तत्र साध्याभावसम्बन्धरूपव्यभिचारशङ्का न भवति । सहचारश्च साक्षादेवोदाहरणवाक्येन प्रतिपाद्यत इति व्यभिचारज्ञानविरहसहकृतसहचारज्ञानसहकृतेन मनसा भवति व्याप्तिग्रह

इत्युदाहरणं व्याप्तिग्रहो(पपत्ति ? पयि) क, न तु साक्षात् तत्प्रतिपादकमिति वृद्धा । यावत्साधनाश्रयाश्रितसाध्यसम्बन्धो व्याप्ति । सा चोदाहरणवाक्यात् साक्षादेवावगम्यत इति नव्या । उदाहरणलक्षणं व्याप्यतावच्छेदकावच्छिन्नवद्धर्मिसामानाधिकरण्यमुद्दिश्य व्यापकतावच्छेदकावच्छिन्नवत्त्वविधायकन्यायावयवत्वम् । उपनये व्याप्यवति व्यापकसम्बन्धस्यात्रिधेयत्वात् तत्र पक्षधर्मतामात्रस्यैव विधेयत्वाद् व्याप्यत्वांशस्यानूद्यमानत्वात्रातिव्याप्ति । अत एव यो नीलधूमवान् स वह्निमानित्युदाहरणाभासेऽपि नाति याप्ति । नीलधूमत्वस्य व्याप्यतानवच्छेदकतया तत्रोक्तलक्षणाभावात् । उदाहरणसमानाकारत्वाच्च न न्यायावयव इति न तत्रातिव्याप्तिरिति तत्त्वम् ।

अत्र प्राञ्च —उदाहरणवाक्ये व्यभिचारशङ्कानिवारणाय यो य इति वीप्सा कार्या । सा च यत्र व्यभिचारशङ्का तत्रैव । अन्यत्र तु केवलान्वयादौ व्यभिचारशङ्का नास्तीति न तत्र वीप्सेत्याहु । तेषा चायमाशय —यो य इति वीप्सितशब्दश्रवणानन्तरमनुगतया प्रयोजनजिज्ञासाया व्याप्तिग्रहप्रयोजनकत्वेऽवसिते यो य इति प्रथमयत्पदोपस्थाप्यधूमाधिकरणभिन्न सर्व धूमाधिकरण द्वितीययत्पदेन विशिनष्टि सामान्यतो वोपस्थाप्यते । तथा च सर्वत्र साध्यसम्बन्धज्ञानाद् व्यभिचारशङ्का न भवतीति भवति मनसा व्याप्तिग्रह इति केवलान्वयिस्थले वीप्सा न कार्यति । (तत्) तु न सम्यक् । तथा सति तत्र सामानाधिकरण्यप्रदर्शनमपि व्यर्थमेव स्यात् । केवलान्वयित्वेन ज्ञाते सामानाधिकरण्येऽप्यव्याप्तिपत्ते । तस्मात् तत्रापि वीप्सा कार्यैव वादिना । स्वरुचि यत्र निर्वाहस्तत्रापि तदुचित वात् । कथमन्यथा केवलान्वयिसाधकतर्कहेतुकन्यायेषु उदाहरणावयवप्रयोगति । व्याप्तिज्ञानमात्रेणानाप्तवादिशङ्कानिरहात् तद्बोधकावयवानामनुक्तौ वैयर्थ्यस्य दुरुद्धरत्वात् । व्याप्यकथनप्रयोगे सर्वसम्प्रतिपन्नतया न व्याप्त्यादिप्रदर्शनावयवोपन्यास इति न तत् प्रतिबन्धकमिति दिक् ।

मणिकृतस्तु —वीप्सायामपि व्यभिचारशङ्कानावश्यकत्वाद् न सा कार्या । यदि वा कार्या, तदा यत्पद एव, न तु तत्पदेऽपि । नानायत्पदोपस्थाप्यस्यैकतत्पदेनैव परामर्शसम्भवात् । तथा च 'यद् यद् पाप प्रतिजहि दुर्गनाथ' नग्नस्य तन्वे' इत्यादाविति वदन्ति । तेषामयमभिप्राय —वीप्सायामपि सर्वाधिकरणोपस्थिति(र्नेति)रनुवादेन व्याप्तितात्पर्यकत्वमवद्धार्य, न साक्षात् । तथा च यथोक्तप्राथ-

म्याम्यामेव व्याप्तितात्पर्यग्रहोऽस्तु । तथा चैकवस्तुनैव सर्वमपि हेत्वविरुद्ध मुपन्यास्यताम् । कृत वीप्सावटितमुदाहरणेनेति । यदि च कथकसप्रदा-यसिद्धत्वादुपाधन्योपाधान्तराद्दूषकत्वाच्च यत्पदवीप्सादर. । त(या'दा) च तत्पद-वीप्सायानतिगौरवम् । एकेनैव तत्पदेनोभयोरन्वितिलाभादिति ।

इद तत्त्वम्—यत्पदतत्पदयोरुभयोरपि समयबन्धेन वीप्सा कार्या। अन्य तरसमयबन्धेनान्यतरवीप्सा वा । समयबन्धेन विना वीप्सा क्वापि न कार्येति ।

अत्र च यो यो धूमवानि त्युदाहरणमात्रेण न घटते । धूम कथ गमक इत्याकाङ्क्षायामुदाहरणप्रवृत्तेस्तेन धूमसामानाधिकरण्यप्रतिपादनन्यायोचित-त्वात् । धूमवानित्यनेन मतुबर्थसामानाधिकरण्यप्रतिपत्ते । मतुबर्थसम्बन्धस्य पदा र्थतया तत्सम्बन्धस्यैव वाक्यार्थत्वादिति यत्र यत्र धूम इत्येतदुदाहरणमर्हतीति मिश्रा । तच्च न मनोज्ञम् । एव सति पर्वतो वह्निमान् इति प्रतिज्ञा वह्नि व्याप्यधूमवानयमित्युपनयो वह्निमानिति निगमन च विरुध्येत, ततो वह्न्या दिसम्बन्धविधेयताया एव प्रतीतौ । तस्मादत्र कथकसप्रदायानुरोध एव शरण-मिति दिक् ॥

इत्युदाहरणग्रन्थ. ।

अथोपनयग्रन्थः ।

उदाहरणानन्तर व्याप्ते सहकारिणी पक्षधर्मता वर्तते न वेत्याकाङ्क्षाया तत्सहकारिणी पक्षधर्मता प्रतिपादयितुमुपनय । तत्रानुमितिकारणीभूतपरामर्शज नकावयव उपनय इति मणिकृत ।

नन्विदमयुक्तम् । अनुमितिहेतुमानसपरामर्शस्योपनयवाक्याजन्यत्वादिति चेद्। अत्र वदन्ति—अनुमितिहेतुपरामर्शसमानाकारपरामर्शजनकावयवत्वमुक्त लक्षणार्थ । अस्ति चोपनय-जपरामर्शस्य यासिविशिष्टपक्षधर्मतावगाहिन तादृशमान सपरामर्शस्य समानाकारतेति नासभव इति ।

अत्रेद शङ्क्यते — तस्माद् वह्निमानिति निगमने लक्षणमिदमतिव्या प्तम् । तस्मादित्यनेन व्याप्तिविशिष्टपक्षधर्मतापरामर्शेनोक्तसमानाकारज्ञानजननात् ।

किञ्च, समानाकारता यावत्तद्विषयविषयकत्वेन यत्किञ्चित्तद्विषयविषयकत्वेन वा । नाद्यः । अतिप्रसङ्गात् । नाद्यः । मानसपरामर्शविषयाबाधितत्वादेरुपनयजन्यपरामर्शविषयत्वासम्भवापत्तादिति ।

अत्र प्रतिभाति — अबाधितत्वासत्प्रतिपक्षितत्वातिरिक्तांशो यावान् मानसपरामर्शस्य यथा विषयः, तावान् तज्जन्यपरामर्शस्य तथैव विषयः, तादृशश्च यथ उपनयः । निगमनजन्यज्ञाने च साध्यांशस्य परामर्शः व्याप्तिविशेषणतया विषयस्य स्वातन्त्र्येणापि भानाद् न तत्राप्तिव्याप्तिः । न च तत्सादित्यंशे तथाप्यतिव्याप्तिरिति वाच्यम् । अवयवपदेनैव तद्व्युदासात् । तत्र्यावयवावयवत्वात् ।

अत्र च हेत्वबयवेनैव पक्षधर्मता प्रतिपाद्यता, किं तत्प्रतिपादकोपनयेनेति देश्यमनदेयम् । हेत्वबयवस्य कारणमात्रज्ञानजन्यतया पक्षधर्मताबोधकत्वाभावात् । आकाङ्क्षाक्रमेणैव तदर्थस्य प्रतिपादयितुमुचितत्वादिति दिक् ॥

इत्युपनयश्च ॥

अथ निगमनग्रन्थः ।

उपनयानन्तरं निगमनम् । तच्च न्यायावयवत्वे सति व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रयुक्तसाध्य(ज्ञानजन्य)बोधनत्वम् । प्रतिज्ञादयश्च न्यायावयवाः साध्यादिसिद्धिर्न भवति । प्रतिज्ञायाश्च न व्याप्त्यादिधीप्रयुक्तसाध्यबोधकत्वमिति न तत्राप्तिव्याप्तिः ।

ननु व्याप्तिविशिष्टपक्षधर्मतान्यावयवान्तरेणैव प्रतिपादनाद् निगमनं किमर्थमिति चेद्, न । अबाधितत्वादि(ति)बोधनस्यैवोपयोगात् । अबाधितत्वादिज्ञानस्याप्यनुमितिहेतुत्वात् । यद् यदभावे सति न भवति, तत् तदभावावगमसाध्यमिति मणिकृतः । तेषां चायमाशयः — अबाधितत्वादौ निगमनेन प्रतिपादिते सति न तावन्मानसानुमितिप्रतिबन्धकीभूतं जायत इति व्याप्तिविशिष्टपक्षधर्मताज्ञानं बाधादिज्ञानाभावसहकृतमनुमितिं जनयतीति तदनुकूलत्वादिनिगमनं (न) व्यर्थमिति । एतेनाबाधितत्वज्ञानस्यानुमितिहेतुत्वे तद्विषयकत्वमपि परामर्शे स्वीकार्यम् । तथा च परामर्शविषयाबाधत्वेनासिद्धिसम्भवतो बाधादे

स्यादित्यप्रसिद्धान्त । किञ्चाबाधितत्वज्ञान सा यज्ञानमेव । तथा च साध्यज्ञान सा-ध्यज्ञानहेतुरिति फलितमिति सिद्धसाधनादनुमित्यनवतार एव न्यादित्यादिवाक्येन णदपास्तम । अबाधितत्वज्ञानहेतुत्वस्य मणिसारानभिमतत्वेनोक्तदोषविरहात् । यथा चैव सति न निगमनानर्थक्य, तथा च व्युत्पादितमेव ।

केचित्तु — अनुमितावबाधितत्वप्रमाया गुणत्वेन हेतुत्वमिति सशयनिश्च यसाध रणमबाधित यज्ञानमनुमितित्वावच्छेदेन हेतुरेव । अत एव न सिद्धसाधन णि । यथा चेवमति नासिद्धावन्तर्भावस्तथाग्रे वक्ष्यत इति यथाश्रुत एव मणि साधीयानित्याहु ।

ननु निगमनेन कथमबाधितत्वासत्प्रतिपक्षितत्वभान । सा यप्रतिवादक तामात्रेण तथात्वे प्रतिज्ञाया अपि तथात्वापत्तादिति चेत्, न । प्रतिज्ञायास्तेन साध्यस्य प्रतिपादनेऽपि सा ध्याभावाव्यभिचरितत्वानुपदर्शनाद् न तत्र सा ध्याभा वव्युदासायगम । इह तु तस्मादित्यनेन याप्यधूममुद्भावयता वह्नियाप्यदर्शन स्यैव जननाद् नात्र यद्वचभावोऽतीति ज्ञायते । तच्च ज्ञा मानसमनुमानिक येति न कश्चिद् विरोध । यद्वा, साध्ये पुनर्वचनन्यानुवादतया प्रयोजनजिज्ञासाया बाधाद्यभाव एव प्रयोजन पारिशेष्यादवसीयते । तथा व्युत्पत्ति । सा चादिविरह ज्ञान च पूर्वोक्तप्रकारेणेव । सा-ज्ञात्रिगमनानभिमतत्वात् । अवदार्थत्वादवाक्यार्थत्वाच्च । यद्यपि व्युत्पत्तिस्तात्पर्यज्ञान, तच्च शब्दोपात्त विना वादिवाक्ये न निर्णयति । तथाप्यनादितात्पर्य व्युत्पत्ति । सा चानादिलक्षणाबद् वादिवाक्येऽपि संभवत्ये येति न कोऽपि दोष इति ।

इद तु बोध्य — न्यायप्रसाये नाय हेत्वाभास तदुद्भावनायोगादिति कण्ठोद्धारकरणाय, यथा नदानव इत्यादिदृष्टान्तप्रयोगश्च सामयिक इति सक्षेप ॥

इति निगमनम् ॥

अथ हेत्वाभासलक्षणानि ।

अथ हेत्वा । तत्र निर्णयविरुद्धयोरुक्त मणिकृता । तत्रानुमिति साध्यनिरूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानत्वमिति मणिकृत । ननु

दयुक्त, व्यभिचारादिज्ञानाभावस्यानुमित्यहेतुत्वात् करणविषटकहेत्वाभाससमत्वा-च्चेति । न चानुमितिप्रतिबन्धनियतयथार्थज्ञानविषयत्वमेव लक्षणार्थं, स च व्यभिचारादावप्यस्तीति नाव्याप्तिरिति वाच्यम् । यथार्थपदेन व्यभिचारित्वभ्रमवि-षयसद्धेत्वतिव्याप्तिनिरासेऽपि षट्पदार्थौ वह्निव्यभिचारिणावित्येकाकारयथार्थविषय-तालाभाय सद्धेतुधूमादाविव तादृशेऽपि दुर्लभत्वात् । न च यद्विज्ञानविषयतया यज्जन्या-नुमितिप्रतिबन्धकत्वं तद्विज्ञाने यथार्थत्वं ज्ञानस्य विवक्षितमिति वाच्यम् । बाधित-विज्ञानसङ्गतेः । तत्र पक्षनिष्ठसाध्याभावविषयकतया तज्ज्ञानस्य प्रतिबन्धकतया लिङ्गविषयकस्य प्रतिबन्धकत्वाभावात् । किञ्च, सत्प्रतिपक्षेऽव्याप्तिरिति । प्रतिबन्ध-कीभूतविरोधिव्याप्त्यादिज्ञानस्यायथार्थत्वादिति ।

अत्र केचित् — बाधायामपक्षधर्मो हेतुरनैकान्तिको वेति न्यायाद् व्यभि-चारित्वानुपपत्तेन तस्य सङ्ग्रह इति व्याचक्षते । सत्प्रतिपक्षेऽप्यसिद्ध्यादिसङ्गी-र्णेऽसिद्धत्वादिनैव सङ्ग्रहः । सद्धेतुप्रतिबन्धे तु स्वीयव्याप्त्यादिधीरेव दशावि-शेषे विरोधिनीति तथार्थत्वादेव लक्षणं नेयम् । एवमनाधारणेऽपीति । तच्चि-न्त्यम् । यदि बाधितत्वेन सामान्यलक्षणेन न सङ्ग्रहः, तदा विशेषलक्षणेनापि तेन रूपेण सङ्ग्रहो न स्यात् । सामान्यलक्षणोपगृहीतस्यैव विशेष(लक्ष)णेन परि-ग्रहात् । किञ्च, अग्रे वक्ष्यमाणसङ्कीर्णानाधारणोदाहरणस्थलेऽपि सुवचैव । तत्र व्यभिचारित्वानुभवेन तथा सङ्ग्रहसम्भवात् । यत्र सद्धेतु-व्यतिरिक्तादौ स्वीयव्या-प्तिधीरेव विरोधिनीत्यादि । तत्र । स्वीयव्याप्त्यादिज्ञानस्य स्वसाध्यानुमित्यनुकू-लतया तदप्रतिबन्धकत्वात् । न च विरोधि व्याप्त्यादिधीसमवधानावच्छिन्नस्वीय-व्याप्त्यादिज्ञानत्वेनास्तु प्रतिबन्धकतेति वाच्यम् । तथा सत्यावश्यकतया विरो धिव्याप्त्यादिधिय एव प्रतिबन्धकताबीजत्वात् । अन्यथा भूयोऽवयवधानावच्छिनव-ह्नेरपि दाह्यप्रतिबन्धकत्वापत्तेरित्यलमतिजल्पेन ।

मिश्रास्तु — ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको धर्म इह यद्विशिष्टे ज्ञानेऽनुमितिप्रतिबन्धः सम्भवति स विवक्षितः । स च प्रतिबन्धकज्ञानविषयस्तद्-विषयश्च । तत्राद्यो व्यभिचारादिः । अन्त्य सत्प्रतिपक्षादौ विरोधिसामग्रीकालीन-त्वादिः । पारिभाषिकप्रतिबन्धकतावच्छेदकस्य गुरुत्वेऽपि तत्राविरोधात् । तथा चानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वेनोपस्थाप्यो विषयत्वस्य लक्षणार्थोऽयं सत्प्रतिपक्षादावपि सत्त्वात् तत्राव्याप्तिः । अत एव नोद्धार इति यावत् । उपाधि-

ज्ञानेऽपि व्यभिचाराज्ञानदशायामनुमितिप्रतिबन्धानोदेन तन्नियमघटितप्रतिबन्धकतावच्छेदकशून्यत्वात्। अत एव न सिद्धिविषयसा यन्याप्ति हेत्वाभासता, प्रतिबन्धानियमात्। सिद्धावपि सिसाधयिषायामनुमिते । अत एव च नाज्ञानरूपासिद्ध्याद्यतिप्रसङ्गोऽपि। अनुमितिप्रतिबन्धनियमसत्त्वेऽपि ज्ञाननिष्ठप्रतिबन्धकतावच्छेदकस्यात्र लक्षणे प्रवेशात् तन्त्राश्च स्वरूपसत्या एव तथात्वात्। यद्वा, प्रतिबन्धकज्ञानविषय एव ज्ञाने प्रतिबन्धकतावच्छेदकोऽस्तु। तथापि सत्प्रतिपक्षे नाव्याप्ति । विरोधिव्याप्त्यादेरेव प्रतिबन्धकतावच्छेदकस्य प्रतिबन्धलिङ्गे ज्ञानलक्षणसबन्धेन वृत्ते । तच्च ज्ञान परामर्श एव। तेन सम्बन्धेन च तद्वत्त्वधीर्यथार्थव। अथवा लिङ्ग स्वज्ञानद्वारानुमितिप्रयोजकम्। तच्च हेत्वाभासेन वार्यते। तथा च लिङ्गस्यानुमित्यप्रयोजकतावच्छेदकधर्मवत्त्व तद्वत्त्वगोचरयथार्थधीविषयत्व वा लक्षणार्थ । तथा च सत्प्रतिपक्षादावपि लिङ्गनिष्ठानुमित्यप्रयोजकतावच्छेदको धर्मो लिङ्गनिष्ठ एव वाच्य । अन्यनिष्ठाप्रयोजकत्वस्यान्यनिष्ठधर्मानवच्छेद्यत्वात्। समानाधिकरणस्यैवावच्छेदकत्वात्। तथा चानुमित्यप्रयोजकतावच्छेदक सत्प्रतिपक्षे गुरुरपि विरोधिसामग्रीकालीनत्वादिरेव। एव बाधितेऽपि नाव्याभाववत्त्वस्य वृत्तित्वमिति नाव्याप्तिरित्याचक्षते ।

अत्रेद शङ्कयत — भवत्यविषयीभूतमपि पारिभाषिकप्रतिबन्धकतावच्छेदक, तथाप्यव्याप्ति । यत्रातीतेना(ना)गतेन वा लिङ्गेन सत्प्रतिपक्ष , तत्र विरोधिज्ञानसामग्रीकालीनत्वस्य तादृशलिङ्गेऽसत्त्वात्। किञ्च, व्यभिचारित्वस्याप्युक्तप्रतिबन्धकतावच्छेदकत्वाभावाद यप्ति । व्यभिचारज्ञाने परामर्शोत्तरजाते सत्यप्यनुमितिप्रतिबन्धाभावात्। कारणस्य परिपूर्णतया तद्विघटनाभावात्। न च परामर्शानन्तर व्यभिचारधीरसभविनी , प्राब्धाभावज्ञानात्। किञ्च, तदानुमितिसामग्रीसत्त्वादनुमितिरेव, न तु व्यभिचारधीरिति वाच्यम्। शाब्दसिद्ध्यनन्तर यत्र शाब्द एव परामर्शस्तदनन्तर प्रात्यक्षिकव्यभिचारधी , तत्र तद्दोषसभवात्। तत्र परामर्शस्य शाब्दतया प्रात्यक्षिकव्यभिचारज्ञानाप्रतिबन्धकत्वात। प्राब्धप्रत्यक्षे प्राब्धाभावप्रत्यक्षस्यैव प्रतिबन्धकत्वात्। न च व्यभिचारधीकालेऽनुमितिसामग्र्यपि। परामर्शपूर्वत्वेन परामर्शसमानकालीनया मिथ्या प्रतिबन्धादिति प्रथमपक्षो न घटते । द्वितीयपक्षोऽपि न क्षोदक्षम । विरोधिव्याप्त्यादे प्रतिबन्धलिङ्गेन सह ज्ञानसम्बन्धकल्पने मानाभाव । भावे वा धूमो वह्निव्यभिचारीति

भ्रमस्यापि व्यभिचारेण सह धूमत्व सम्बन्धत्व प्रसज्येत । तथा च सद्धेतौ लक्ष णातिव्याप्ति । न च ज्ञान न सर्वत्र सम्बन्ध , किन्तु फलबलात् क्वचिदेव। तथा चेदमनेन सत्प्रतिपक्षितमिति ज्ञानस्य यथार्थत्व यवहारात् तज्ज्ञान सम्(न्धे न्ध त्वे)न कल्प्यते । धूमो वह्निव्यभिचारीति ज्ञानस्यायथार्थत्वव्यवहारान्न तज्ज्ञान त सम्बन्धरूपमिति नव्यदूषण न भ यामिति वाच्यम् । उक्तपरामर्शरूपज्ञानस्य विरोधिलिङ्गनिष्ठव्याप्त्यादिसम्बन्धे एकहेतौ बाधावतारेऽपि सत्प्रतिपक्षस्य दुर्वा रत्वापातात् । तज्ज्ञानस्य तदाप्यविशिष्टत्वात् । किञ्च, अनुमितिप्रतिबन्धकतावच्छेद को धर्मो व्यभिचारित्वादि , तद्वत्त्वमाश्रयाश्रयिभावेन, ज्ञानरूपप्रतिबन्धकतावच्छेद कत्व च विषयविषयिभावेनेत्यननुगम । यथाकथञ्चित् तद्वत्त्वमात्रस्य चाति-प्रसङ्गपराहतत्वादिति । तृतीयपक्षोऽप्ययुक्त , धूमस्यापि व्यभिचारभ्रमदशाया वह्यनुमित्यप्रयोजकतया तन्निष्ठस्य व्यभिचारभ्रमकालीन स्याप्यनुमित्यप्रयोजक-तावच्छेदकतया तद्वत्त्वज्ञानमादाय सद्धेतावतिव्याप्तेर्वज्रलेपायितत्वादिति ।

अत्रायमाशयो मिश्राणा — विरोधिज्ञानसामग्रीकालीनत्व तत्कालीनव्या-प्त्यादिमत्तया ज्ञायमानत्वम्। तच्चातीतानागतलिङ्गस्थलेऽप्यस्त्येवेति न तत्र सत्प्र तिपक्षेऽव्याप्ति । यद्वा, तत्कालसम्बन्धो विरोधिसामग्र्यैवेक्षिप्त (न ')तत्र प्रति-बन्धकतावच्छेदकम्। तच्च तत्राप्यस्त्येव, अनेनेद सत्प्रतिपक्षितमिति प्रतीते । नच व्यभिचारज्ञाने सत्यपि प्रतिबन्धानियमात् तत्राव्याप्तिरित्यवादि , तदपि न । परामर्शानुत्पत्तिकालीनत्व द्विशिष्टज्ञानेऽवश्य प्रतिबन्धनियम , तद्वत्त्वस्यात्र प्रतिब न्धकतावच्छेदकत्वेन विवक्षितत्वात् । अस्ति चैतद् व्यभिचारेऽपि । परामर्शपूर्व ज्ञातेऽनुमित्यनुत्पादनियमात् । न च बाधस्य परामर्शोत्तर प्रतिबन्धकत्वात् तत्राव्याप्ति । तदुत्तर प्रतिबन्धकत्वेऽपि तत्पूर्वमपि प्रतिबन्धकत्वाविरोधात् । उपा धौ तु परामर्शपूर्व ज्ञाते अनुमितिप्रतिबन्धो नावश्यक । व्यभिचारज्ञानानावश्य कत्वात् ।

नन्विदमप्ययुक्त — परामर्शपूर्वमन्योन्याभावगर्भव्याभिचारज्ञाने सत्यप्य त्यन्ताभावगर्भव्याप्तिज्ञानादनुमित्युत्पत्तेरिति चेद्, न । अन्योन्याभावगर्भव्याभि चारज्ञाने सत्यत्यन्ताभावगर्भव्याप्तिज्ञानस्यासम्भवात् । *तच्च साक्षात् तद्गर्भव्य-

---

* तच्च अनुभवन च ।

भिचारोन्नायक(तार्तया) वेति न कश्चिद् विशेष । यच्च — विषयविषयिभावप्रतिबन्धकतावच्छेदकस्य स्त्रिन सह ज्ञान विशेषणत्वादेर्यदि सम्बन्ध, तदा बाधकतारेऽपि सत्प्रतिपक्षतापत्ति, ज्ञानस्य तदापि सत्त्वादिति दूषणमुक्तम् । तदपि न । ज्ञानस्य हि व्यवहारबलादगत्या तत्सम्बन्धवत्त्वाभ्युपगमेन बाधसंशयदशाया तत्सम्बन्धवत्तविरहात् । घटसत्त्वदशाया भूतलस्य घटाभावसम्बन्धवत्त्वानभ्युपगमवदत्रापि कदाचित् सम्बन्धवत्त्वे दोषाभावादिति । यदपि — दृष्टत्वं कदाचिदाश्रयाश्रयिभावेन कचिच्च विषयविषयिभावेनेत्यननुगम इति दूषणमुक्तं तदपि न । यादृशसम्बन्धेन तद्वत्तामादाय व्यभिचारितामिद सत्प्रतिपक्षितमिदमिति धी, तादृशसम्बन्धत्व लक्षणप्रवेशात् । स च क्वचिदाश्रयाश्रयिभाव, क्वचिद् विषयविषयिभाव इति । यत्तुनान्तु — सर्वत्रानुमितिप्रतिबन्धकतावच्छेदकधर्मनिरूपितस्वरूपसम्बन्धविशेष एव तद्वत्तानियामक । स च तादृशसम्बन्धत्वेनानुगत इति ना(न)नुगम । अत एव यत्र निरन्तरपरामर्शद्वयसत्त्वात्सत्प्रतिपक्षः तत्र विषयविषयिभावेऽपि विशेषविशिष्टेन सह तज्ज्ञानमात्मसिद्धिरिति दिक्।

इदं तु शङ्क्यते — लक्षणमिद व्यभिचारादौ धर्मेऽति व्याप्त, धर्मिण एवात्र हेतुत्वात् । न च हेत्वभिमतत्वे सतीत्यपि तद्धारकविशेषण देयमिति वाच्यम् । कदाचित् कुत्रचिद् व्यभिचारिधर्मस्यापि हेत्वभिमतत्वात् । सर्वदा सर्वधर्मिणोऽपि हेतुत्वेनानभिमतत्वात् । किञ्च, ज्ञानविषयत्व विशेषणमुपलक्षण वा । नाद्य । तादृशज्ञानाभावदशा नित्यदोषत्व साधारणादेर्हेत्वाभासत्वप्रसङ्गात् । नान्त्य । अनाधारणसत्प्रतिपक्षादेर्नित्यदोषत्वापि विशेषदर्शनदशायामपि हेत्वाभासत्वापत्तेः । किञ्च, यत्पुरुषीयतादृशज्ञानविषयत्व यस्य तस्य तं प्रत्येव हेत्वाभासत्वम्, उताथ प्रत्यपि वा । नाद्य । विरुद्धादेरनित्यदोषस्य तत्राग्राहिपुरुषं प्रत्यनाभासतापरसङ्गात् । नान्त्य । अनाधारणादेर्विशेषादर्शनात् तथा ज्ञायमानस्य विशेषदर्शिन प्रत्यपि दोषतापरसङ्गात् ।

अत्राहु — अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगाहित्वयथार्थधीविशेष्यत्व विवक्षितम् । व्यभिचारस्तु धर्मस्तादृशधीविशेषणमूना इति नातिव्याप्ति । तादृशधीविशेष्यत्व च विशेषणमेव । तच्च ईश्वरज्ञानविशेष्यत्वमादाय विरुद्धादिनित्यदोषे सर्वदास्तीति नाव्याप्ति । सत्प्रतिपक्षादौ त्वनित्यदोषत्वनिर्णयादीश्वरधीविरहकल्पनात् । फलमौचित्यात् तस्या । पुरुषान्तरीयतादृशधियमा

दाय पुरुषान्तरे च नाभासता । विशेषतः पुरुषादेरत्राप्रवेशात् । तादृशज्ञानविषयस्य हेत्वाभासत्वमित्येवाङ्गीकारात् । तत्पुरुषादिहेत्वाभासत्वस्य विशि(ष्य ? ष्या)निरूपणादिति ।

नन्वेवमपि बाधसामग्र्यां लक्षणमतिव्यापकमेव । तस्या अपि विरोधिज्ञानसामग्रीत्वेनानुमितिप्रतिबन्धकत्वात् । एव प्रत्यक्षसामग्र्यामतिव्याप्तिः । सशयोत्तरप्रत्यक्षे तस्या अनुमितिप्रतिबन्धकत्वकल्पनादिति चेद्, न । अनुमितिप्रतिबन्धकत्वं हि न सर्वानुमितिप्रतिबन्धकत्वम् । असिद्धेः । हेत्वाभासेनाप्यसाधकतानुमित्युत्पादनात् । नापि प्रकृतानुमितिप्रतिबन्धकत्व, सिद्धयसिद्धिव्याघातात् । किन्तु तत्पक्षकतत्साध्यकतल्लिङ्गकानुमितित्वावच्छिन्नप्रतिबन्धकत्वम् । तच्च न प्रत्यक्षसामग्र्याः, तस्या भिन्नविषयकतादृशानुमित्यप्रतिबन्धकत्वात् । समानविषयकप्रत्यक्षसामग्र्या एव बलवत्त्वात् । बाधसामग्र्याश्च विरोधिज्ञानसामग्रीत्वेन प्रतिबन्धकता । तथा च सत्प्रतिपक्ष एवान्तर्भावः । न तु विरोधिबुद्ध्युपहितसामग्रीत्व सत्प्रतिपक्षविलक्षणं तत्र प्रतिबन्धकतावच्छेदकम् । मानाभावाद्, अन्यत्र सिद्धधर्मावच्छेदेनैव त(त्र क ? त्क,ल्पनौचित्यात् । विरोधिबुद्ध्युपधानमिह स्वकारणान्न सत्प्रतिपक्षस्थल इत्यन्यदेतदिति तत्त्वम् ।

वयन्तु विवेचयामः — अनुमितिप्रतिबन्धकतावच्छेदकधर्मपदमिह व्यभिचारादिपञ्चकपरमेव । सामान्यपदस्य विशेषपरत्वात् । तथा चैतत्पञ्चकरूपानुमितिप्रतिबन्धकतावच्छेदकधर्मवदिद पञ्चकं हेतुत्वाभिमतमिति *समूहालम्बनरूपविशेष्यत्वमुक्तलक्षणार्थं इति नोपाध्यादौ कुत्राप्यतिप्रस(ङ्गात् ? ङ्ग)संभावनापीति । इदं त्ववश्य वाच्यमेव । अन्यथोपाध्यादावतिप्रसङ्गो वक्तुमपि दुर्वार एव । तथाहि — ज्ञा(न?ना)विषयीभूतप्रतिबन्धकतावच्छेदकपक्षे सत्प्रतिपक्षे विरोधिज्ञानसामग्रीकालीनत्वस्य स्वरूपतः प्रतिबन्धकतावच्छेदकत्ववद् उपाधावपि स्वरूपसद्व्यभिचारानुमित्युपधानकालीनत्वस्य तादृशत्वेनातिव्याप्तेः । तादृशे सत्युपाधिज्ञानेऽनुमितिप्रतिबन्धकतानियमात् । किं बहुना, व्याप्तिज्ञानकालावच्छिन्नभिन्नज्ञानेऽगत्यनुमित्यनुत्पादनियमादज्ञानरूपाभिच्यतिव्याप्तिः । एव सिसाधयिषाविरहकालीनत्वविशिष्टे साध्यज्ञाने सत्यनुमितिप्रतिबन्धनियमात् सिद्धिविषयसाध्यस्यापि हेत्वाभास

---

*. समूहालम्बनरूपो समूहालम्बनज्ञानत्वधर्मः ।

तावच्चिरित्येव बहुविधः प्रसज्येत । एवं प्रतिबन्धकज्ञानविषयत्वेन प्रतिबन्धकतावच्छेदकत्वमिति पक्षेऽपि किमेकदेशज्ञानस्य प्रतिबन्धकत्वे तद्विशिष्टस्यापरस्य ज्ञायमानस्य वापि प्रतिबन्धकतावच्छेदककोटिप्रवेशः, उत यावत एव ज्ञानस्य प्रतिबन्धकतावत एव तत्र प्रवेश इति । नान्त्यः । साधारणत्वादेरपि प्रतिबन्धकतावच्छेदकत्वं न स्यात् । साध्याभावनिश्चय(यविष)यीभूतसाध्याभाववद्वृत्तित्वस्य साधारणत्वस्य साध्यांश(स्य')निश्च(यविष)यीभूतसाध्यवद्वृत्तित्वस्यासाधारणत्वस्य च साध्याभावनिश्चयसाध्यनिश्चयघटिततया तस्य चाज्ञायमानस्यैव तत्र प्रवेशाङ्गीकारात् । नाद्यः । स्वरूपसद्व्यभिचारानुमित्युपधानावच्छिन्न(स्य) साध्यव्यापकत्वादेर्ज्ञायमानस्य योपाधेः, स्वरूपसत्त्वेनाधिपाधिरहितावच्छिन्नस्य साध्यस्य ज्ञायमानस्य सिद्धसाधनं, स्वरूपसद्गृहीतव्याप्त्याश्रयत्वविशिष्टस्य (ज्ञायमानस्य) हेनोरज्ञानादावनुमितिप्रतिबन्धकतावच्छेदकत्वापातादित्यतिप्रसङ्गस्य दुर्वारत्वात् । तस्मादुक्तार्थ एव ग्राह्य इति संक्षेपः ॥

इति हेत्वाभाससामान्यनिरुक्तिः ।

अथ सव्यभिचारसामान्यनिरुक्तिः ।

ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च । तत्र सव्यभिचारो द्वेधा साधारणासाधारणानुपसंहारिभेदात् । तत्र व्यभिचारोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं लक्षणमिति मणिकृतः । अत्रायमर्थः साध्यं यावति निश्चयविरोधिसंशयजनकोभयकोट्युपस्थितिजनकज्ञानविषयतावच्छेदकधर्मवत्त्वम् । तेन केवलान्वयिसाध्यकानुपसंहारिणि नाव्याप्तिः । तत्र साध्यतदभावसंशयासम्भवेऽपि साध्यपक्षवृत्तित्वतदभावसंशयस्य व्याप्तिनिश्चयविरोधित्वात् । केवलान्वयिसाध्यकानुपसंहार्यत्र लक्ष्ये एव नेत्यपि कश्चित् । तादृशधर्मश्च सपक्षविपक्षवृत्तित्वं, सपक्षविप(क्ष'क्षा)वृत्तित्वं, साध्यसंशयविषयमात्रवृत्तित्वमिति त्रितयन(पि'मि)लितम् । नन्वात्मत्वाभिधेये संदिग्धभूतज्ञाने लक्षणमिदमतिव्याप्तं, साध्यसंशयजनकोटिद्वयोपस्थितिरूपप्रामाण्याप्रामाण्यकोट्युपस्थितिजनकज्ञानविषयतावच्छेदकज्ञानत्वरूपधर्मवत्त्वाज्ज्ञानं यापीति चेत्, न । साध्यसंशयविषयवृत्तितया य

ज्ञानस्य तादृशकोट्युपस्थापकत्वमित्यर्थात् । ज्ञानत्वज्ञान तु प्रामाण्यसशयविषयवृत्तितया तादृशसशयजनककोट्युपस्थापक, न साध्यसशयविषयवृत्तितया । विवक्षित च प्रकृते तदिति न ज्ञानत्वरूपधर्मवति ज्ञानेऽतिप्रसङ्ग इति वदन्ति ।

अत्र कश्चिद् — व्यभिचारित्वस्यापि साधारणधर्मदर्शनादित्येनैव तादृशतदुपस्थापकता, न तु सशयविषयवृत्तित्व तदुपस्थापकताया तन्त्रमित्यसिद्ध लक्षणमिति दूषणमाह । तन्न । साध्यसशयविशेष्यवृत्तितानियता यस्य तादृशकोट्युपस्थापकतेत्यर्थात् । भवति च साधारणे बह्वयादौ गृहीते इद धूमवन्न वेति सशय इति तस्य साध्यसशयधर्मिवृत्तितानियतेव तदुपस्थापकता । ज्ञानत्व(न?) तु साध्यसशयविशेष्यवृत्तित्वेपि प्रामाण्यसशयविशेष्यवृत्तितामात्रेण तदुभयकोट्युपस्थापकमिति ज्ञानपक्षकानुमित्यादा ज्ञानत्वस्य सशयविषयवृत्तित्वेऽपि तन्नियमाभावान्नातिप्रसङ्ग इति तत्त्वम् । यत्तु — यत्तुभयकोट्युपस्थापकतावच्छेदकत्व प्रामाण्य एवातिप्रसक्तमित्याशङ्क्योक्तक्रमेण परिहरन्ति केचित् । तद्भान्त्या । प्रामाण्यानुपस्थितेरेवोभयकोट्युपस्थितिरूपतया तज्जनकज्ञानविषयत्वस्य प्रामाण्येऽभावेन शङ्कानुत्था(पा?)नादिति केचित् । तदपास्तम् । प्रामाण्योपस्थित्यनन्तरमथापस्थितेरपि भावेन तज्जनकज्ञानविषयत्व य प्रामाण्ये शङ्कितु शक्यत्वात् । तस्मात् तत्रेद दूषण — प्रामाण्यस्यार्थमात्रकोट्युपस्थापकत्वमेव, अप्रामाण्यस्य चार्थाभावकोट्युपस्थापकत्वमेवेति प्रामाण्येऽप्रामाण्य वा नोभयकोट्युपस्थापकत्व शङ्कितु शक्यत इति ।

नन्वेवमपि शब्दोऽनित्य शब्दत्वादित्यत्र पक्षे सा यानिश्चयदशाया शब्दत्वस्यानित्यत्वव्याप्तिर्यत्र शाब्दादिना गृहीता, तद्दशायामनि यात्ति सपक्ष घटादिव्यावृत्तत्वस्य शब्दत्वे तदापि ज्ञानादिति चेत्, न। याप्तिग्रहस्यैव सपक्षवृत्तित्वज्ञानत्वेन तद्दशाया सपक्षव्यावृत्तत्वाज्ञानात् । न च तत्र व्यतिरेकसहचारात् व्यतिरेकव्याप्तिग्रह , तद्दशाया सपक्षव्यावृत्तत्वज्ञानादितिव्याप्तिरिति वाच्यम् । व्यतिरेकसहचारादन्वयव्याप्तिग्रहमत एवान्य लक्षणत्वात् । अन्यथा याप्तिग्रहस्य च साध्यनिश्चय विनानम्भवात् पक्ष एव साध्यनिश्चय इति तद्व्यावृत्तत्व य तदा ज्ञानासभवादिति । यद्वा, विशेषादर्शनदशायामेव सपक्ष यावृत्तत्वज्ञान सशय

१ 'अ भ' क पाठ

कोट्युपन्यापकमिति विशेषदर्शनदशायां सपक्षव्यावृत्तत्वज्ञानेऽपि न लक्षणाति व्याप्तिशङ्केति दिक् । यत्तु दूषणमिह नवरूपधायि — सपक्षव्यावृत्तत्वादिज्ञानं नोभयोपस्थापकम् । असाधारणे परस्परप्रतिबन्धेनैकस्याप्यनुपस्थितेरिति । तदसत् । कोट्युपस्थितौ परस्परप्रतिबन्धाभावात् । अन्यथा क्वापि न स्यादित्यसाधारणस्थले विशिष्य दोषाभिधानस्यात्यन्तासङ्गतत्वात् । न च संशये परस्परप्रतिबन्ध । तथा सति संशयोत्पाद क्वापि न स्यादेव । विरुद्धनिर्णयसामग्र्यैव तदुत्पादनादिति न किञ्चिदेतत् ।

इदं तु दूषणमिह संभवति — साधारणत्वं न सपक्षविपक्षवृत्तित्वम् । अयं गौरश्वत्वादिति विरुद्धसङ्कीर्णसाधारणो यात्ते । किन्तु विपक्षवृत्तित्वमात्रम् । तच्च साध्याभावकोटिमात्रोपस्थापकं, तत्सहचर्यात् । न तु साध्यकोट्युपस्थापकमपीत्युभयकोट्युपस्थापकत्वं तत्राव्याप्तमिति ।

अत्र प्रतिभाति — विपक्षवृत्तित्वं दूषकतावीजम् । विभाजकोपाधिस्तु विरुद्धव्यावृत्तं सपक्षविपक्षवृत्तित्वमेव । एवमसाधारणस्यापि सपक्षविपक्षव्यावृत्तत्वमेव विभाजकोपाधिः । दूषकतोपाधिस्तु सपक्षव्यावृत्तत्वमेवेति तत्त्वम् । वस्तुतस्तु साध्यव्याप्यत्वनिश्चयविरोधिसाध्याभाववद्वृत्तिमात्रवृत्त्यहेत्वाभासतोपाधित्वमनैकान्तिकत्वम् । तादृशोपाधिश्च विपक्षवृत्तित्वादित्रयमेव । साध्यसमानाधिकरणेऽपि तत्त्रयस्य वृत्तेः साध्याभाववद्वृत्तिमात्रावृत्तित्वात् । न चैवमपि व्याप्यत्वासिद्धय[1]ति यात्ति । तदन्यत्वस्यापि विशेषणत्वादिति दिक् ॥

इति सव्यभिचारसामान्यनिरुक्तिः ।

अथ साधारणग्रन्थः ।

तत्र साधारणत्वं विपक्षवृत्तित्वमिति मणिकृत । विपक्षत्वमिह साध्यवदन्यत्वम् । अन्योन्याभावगर्भं वाप्तिज्ञानस्यानुमितिहेतुत्वादिति केचित् । तन्न । अन्योन्याभावगर्भव्याप्तिज्ञानस्यैव हेतुत्वमिति पक्षेऽपि अत्यन्ताभावगर्भव्यभिचारज्ञानस्यान्वयव्यतिरेकाभ्यां ग्राह्याभावानवगाहिनोऽपि प्रतिबन्धकत्वात् । वस्तुतोऽत्य

---

१ दन्त्य न' क पाठ

न्ताभावादिगर्भव्याप्तिधीरपि हेतुरवेति यावदभावगर्भो व्याप्तिस्तावदभावगर्भं विपक्षत्वम् । न चैवमननुगम । सहचारज्ञानसहकार्यभावप्रतियोगिज्ञानविषयतावच्छेदकत्वेनानुगमात् । व्यभिचारज्ञानाभावसहकृतसहचारज्ञानस्य व्याप्तिधीहेतुत्वादित्यन्ये । तच्चिन्त्यम् । असहचरि(त)त्वनिश्चया व्याप्यत्वनिश्च(य)योरप्यभावस्य व्याप्यत्वनिश्चयहेतुतया सहचारधीसहकारित्वस्य तदभावेऽपि सत्त्वेन विरुद्धव्याप्यत्वासिद्ध्यतिव्याप्ते । तस्मात् सहचाराप्रतियोगित्वे सतीत्यपि विशेषण देयम् । असहचारविशिष्टासहचारयोश्च विरुद्धव्याप्यत्वासिद्ध्यो सहचारनिरूप्यत्वादति व्याप्तिनिरासात् । यद्वा, अनुमितिहेतु व्याप्तिज्ञाने ग्राह्याभावावगाहि यज्ज्ञान सशयसाधारण प्रतिबन्धक, तत्व साधारणत्वम् । विरुद्धत्वादिसशयश्च न प्रतिबन्धक इति नातिव्याप्तिरिति तत्त्वम् ।

अत्रोपाध्याया — साध्याभाववद्वृत्तित्वज्ञानमात्र प्रतिबन्धक, लाघवात् । न तु निश्चयमात्र, गौरवादिति वदन्ति । तन्न । तथा सति सशयरूपव्यभिचारज्ञानस्य पक्षीयस्य सर्वत्र सत्त्वादनुमानमात्रविलयापातादित्युक्तत्वात् । न च तर्काच्छङ्कानिवृत्तावनुमानप्रवृत्ति । अनुभवविरोधात् । सन्दिग्धसाध्यवति सर्वत्र तर्कापेक्षाया अदर्शनादिति प्रागेवोदितत्वात् । किञ्च, विद्यमानव्यभिचारशङ्का न तर्कनाश्या । तस्या स्वोत्तरभाविगुणा(न[1])न्तरमात्रनाश्यत्वेन तर्कपर्यन्तानपेक्षणात् । नाप्यनागतशङ्कानुत्पादकत्व तर्कस्येति वाच्यम् । तथा सति विद्यमानशङ्काया अनुमानप्रतिबन्धस्य दुर्वारत्वापातात् । न च तर्काभावविशिष्टव्यभिचारधी प्रतिबन्धिकेति व्यभिचारसंशय सत्त्वेऽपि तर्ककाले न प्रतिबन्धक इति वाच्यम् । तथा सति व्यभिचारनिश्चयस्यापि तर्ककाले प्रतिबन्धकता न स्यादिति सशये उत्तेजको वाच्य इति तस्य पृथक् प्रतिबन्धकताकल्पनेऽतिगौरवमिति ।

मिश्रास्तु — साध्याभावाशनिश्चयीभूतसाध्याभाववद्वृत्तित्वज्ञानत्वेन प्रतिबन्धकता । तेन व्यभिचारसशयात् पक्षीयाद् नानुमानविलय । नापि साध्याभावत्त्वेन निश्चिते हेतुसशयस्याप्रतिबन्धकत्वमिति वदन्ति । तदपि चिन्त्यम् । व्यभिचारनिश्चयत्वेनैव घटाभावादि(ति[1])निश्चयवद् ग्राह्याभावनिश्चयत्वेन प्रतिबन्धकत्वम् । न तु सशयस्यापि । विशिष्य तथा कल्पने मानाभावात् । न चैव

---

1 का' क पाठ

सति सन्दिग्धानैकान्तिकोच्छेद् । उपाध्यादिसन्देहाहितव्यभिचारसंशयस्य सन्दिग्धानैकान्तिकत्वात्। तस्य चान्याहितसंशयत्वेन ग्राह्यान्तरसंशयसाधारण्येनैव प्रतिबन्धकत्वात्। तस्मात् ग्वारसिकः साध्याभाववति हेतुसंशयो वा हेतुमति साध्याभावसंशयो वा न दोषः। अन्याहितस्तु प्रतिबन्धक एव। न केवलमिहैव तत्। किन्तु घटाभावादिसंशयेऽप्येवं रीतिरिति प्रतिभाति। वस्तुतस्तु क्वचिद्— व्यभिचारज्ञानस्य न ग्राह्याभावज्ञानत्वेन प्रतिबन्धकता। तथा सत्यत्यन्ताभावगर्भव्याप्तिज्ञानेऽन्योन्याभावगर्भव्यभिचारज्ञानं प्रतिबन्धकं न स्यादिति व्यभिचारज्ञानस्य पृथक् प्रतिबन्धकता वाच्या। तथा चान्यत्राकूतो ग्राह्याभावसंशयः प्रतिबन्धकतया कल्प्यते। ज्ञानत्वेन प्रतिबन्धकतायां लाघवादित्यवोचत्। तदभद्रम्। व्यभिचारज्ञानत्वेन प्रतिबन्धकतायां पक्षीयव्यभिचारसंशयेनानुमानोच्छेदस्योक्तत्वात्। साध्याभावाशनिश्चयीभूतत्वविशेषणे च विपरीतगौरवात्, तदपेक्षया साध्याभाववद्वृत्तित्वनिश्चयत्वस्य लघुत्वात्। किञ्च, कदाचिदस्तु व्याप्तिः। सर्वस्यापि हेत्वधिकरणत्वावच्छेदेन साध्यवत्त्वं ग्राह्यम्। तथा चात्यन्ताभावगर्भायामप्यन्योन्याभावगर्भव्यभिचारधीर्ग्राह्याभावावगाहितयैव प्रतिबन्धिका। अत्यन्ताभावज्ञाने ग्राह्याभावज्ञानत्वेन प्रतिबन्धकत्वात्। साध्यवदन्योन्याभावाभावात्मकसाध्यज्ञाने तद्वदन्योन्याभावज्ञानस्यापि तदत्यन्ताभावज्ञानवत् तत्त्वेन प्रतिबन्धकत्वौचित्यात्। अवश्यं चैतदभ्युपेयमेव। अन्यथा घटान्योन्याभावज्ञानस्य घटत्वज्ञानप्रतिबन्धकता न स्यात्। तदन्योन्याभावस्य ग्राह्यघटत्वाभावानात्मकत्वादित्यलम्। किं बहुना, एवं च साध्याभावाशनिश्च(यवि)याभूतसाध्याभाववद्वृत्तित्वस्य साधारणोपाधित्वे निश्चयाशन्यानित्यत्वादनित्यदोषतापसङ्ग। अन्यथा सपक्षव्यावृत्तत्वरूपासाधारण्योपाधिकस्यासाधारणस्याप्यनित्यदोषता न स्यादिति दूषण शङ्कापथमेव नाधिरोहति। साध्याभाववद्वृत्तित्वस्यैव साधारणोपाधितया निश्चयस्यापवेशेनोक्तदोषाभावात्। न चैवमसाधारणत्वमपि साध्यवद्व्यावृत्तत्वमेवास्विति तत्रापि निश्चयाप्रवेशाद् नित्यदोषतापात इति वाच्यम्। एवं सति सद्धेतो. शब्दत्वस्यानित्यत्ववत सर्वस्माद् व्यावृत्तत्वाभावेनासाधारणत्वाभावप्रसङ्गादिति दिक्। यत्तु मिश्रै. समाहित— याद्विषयतया ज्ञानं प्रतिबन्धकं, तद्विषय-

---

१. 'त्यत्वदा' क पाठ

वच्छिन्ने तस्मिन् सति यत्र प्रतिबन्धनियमस्तत्र तज्ज्ञानविषयस्य नित्यदोषत्वम् । अस्ति चैतत् साधारणत्वे । तज्ज्ञाने सति व्याप्तिज्ञानस्य कदाप्यसंभवात् । असाधारणे तु सपक्षव्यावृत्तत्वज्ञानेऽपि विशेषदर्शनदशायामप्रतिबन्धान्न नित्यदोषत्वमिति । तत्तु विचार्यम् । यादृशस्य ज्ञानस्य विरोधिता, तादृशे सति प्रतिबन्धनियमे सति नित्यदोषत्वमित्येव वाच्यम् । अन्यथा व्यभिचारज्ञाने यत्रापामाण्यशङ्का, तत्र प्रतिबन्धकत्वस्याभावात् तस्याप्यनित्यदोषतापातात् । अस्ति चैतदप्रामाण्यशङ्काशून्यव्यभिचारज्ञानवद् विशेषादर्शनविशिष्टसपक्षव्यावृत्तत्वज्ञानस्य प्रतिबन्धकत्वनियम इति नित्यदोषता तस्य दुर्वारैवेति सङ्क्षेपः ॥

इति साधारणग्रन्थः ।

अथासाधारणग्रन्थः ।

असाधारणत्वं तु सपक्षविपक्षव्यावृत्तत्वम् । तत्र च विपक्षव्यावृत्तिरनुकूलैव । सपक्षव्यावृत्तिर्दूषणम् । तच्च साध्यतदभावोत्थापकतया दूषणमिति मणिकृतः । अत्र साध्यतदभावोभयानुमित्यनुकूलव्याप्तिविशिष्टपक्षधर्मताज्ञानविषयत्वं साध्यतदभावोत्थापकत्वम् । अनुमितिश्च परस्परप्रतिबन्धेन न जायते । अत एवायं तर्हि सत्प्रतिपक्ष एवेत्याशङ्कां मनसि निधाय सत्प्रतिपक्षे द्वौ हेतू अत्र त्वेक एवेति ततो भेद इत्युक्तं मणिकृतेत्युपाध्यायाः ।

अत्र मिश्राः — हेत्वैक्यानैक्यमकिञ्चित्करं हेत्वाभासैक्यानैक्ये । किन्तु प्रतिबन्धकतावच्छेदकैक्यानैक्यम् । तच्च सत्प्रतिपक्षसमानमेवेति कथं तद्भेदः । किञ्च, एकस्य कथं पर-परविरुद्धसाध्यतदभावव्याप्तिग्रहः । एकत्र विरुद्धोभयाज्ञानादिति नैवं व्याख्या युज्यते । किन्तु साध्यतदभावोत्थापकत्वमिह तदुभयानुमित्यनुकूलतदुभयव्याप्तिग्रहसामग्रीसहकृतत्वम् । तथा चात्र साध्याभावहेत्वभावसहचारग्रहः साध्यहेत्वभावसहचारग्रहश्च साध्यतदभावव्याप्तिग्रहकारणं हेतौ (सतः स्तः) इति परस्परविरुद्धव्याप्तिग्राहकसामग्र्या नैकत्रापि व्याप्तिग्रह

---

१. 'यत्वस्य' व पाठ.

इत्यसाधारणस्य दूषकतावीजम् । अत एव यद्येव तदा सत्प्रतिपक्षे कथं परस्परविरुद्धव्याप्तिग्रह इत्याशङ्कायामुक्तं सत्प्रतिपक्षे द्वाविति । तथा चैकस्मिन् परस्परविरुद्धव्याप्तिग्रहो न सम्भवति, न तु भिन्नेऽपीति न विरोध इत्याहुः ।

अत्र चैतत् तत्त्वम् — अन्वयव्याप्तिग्रहः प्रकृते शङ्कितोऽपि न । एकहेतोः साध्यतदभावोभयनियतसामानाधिकरण्यस्य साध्यतदभावयोरैक्याधिकरण्ये पर्यवसन्नस्य विरुद्धतया ज्ञातुमशक्तेः । व्यतिरेकव्याप्तिग्रहस्तु सम्भवति । शब्दत्वाभावे नित्यत्वानित्यत्वव्यापकत्वग्रहे बाधकाभावात् । तदपि वृत्तिमत्त्वस्फूर्तिदशायाम् । वृत्तिमत्त्वस्फूर्तावपि यद् वृत्तिमत् तन्नित्यानित्यान्यतरवृ(त्तिरि)त्याकारकव्याप्तिस्मृत्यभावे सत्युभयव्यापकत्वग्रहो न विरुद्ध इति तादृशस्थले सत्प्रतिपक्षतयैवासाधारणस्य दोषता । तदभिप्रायेणैवोपाध्यायोक्तिरपि । यदि च वृत्तिमद् नित्यानित्यान्यतरवृत्त्येवेति स्फूर्तिः, तदा व्यतिरेकव्याप्तिग्रहोऽप्यसम्भवी । सकलनित्यव्यावृत्तत्वस्य सकलानित्यव्यावृत्तत्वस्य च शब्दत्वे वृत्तिमत्त्वेन ज्ञाते ज्ञातुमशक्यत्वात् । तथा च सपक्षविपक्षव्यावृत्तत्वज्ञानरूपसाध्यतदभावव्याप्तिग्रहसामग्रीसम्भवे सत्प्रतिपक्षान्न व्याप्तिनिश्चयः । किन्तु परस्परव्याप्तिसंशय इत्यसाधारणस्य दूषकतावीजम् । इदमेवाभिप्रेत्य व्याप्तिग्रहसत्प्रतिपक्षः पक्षधरमिश्रैरुक्त इति ।

इदं त्ववधेयम् — विरुद्धव्याप्तिग्राहकसामग्रीत्वेनासाधारणस्य दूषकतापक्षेऽपि हेत्वैक्यमकिञ्चित्करम् । हेतुनानात्वेऽपि तत्सम्भवात् । यथा शब्दनित्यः पटत्वाद्, नित्योऽयं तन्तुसमवेतद्रव्यत्वादित्यत्र । इहैकत्रैवाधिकरणे उभयहेत्वोरुभयसाध्यव्याप्तिग्रहप्रसक्तौ विरोधेन तदग्रहात् । अत्र त्वेक एवेति मणेरेकाधिकरण एवेत्यर्थादिति दिक् ॥

इत्यसाधारणग्रन्थः ।

अथानुपसंहारिग्रन्थः ।

अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षक इति वदन्ति । अस्यार्थः —

---

१ क्य द्वि' क पाठ

स्वरूपसत्साध्यसिद्धिनिवर्त्यसंशयविषयोपस्थितेर्या(त १ व)द्वस्तुवृत्तित्वव्याप्तिग्राहक-सत्ताकत्वम् । अत एव केवलान्वयिसाध्यकानुपसंहारिण्यपि नाव्याप्ति । साध्यसिद्धिनिवर्त्यसंशयत्व प्रमेयत्वमिह न वेत्यादिरूपस्य तत्राप्ति प्रसिद्धे । अत एव च यत्र वह्निसन्देहस्तत्र सर्वत्र धूमस्य सकलवृत्तित्वेनाज्ञानान्न(?)व्याप्तिसम्भावना, तत्रापि व्याप्तिग्राहक(त्व?)स्य धूमसत्त्वस्य धूमाभावसत्त्वस्य च सर्वत्र ज्ञानात् । ननु तथापि सकलधूमाधिकरण एव यत्र वह्निसन्देह , तदनन्तर सर्वं धूमवद् वह्निमदित्यनुमिति , तदानुपसंहारित्व न स्यात् । यावदुन्नीतवस्तूना साध्यसंशयाविषयत्वादिति चेद् , न । तत्र व्यतिरेकसहचारेण व्याप्तिग्रहसम्भवादनुपसंहारित्वाभावस्येष्टत्वादिति । यथाश्रुते तु सर्वं प्रमेयमित्यादौना विशेषदर्शनदशायामपि केवलान्वयिधर्मावच्छिन्नपक्षकत्वेनानुपसंहारित्वापत्ति , सर्वं धूमवद्वह्निमदित्यस्य विशेषादर्शनदशायामप्यनुपसंहारित्वाभावापत्ति , केवलान्वयिधर्मावच्छिन्नपक्षत्वाभावादित्यादि दूषण द्रष्टव्यम् ।

अत्र वदन्ति — अनुपसंहारी न हेत्वाभास । हेतुमति सर्वत्र साध्यसंशयात् सहचारनिश्चयाभावेन व्याप्तिनिर्णयाभाव । कारणाभावादेव कार्याभावोपपत्तौ प्रतिबन्धकाकल्पनात् । किञ्च, हेतुमति साध्यसन्देहो व्यभिचारसंशय । स च न प्रतिबन्धक । पक्षीयसाध्यसंशयनानुमानमात्रोच्छेदप्रसङ्गात् । भवतु वा प्रतिबन्धक । तथापि साधारण एवायमन्तर्भूता न पृथग् हेत्वाभास इति ।

अत्र मिश्रा — हेतुमति सर्वत्र साध्यसंदेहोऽनुपसंहारी । स च हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धक । हेतुमति साध्यसंशयानन्तर हेतु साध्यसमानाधिकरणो न वेति संशयस्यौचित्यावर्जितत्वात्, प्रामाण्यसंशयवदिति वदन्ति ।

अत्र कश्चित् — संशयसामग्री न निर्णयप्रतिबन्धिका । कारणाभावादेव तदा निर्णयाभावात् । तथा च सहचारनिश्चये कथमन्य प्रतिबन्धकत्व, येन हेत्वाभासता स्यादित्याह । त(न्नि?न । नि)श्चयद्वयसामग्र्या एव संशयजनकतया तदप्रतिबन्धकत्वे संशयकाले निर्णयापातस्य दुर्वारत्वादिति ।

---

१ 'तवेपयात' क पा

अन्ये तु — हेतुमति सर्वत्र साध्यसंशयः साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन यदि प्रतिबन्धकः, तदा प्रथमसंशयसामग्र्यपि प्रतिबन्धिकास्तु । संशयसामग्रीत्वाविशेषादिति । तदपि न । हेतुमति साध्यसन्देहस्य स्वारसिकस्याप्रतिबन्धकतया तत्सामग्र्या न प्रतिबन्धकता । प्रतिबन्धकसामग्रीत्वाभावात् । हेतुमति साध्यसन्देहाहितस्य हेतुसाध्यसामानाधिकरण्यसंशयस्यान्याहिततया प्रतिबन्धकत्वेन तत्सामग्रीभूतस्य प्रथमसन्देहस्य प्रतिबन्धकत्वौचित्यादिति दिक् ॥

इत्यनुपसंहारिग्रन्थ ।

अथ विरुद्धग्रन्थः ।

विरुद्धश्च साध्यव्यापकाभावप्रतियोगीति मणिकृतः । नन्विदं लक्षणमाकाशादिवृत्तिसाध्यकविरुद्धान्यातम् । साध्याधिकरणाप्रसिद्ध्या हेत्वभावे तद्व्यापकत्वासंभवात् । न च तस्यासंग्राह्यत्वमेवास्तु । दूषकतावीजसामानाधिकरण्यज्ञानविरोधित्वस्य सत्त्वेनासग्राह्यत्वाभिधानस्य निर्वचनासामर्थ्यद्योतकत्वात् । किञ्च, साध्यव्यापकाभावप्रतियोगिसंबन्धकत्वज्ञानमपि सामानाधिकरण्यज्ञानविरोधिहेत्वाभासान्तर स्यात् । उक्तविरुद्धोपाध्यनन्तर्भावादिति ।

अत्र वदन्ति — साध्यव्यापकाभावप्रतियोगित्वं न सकलविरुद्धसाधारणं विभाजकत्वेनोक्तम् । किन्तु क्वचिदेतत् क्वचिदन्यदित्युक्तदोषाभावः । न चैवं विभाजकोपाधि सर्वसाधारणो न प्राप्त इति वाच्यम् । हेतुनिष्ठसामानाधिकरण्यधीप्रतिबन्धकनिश्चय(ता)विषयतावच्छेदकधर्मवत्त्वेन सर्वसाधारणानुगमकरणात् । अत एव किञ्चेत्यादिदोषोऽपि निरस्तः ।

अत्र केचित् — हेतुमति साध्यस्य ग्राह्यतया हेतुमति साध्याभावज्ञानं (साध्य)ग्र(ह)प्रतिबन्धकं, ग्राह्याभावग्राहित्वात् । न तु साध्यवति हेतुर्ग्राह्यः, येन साध्यवति हेत्वभावधीर्विरोधिनी स्यात् । किञ्च, सद्धेतावपि साध्य(वाक्य?बल्य)योगोलकादौ धूमाभावसत्त्वात् तत्रापि सामानाधिकरण्यज्ञानं न स्यादिति । तद(प्यु?प्यनु)पपत्तिविलसितम् । साध्यहेतुसामानाधिकरण्यस्य ग्राह्यस्य हेतुमति

सर्वत्र साध्याभावज्ञानाद्वा साध्यवति सर्वत्र हेत्वभावज्ञानाद्वा विघटनात्। ऐक्याधिकरण्यस्य तत्रापि विरोधे सत्यसम्भवात्। अत एव न (सि ? स)द्धेतावतिप्रसङ्ग.। तत्र साध्यवति क्वचिदेव हेत्वभावज्ञानात्। सर्वत्र तज्ज्ञानस्यैव सामानाधिकरण्यज्ञानविरोधित्वात्। अत एव च न व्यभिचारसङ्करोऽपि। हेतुमति साध्याभावज्ञानस्य सामानाधिकरण्यज्ञानाविरोधित्वात्। अत एव 'हेतुमति सर्वत्र साध्याभावज्ञानस्य व्यभिचारज्ञानत्वेनैव प्रतिबन्धकत्वम्। अन्यत्र कल्पनात्। (न) विरुद्धज्ञानत्वेन' इत्यपि कस्यचित् प्रलपितमपास्तम्। हेतुमति सर्वत्र साध्याभावज्ञानस्योभयरू(पत्वेना ? पेणा)पि प्रतिबन्धकत्वात्। साध्यवति सर्वत्र हेत्वभावज्ञानस्य सामानाधिकरण्यधीविरोधिज्ञानत्वेन पृथक्प्रतिबन्धकत्वकल्पनात्। व्यभिचारस्य तत्रासस्पर्शात्। साध्याभावानवगाहित्वात्।

केचित्तु — हेतुमति साध्याभावज्ञान व्यभिचारज्ञानतया, हेतुमति साध्याधिकरणत्वाभावज्ञान ग्राह्यसामानाधिकरण्याभावावगाहितया प्रतिबन्धकम्। तथा च नानयोः सङ्कर इत्याहु ।

अत्र नव्या — साध्याधिकरणत्वाभावज्ञानमपि हेतुमति साध्याभावगाहितया व्यभिचारज्ञानत्वेनैव प्रतिबन्धक, न तु विरुद्धत्वज्ञानत्वेनेति दूषयन्ति। तन्न। हेतुमति साध्याभावज्ञानस्याव्यभिचारज्ञानविरोधित्वेन प्रतिबन्धकत्ववद् हेतुमति साध्याधिकरणत्वाभावज्ञानस्यापि सामानाधिकरण्यज्ञानविरोधितया प्रतिबन्धकत्वात्। ग्राह्याभावानवगाहित्वस्य समानत्वात्। विनिगमकान्तरस्याभावात्। वस्तुत साध्याधिकरणे हेत्वभावज्ञानस्य व्यभिचारज्ञान(स्य ? त्व)शङ्कि नास्तीति तत्रैव विरुद्धस्यासाङ्कर्यमित्यवधेयम्। यत्तु — यभिचारज्ञान सशयरूपेण प्रतिबन्धक, विरुद्धत्वज्ञान च निश्चयरूपमेवेति भेद इति। तन्न। अनभिभारज्ञानस्यापि सशयरूपस्य प्रतिबन्धकत्वे मानाभावात्। [illegible] प्रतिबन्धकत्वसम्भवे व्यभिचारज्ञानस्य पृथक् प्रतिबन्धकत्वाकल्प[illegible] वेदितत्वादिति सङ्क्षेप ॥

इति विरुद्धग्रन्थ ।

अथ सत्प्रतिपक्षग्रन्थः ।

सत्प्रतिपक्षता च सा वादिनो दुष्प्रथापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गतेति मणिकृत । अत्र बाधसामग्र्या प्रतिरुद्धत्वाय हीनबलबलिङ्गेऽति व्याप्तिर्मा भूत् । अत समानपदम् । तदर्थश्च निर्णयाजनकत्वम् । बाधसामग्री च बाधरूपनिर्णयजनिकेति वदन्ति ।

अत्रोपाध्याया —बाधसामग्रीमादाय हीनबलेऽति यातिवारणाय समानपदमित्युक्तम् । (तन्न[1]) अधिकबलत्व य साधे सतयाधिकबलत्वस्य ज्ञानदशायामत्र न्यूनबलत्वज्ञान यावदर्थकत्वात् तेनैव तत्रानुमित्यनुत्पत्तावधिकबलत्वज्ञानस्य प्रतिबन्धकत्वे मानाभावात् । तस्मात् पारिभाषिकमिह प्रतिबन्धकत्वम् । सा च विरुद्धत्वे सति विद्यमानत्वम् । तच्चाप्रतिबन्धकीभूतायामप्यधिकबलोपस्थितावस्तीति तामादाय न्यूनबलेति यातिवारणाय समानपदमित्याहु ।

अत्र मिश्रा —अधिकबलत्व हि गृहीतप्रमात्वम् । तच्चैकलिङ्गस्य यदा, तदापरलिङ्गस्य गृहीताप्रमात्वरूप न्यूनबलत्वमित्यत्र मानाभाव । तदुभयलिङ्गज्ञानप्रमात्वप्रमात्वयोर्भिन्नविषयकतया समानग्रहसामग्रीत्वाभावात् । तस्मादधिकबलत्वज्ञान विरोध्येवेति प्राच्य व्याख्यान भव्यमेव । स्वीयपरिभाषा तु न भव्या । एव सति हीनबलोपस्थितेरपि पारिभाषिकप्रतिबन्धकतामादायाधिकबलोपस्थितौ लक्षणातिव्याप्तेर्दु परिहरत्वात् । नहि समानपदाद् हीनबलोपस्थितिर्वारयितु शक्यते । निर्णयाजनकत्वरूपसमानत्वस्य तत्र सत्त्वादिति दूषयन्ति ।

अत्र नव्या —यदा चैकपरामर्शे प्रमा(त्व)ग्रह , तदापरपरामर्शे(न[1]) च नाप्रमात्वग्रह । तथासति प्रतिबन्धकत्व सत्प्रतिपक्षतैव । प्रमात्वग्रहस्य शिथिलकरत्वात् । अप्रामाण्यशङ्काशून्यत्वयोभयसाधारणत्वात् । तथा च न तत्रातिव्याप्तिशङ्कापि । सत्प्रतिपक्षतयैव सङ्गच्छत्वात् । अथ यदैकत्र प्रमात्वग्रह तदा भिन्नग्रहसामग्रीकमप्यप्रमात्व प्रतिबन्धलिङ्गपरामर्शे गृह्णत इति मत, तदा कारणीभूताप्रमात्वशङ्काशून्यपरामर्शाभावादेवानुमित्यनुत्पाद इत्यधिकबलोपस्थिते

---

१ त क प्र

प्रतिबन्धकत्व नास्त्येवेति न तमादाय न्यूनबलोपस्थितावधीति यामिरित्युपाध्यायो क्तदूषण समीचीनमेवेति वदन्ति ।

अत्र ब्रूम — यत्रोभयोरपि परामर्शयोग्प्रामाण्यशङ्का नास्ति, एकत्र च प्रमात्व गृहीत, तत्राप्रामाण्यशङ्काशून्यत्वस्योभयसाधारणतया प्रमात्वग्रहस्याधिकबलत्वसम्पादकता सभवत्येव । विपक्षबाधकतर्कस्यैकस्यात् । तथा च तत्र गृहीत-प्रमात्वपरामर्शप्रतिरुद्धकार्येऽगृहीतप्रमात्वे परामर्शान्तरेऽतिव्याप्ति सभवत्येवेति तदर्थं समानपदमिति मिश्राशयात् । वस्तुतो य ज्ञान यत्र प्रतिबन्धक, तत्सामग्र्यपि तत्र प्रतिबन्धिकेति बाधसामग्र्या कथ न प्रतिबन्धकत्वम् । बाधप्रतिबन्धकत्वाय यवस्थाप्यत्वात् । यथा च तथा सति बाधसामग्री न हेत्वाभास, तथोक्त हेत्वाभासलक्षणे । वस्तूपाध्यायपरिभाषापक्षे मिश्रदूषणमुक्त — हीनबलोपस्थितिमादायाधिकबलोपस्थितावतिव्याप्तिरिति । तत्तु(न।) अन्यूनाधिकत्वरूपस्य समानत्वस्योपाध्यायाभिप्रेतत्वात्, तस्य च न्यूनबलोपस्थितावधिकबलोपस्थितौ वा विरहेणानतिप्रसङ्गादिति दिक् । अत्र च नाव "व्याप्यवृत्त्यधर्म पर्वतवृत्तित्वादि-त्यत्राय व्याप्यपक्षधर्म इति निर्णयाजनकत्वबाधरूपबलोपस्थिति या प्रतिरुद्धकाय पर्वत-वृत्तित्वरूपलिङ्गेऽतिव्याप्तिर्मा भूत्। अत साध्यविरुद्धोपस्थापनतत्परमेति विशेषणम् । व्याप्तिविशिष्टपक्षधर्मतोपस्थितिजननस्वरूपयोग्यत्व प्रथमविशेषणार्थ । तेन केव-लान्वयिसत्प्रतिपक्षे नाव्याप्ति ।

नन्वाद्य विशेषण तथापि व्यर्थमेव । व्याप्तिविशिष्टपक्षधर्म इति बाधरूपो-पस्थिते बलोपस्थितित्वेन प्रतिबन्धकत्वाभावात् । तथा विपक्षायाश्चावश्यकत्वात् । अन्यथा अनित्यत्वव्याप्य कृतकत्वमिति सत्प्रतिपक्षात्मके परामर्शे नित्यत्वावि-रुद्ध जन्यत्वमित्यपि यत्र दैवादवासित, तत्र विरुद्धत्वेन ज्ञाते जन्यत्वेऽतिव्याप्ति प्रसङ्गात् । विरुद्धत्वज्ञानस्य समूहालम्बनरूपतेन बलोपस्थितिरूपत्वसत्त्वादिति चेद्, न । बलोपस्थितित्वस्य स्व(बलो ' परो)पस्थितिसाधारण्येन प्रतिबन्धकताव-च्छेदकतया साध्यविरो(धित्वा ' धात्वा)देरवश्यकत्वात् । तथा च तद्बलात् साध्य-विरोधिनोऽन्यूनबलोपस्थि(त ' ति)त्व प्रतिबन्धकतावच्छेदक लभ्यते । तदय लक्ष-णार्थ —साध्यविरोध्यन्यूनव्याप्तिपक्षधर्मतोपस्थितित्वावच्छिन्नप्रतिबन्धकता(वन्नि ष्ठा,)निर्णयाजनकताद्यनुपस्थितिप्रतिरुद्धकार्यालिङ्गत्वमिति । सत्प्रतिपक्षे तु परामर्श-द्वय क्वचित् क्वचिदेक एव परामर्श सामग्रीबलाद् भवति । न चायपक्षे द्वितो-

यपरामर्शोत्पत्तिकाले प्रथमेनानुमितिरेव न कुत इति वाच्यम्। सिद्धनन्तर प्रथमपरामर्शोत्पादात् सिद्धिप्रतिबन्धेनाव्यवधानेनानुमित्यजननात्। द्वितीयपरामर्शे(न) प्रतिबन्धे(न?) विनश्यदवस्थेन प्रथमेनानुमित्यजननात्। यद्वा द्वितीयपरामर्शोत्पत्ति काले कार्यत सहभूतस्य तदभावस्याभावेनानुमित्यनुत्पत्ति। अन्यथा विशेषदर्शनकाले सशयापत्तेरिति मणेरप्यत्र स्वरसात्।

नन्वसभवग्रस्तमिदम्, एकत्र परस्परविरोधिसाध्यतदभावयोरिव तद्व्याप्ययोरपि ज्ञानासभवादिति चेद्, न। उभयव्याप्यज्ञानानन्तर साध्ययोर्यत्र विरोधस्फूर्ति, तत्रानुपपत्त्यभावात्। न चैव विरो(धि?ध)स्फूर्तिकाल एवानुमित्यापात, परामर्शस्य वृत्तित्वादिति(?) वाच्यम्। विरोधज्ञानस्य प्रतिबन्धकत्वादिति वदत। तच्चिन्त्यम्। तथा सति विरोधधिय प्रतिबन्धकत्व, न तु परामर्शात्मकसत्प्रतिपक्षस्य। मानाभावात्। तस्मात् साध्ययोर्विरोधावधारणेऽपि हेत्वोर्विरोधानवधारणे एकत्रोभयोपनय सभवत्येवेति ज्याय। उत्तरकाले चानयोर्विरोधिव्याप्यतायामेकाधिकरण्यानुपपत्ति। तदुपपत्ता च विरोधिव्याप्यतानुपपत्तिरिति व्याप्तिपक्षधर्मतान्यतरभङ्ग कल्प्यते। न चैव नदेव दूषणमस्तु। व्याप्यभावज्ञानस्य करणविघटकतयास्य च परामर्शोत्तरभावितया प्रतिबन्धकत्वायोगाद् आद्याभाव व्याप्यज्ञानस्याप्यन्यत्र प्रतिबन्धकतया कल्पनात् प्रतिबन्धकत्वाभावस्य वक्तुमशक्यत्वाच्च। तस्मात् सत्प्रतिपक्षे परस्परव्याप्यज्ञान परस्परनिर्णयाय यत्र वृत्त, (तत्र) परस्परविरोधिव्याप्यज्ञानप्रतिबन्धान्नैकमपि ज्ञान जनयितुमीष्ट इति सिद्धान्त।

अत्र र(क्त?न्न)कोशकृत — विरोधिनिर्णयद्वयसामग्र्या सशयजनकत्वकल्पनात् परम्परगोचरा सशयरूपानुमितिरिहाप्युत्पद्यताम्। सत्प्रतिपक्षार्थोऽप्ययमेव, यत् परस्परप्रतिबन्धाद् व्याप्ययुगलज्ञान निर्णयाजनकमिति वदन्ति।

अत्र मणिकृत — साध्यतदभावयोर्विरोधज्ञानाद् यथैकज्ञान परज्ञान विरोधि, तथा तद्व्याप्ययोरपि साध्यादिविरोधितया तज्ज्ञाने सति सशयरूपमपि साध्यादिज्ञानमसभवि। प्रतिबन्धकत्वे कार्यतादृश्य वक्तुमशक्यत्वादित्याहु।

अत्र वदन्ति — यथा आद्याभावव्याप्यबुद्धे अनुमिता प्रतिबन्धकता, तथा विरुद्धनिर्णयसामग्र्या सशयजनकताऽपि कल्पितेति सशयरूपानुमितिरावश्यका। न च विशेषादर्शनसमवहिता निर्णयसामग्री सशयजनिका, इह तु विशेषदर्शनसमवधानात् कथ सशय जनयत्विति वाच्यम्। अन्यतरकोटिविशेषदर्श-

नस्यैव सशयप्रतिबन्धकत्वात् । न तूभयकोटिविशेषदर्शनस्य । तथा सति स्थाणुत्वपुरुषत्वोभयाशे विशेषदर्शने सति सशयानुत्पादप्रसङ्गात् । तस्माल्लाघवाद् विरोधिनिर्णयसामग्रीत्वेन सशयजनकताकल्पनाद् अन्यतरव्याप्तिज्ञानस्यानुमित्यादौ प्रतिबन्धकता (न) कल्प्यत इति ।

अत्र केचिद् — यदि विरुद्धनिर्णयसामग्रीत्वेन सशयजनकता, तथा सति विरुद्धस्मृतिसामग्रीत सशयरूपस्मृत्यापत्ते । तादृशस्मृतेश्चाननुभवेनेष्टापत्ते कर्तुमशक्यत्वात् । तस्माद् विरुद्धप्रत्यक्षसामग्रीत्वेन सशयजनकता कल्प्यत इति कथ विरुद्धानुमितिसामग्र्या सशय इति । तच्चिन्त्यम् । एतावतापि विरुद्धानुभवसामग्रीत्वेन सशयजनकताया बाधकाभावात् । परे तु — गुणविरोधस्थले विरोधिसामग्र्या प्रतिबन्धकत्व दृष्टम् । तत्र च परस्परप्रतिबन्धेन गुणान्तरानुत्पत्तिरेव दृष्टा । तथेहापि ज्ञानानुत्पत्तिरेव युज्यत इति न सशयरूपानुमितिरिति । तदपि चिन्त्यम् । तत्र विरोधिगुणसामग्रीत्वेन प्रतिबन्धकत्वाद् इह तु स्वाभावज्ञानसामग्रीत्वेन प्रतिबन्धकत्वाद् उभयसाधारणस्य विरोधिसामग्रीत्वस्य निर्वक्तुमशक्यत्वात । यदपि कैश्चित् समाहित — पक्षे साध्याभावप्रत्यक्षेणैव प्रतिबन्ध की ' न्ध)। अनुमित्यादौ तु साध्याभावज्ञानमात्रेण प्रतिबन्ध । तत्रापि साध्याभावज्ञानत्वापेक्षया साध्यविरोधिज्ञानत्व लघ्विति तदेव प्रतिबन्धकतावच्छेदक कल्प्यते। साध्यविरोधित्व च तदधिकरणानधिकरणत्वम् अभावतद्व्याप्यसाधारणमिति कथं विरोधिनिर्णयसामग्र्या सशयजनकत्वेऽपि या यदर्शनरूपप्रतिबन्धके सति सशयरूपानुमितिरिति । तदपि चिन्त्यम् । तदधिकरणानधिकरणज्ञान-यानुमितिप्रतिबन्धकत्वे वह्नि(रु ' रनु)ष्ण इत्यादि अननुमितिर्न स्यात् । वह्नित्वस्यानुष्णत्वाधिकरणानधिकरणस्य ज्ञानात् । तदधिकरणानधिकरणत्वेन ज्ञानस्य प्रतिबन्धकत्वे कथ साध्याभावसाधारण्य, तज्ज्ञानस्य तत्त्वनाप्रतिबन्धकत्वात् । साध्याभावस्य तत्त्वेन ज्ञातस्य प्रतिबन्धकत्वमिति बहुशो निवेदितत्वात् । किञ्च, बाधस्याधिकबलत्वार्थं पृथक् प्रतिबन्धकतावश्यका । तथा च किं साधारणप्रतिबन्धकताकल्पनेन । अपि च, व्याप्यज्ञान भवतु प्रतिबन्धकम् । तथापि तत्प्रतिबध्यतावच्छेदक सशयसाधारण तन्निश्चयरूपप्रत्यक्ष यावृत्त प्रत्यक्षनिश्चयनिमाद्यज्ञानत्व वाच्यम् । तथा चोभयविशेषदर्शनकाले स्थाणुपुरुषसशयानुत्पादप्रसङ्ग । तथा च तदनुरोधादन्यतरव्याप्यदर्शनत्व विरोधितावच्छेद(कत्व ' क) वाच्यम् ।

तच्चोभयव्याप्यदर्शनकाले नास्तीति कथं न संशयरूपानुमितिः । यदपि च—निश्चयद्वयसामग्रीनः संशय इति सत्यम् । किन्तु यादृशो निश्चयस्य सामग्री, तादृशसंशय प्रसूते । विशेषदर्शन चावधारणात्मकनिश्चयसामग्रीत्यवधारणद्वयरूपसंशयः स्यात् । कोटिस्मृत्यादीन्द्रियसन्निकर्षादिकं तु प्रत्यक्षमात्रे सामग्रीति तैः प्रत्यक्षमात्र जन्यते । तच्च संशयसामग्र्यभावे निश्चयरूपमेव । तत्सत्त्वे च संशयरूपमेवेति तत्र नाय दोष । न चोभयव्याप्यदर्शनस्थले तत्राप्यवधारणरूपसंशयापत्तिरिति वाच्यम् । तत्रोभयव्याप्यदर्शनस्य परम्परप्रतिबन्धेन मूकत्वात् सामान्यसामग्र्या च संशयोत्पादादिति । तदप्यालोचनीयम् । अवधारणज्ञानत्व न विशेषदर्शनजन्यतावच्छेदक, व्यर्थत्वात् । अनुमितौ च तदुपस्थापकाभावादुपनीतभानस्य तत्रानङ्गीकारात् । भवतु वा विशेषदर्शनबलादेवानुमितौ व्यवच्छेदभानम् । तत् संशयरूपानुमितावप्यस्तु । विरुद्धयो साध्यतदभावयोरिव व्यवच्छेद(क?)स्यापि भाने दोषाभावात् । अनुभूयते च किमय स्थाणुरेव, किं पुरुष एवेति । (तस्माद्) नाय युक्तिमह पन्था । यत्तु—संश(य?)कोट्योविरो(धो)ऽपि भासते । अनुमितौ व्याप्तिपक्षधर्मतानुपनीततया न तज्ज्ञानमिति कथं संशयरूपानुमितिरिति । तदपि न । संशयसामग्र्या एव विरोधभानम् । तत्र (तया?) तदुभयव्याप्यदर्शनस्य तज्ज्ञानसामग्रीत्वात् । वस्तुतो विरुद्धत्वेन ज्ञातयोः संशयकोटिता । विरोधभान तु संशये सामग्रीसत्त्वासत्त्वाभ्यामनियतमित्येव तत्त्वम् । यच्च कैश्चिदुक्तम्—अनुभवानुसारेण न तावत् संशयरूपानुमिति. सत्प्रतिपक्षस्थले । अनुमिनोमीत्यनुव्यवसायाभावात् । अत एव न विरुद्धानुभवसामग्रीत्वेन संशयजनकताकल्पनम् । तथा सति तत्रानुमिनोमीत्यनुव्यवसायापातात् । तस्मात् फलबलाद् विरुद्धसत्प्रतिपक्षसामग्रीत्वेन संशयजनकतेति न संशयरूपानुमितिरिति । तदप्यसारम् । एव सति संशयस्थले साक्षात्करोमीत्यनुव्यवसायाभावात् तत्रापि साक्षात्त्वजातिर्न स्यात् । यदि च सामग्रीबलात् साक्षात्त्वसिद्धौ व्यञ्जकाभावान्न तदभिव्यक्ति., तदा प्रकृतेऽपि मात्सर्यमुत्सार्य दीयता दृष्टि । तस्मात् संशयरूपानुमितेरनङ्गीकारो निष्प्रमाणक इति ।

अत्र ब्रूम—निश्चयसामग्री संशयजनिकेत्ययमङ्गीकृतम् । अन्यसामग्र्या अन्यजनकत्वात् । न चैव संशय कापि न स्यादेवेति वाच्यम् । घटतदभावज्ञानसामग्र्या विशेषणज्ञानादिरूपायाः सत्त्वेन तदुत्पत्तौ बाधकाभावात् । घटवि-

शिष्टज्ञानत्वादेरेव तद्विशेषणज्ञानादिजन्यतावच्छेदकत्वात् । तस्य च सशयसाधारण्यात् । इयानेव विशेष —यद् भावाभावोभयज्ञानसामग्रीसत्त्वे तदुभयज्ञान सशयात्मकम् । अन्यथा निश्चयात्मकमिति । न चात्रापि विशेषदर्शनद्वयरूपसाध्यतदभावज्ञानसामग्र्या सशयात्मकतदुभयानुमितौ बाधकाभाव इति वाच्यम् । विशेष दर्शनस्य साध्यादिनिश्चयसामग्रीत्वेन सशयजनकत्वासभवात् । सशयान्यज्ञानसामग्र्या सशयजनकत्वस्य वक्तुमशक्यत्वात् । न च विशेषदर्शनमपि सशयसाधारणज्ञानमात्रसामग्रीति शङ्कितुमपि शक्यते । तथा सति कोटिस्मृतिविशेषणज्ञानादिज्ञानसामान्यसामग्रीवद् विशेषदर्शनस्यापि सशयविरोधितानापत्ते । न चैव कोटिद्वयविशेषदर्शने सति स्थाणुपुरुषयोरपि (सशयो) न स्यादिति वाच्यम् । भावानवबोधात् । तत्रापि न निश्चयसामग्रीभूतविशेषदर्शनद्वयस्य कार्यजनकता । परस्परप्रतिबन्धात् । सशयस्तु सामान्यसामग्रीभूतकोटिस्मृत्यादेरेव । न च तत्रैव विशेषदर्शनात् प्रतिबन्ध कुतो न भवतीति वाच्यम् । नहि विशेषदर्शनत्वेन तस्य सशयविरोधिता । अपि तु विरोधिनिश्चयसामग्रीत्वेन । तच्चैक(विशे[1]वि शेष)दर्शनस्य तदा नास्ति । विशेषदर्शनान्तरप्रतिबन्धात् । एवमपरविशेषदर्शनस्यापि । तस्मादुभयविशेषदर्शन तत्र विरोधिगुणस्थलवत् परस्परप्रतिरुद्धमेव । सामान्यसामग्र्या सशय । इह तु विशेषदर्शनद्वयमनुमितिद्वयसामग्रीभूत प्रतिरुद्धमेव । अन्या च वानुमितिसामग्री नास्त्येवेति कथ सशयरूपानुमितिरुत्पद्यता, सामग्रीविरहादिति दिक् ॥

इति सत्प्रतिपक्षग्रन्थ ।

अथासिद्धिग्रन्थः ।

असिद्धिभेदास्तु व्याप्यत्वासिद्ध्याश्रयासिद्धिस्वरूपासिद्धय प्रत्येकमेव दोषा इति मणिकृत । इदमुपलक्षणम् । व्याप्तिविशिष्टपक्षधर्मत्वाभाव, व्याप्तौ साध्य प्रतियोगिकत्वाभाव, हेतौ पक्षसम्बन्धाभाव, पक्षे हेतुसम्बन्धाभाव, व्याप्तिपक्षधर्मतयो सामानाधिकरण्याभाव इत्येव परामर्शविषयीभूततत्तत्पदार्थप्रतियोगि

---

१ स्य न का क पाठ

काभावा. सर्वेऽप्यसिद्धमध्यप्रविष्टा इति बोद्धव्यम्। नन्वेव हेत्वाभासानन्त्य स्यात्। अमीष्वितरव्यावृत्तपरस्परानुगतैकधर्माभावात्। न च परामर्शविषयाभावत्व सर्व साधारण मणिकृदुक्तमेवानुगतमिति वाच्यम्। अस्यानुगतत्वेऽपीतरव्यावृत्तत्वाभावात्। बाधविरुद्धव्यभिचाराणामुक्तधर्मवत्त्वात्। साध्यतत्सामानाधिकरण्या(म')व्यभिचाराणा परामर्शविषयत्वात्। न च यद्रूपावच्छिन्नविषयत्वेन परामर्शस्यानुमितिहेतुता, (य' त)द्रूपावच्छिन्नाभावो विवक्षित। साध्यप्रतियोगिकव्याप्तित्वप्रकारावच्छिन्नव्याप्तिविषयतया परामर्शस्य हेतुतेति व्याप्तित्वावच्छिन्नव्याप्त्यभावो भवत्यसिद्धः. न तु तद्घटकामूतसाध्यतत्सामानाधिकरण्याव्यभिचाराणामभावादय इति वाच्यम्। एव सति व्याप्त्यभावस्याप्यसिद्धत्व न स्यात्। परामर्शस्य व्याप्तिविशिष्टपक्षधर्मतावगाहित्वेनैवानुमितिहेतुतया केवलव्याप्तित्वाद्यवच्छिन्नव्याप्त्यादिविषयतया तस्यानुमित्यहेतुत्वात्। परामर्शस्यानुमितिहेतुतावच्छेदकशरीरप्रवेशमात्रेण व्याप्तेरभावस्यासिद्धत्वे साध्याभावादेरपि तत्त्व दुर्वारमेवेति।

अत्रोच्यते — विरुद्धत्वान्यत्वे सति परामर्श प्रति प्राग्भावनिश्चयत्वावच्छिन्नप्रतिबन्धकताकज्ञानविषयतावच्छेदकपर्याप्त्यधिकरणत्व व्यभिचारादिव्यावृत्तमुक्तसर्वा(द')सिद्धिसाधारणमसिद्धित्वम्। व्यभिचारज्ञानस्य सशयसाधारणस्य प्रतिबन्धकतया प्राग्भावनिश्चयत्वावच्छिन्नप्रतिबन्धकत्वाभावात्। बाधादेश्च परामर्श प्रति तथाप्रतिबन्धकत्वात्। विरुद्धस्य तथात्वेऽपि तदन्यत्वविशेषणादेव वारणात्। एवमपि व्याप्त्यादिप्रविष्टत(था' या) व्यभिचारादावतिव्याप्तिर्मा भूत्। अत. पर्याप्त्यधिकरणत्वपर्यन्तमिति न कोऽपि दोष.।

केचित् तु — विरुद्धत्वादिहेत्वाभासचतुष्टयोपाधिभिन्नहेत्वाभासतोपाधित्वमुक्तसर्वासिद्ध्यनुगमकम्। अतो नातिव्याप्तिरित्याहु।

आश्रयासिद्धश्च व्योमकमल सुरभीत्यादाविति प्राञ्च। तन्न। व्योमकमलस्यालीकस्य सत्त्वाभावात्। तदुक्त — 'सचेतसा मूकतैवोचिते'ति। कथ तर्ह्येतादृशप्रयोगस्य दुष्टत्वम्। अपार्थत्वादित्यवधारय। यदि च कमले व्योमीयत्व पक्षतावच्छेदकीकृत्य सुरभित्व साध्यते, तदाश्रयासिद्धि। आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरमङ्गीर्णेति मणिकृताप्यभिधानात्। अत्र च पक्षतावच्छेदकाभावज्ञान बाधान्तर्भूतमेव। तत्सामानाधिकरण्यस्य साध्ये प्राग्भावतया तत्रैव प्राग्भावावगाहितया तस्य प्रतिबन्धकत्वात्। न तु व्याप्यवत्त्वज्ञानेऽपीति परामर्शायोगव्यवच्छेदान्नासि

नप्यप्रसिद्धसाध्यव्याप्यत्वासिद्धिसङ्गतिः नेति वाच्यम्। तस्य विरुद्धत्वादिनैव सङ्गतत्वादिति चेन्मैवम्। वस्तुतो हेतौ साध्यसमानयोगिकत्यन्ताभावासमानाधिकरण्यावच्छिन्नस्य सामानाधिकरण्यस्य च साध्यव्याप्ये प्रसिद्ध्यभावो व्याप्यत्वासिद्धिर्निरुक्तहेत्वाभासेषु कथ्यासिद्धा। ननु तथापि व्याप्यत्वासिद्धेर्व्यभिचारावघटकतया नास्तीति न पृथग् हेत्वाभासेषूक्तिरिति चेद्, न। तस्यापि ज्ञानासाकर्यस्य सत्त्वात्। न च विशिष्टाभावस्यैव व्याप्यत्वाभावस्य विशेषणा(णा)वच्छेदकतया विशेषणज्ञाननियतज्ञानतया न तदसङ्गतोऽयमिति वाच्यम्। विशेषणाद्यभावमज्ञात्वापि शब्दादिना विशिष्टाभावज्ञानसंभवेनासाकर्यसंभवात्। वस्तुतस्तु — व्यर्थविशेषणस्यव्यर्थविशेष्यत्वमूल एव व्याप्यत्वासिद्धेर्व्यभिचारावघटकः। नहि नीलधूमे वह्निव्यभिचारो वह्यनधिकरणो वास्ति। ननु नीलधूमे यथा न व्यभिचारादिः, न(दा!था) व्याप्यत्वाभावोऽपि नेति कथमेतदिति चेद्, इत्थ — वह्नित्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगित्वाभावस्य धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यत्वाभावस्यात्र विवक्षितत्वात्। तथा च नीलधूमत्वस्य व्याप्यतानवच्छेदकत्वाद् भवति तत्र व्याप्तिविरहः। नन्वेतज्ज्ञानं व्याप्तिधीविरोध्येव नेति चेद्, न। धूमत्वावच्छिन्नव्याप्तिज्ञाने तस्याविरोधित्वापादन इष्टापत्तेः। नीलधूमत्वावच्छिन्नव्याप्तिज्ञाने च विरोधित्वं तस्य यत्नलेशायितमेव। न चाव्यभिचरितसामानाधिकरण्यात्मकव्याप्तेः कथमनेन विघटनमिति वाच्यम्। व्यर्थविशेषणादिदूषकत्वानुरोधेन व्यधिकरणधूमवह्न्यादिसङ्गहानुरोधेन च सामानाधिकरण्यावच्छेदकतद्धर्मवत्त्वं व्याप्तिरिति प्रागेवोक्तत्वात्। तज्ज्ञाने चावच्छेदकत्वाभावज्ञानस्य साक्षादेव विरोधित्वात्। यदि चावच्छेदकलक्षणेन व्याप्तिः, तदानुपपत्तिरेव नेति। यथा च नीलधूमत्वस्यानतिप्रसक्तत्वेऽपि तादृशलघुधर्मोपस्थितिकत्वान्नावच्छेदकत्वं, तथोपपादितम्। वक्ष्यते चाग्रे।

इदं त्ववशिष्यते — यथा व्याप्यभावज्ञानं पक्षधर्मत्वाभावज्ञानं वा परामर्शविघटकमिति तयोर्हेत्वाभासता, तथा तदुभयव्याप्यज्ञानमपि तद्विघटकमिति तद्विषयस्यापि हेत्वाभासतास्तु। बाधकाभावादिति।

अत्र मिश्राः — व्याप्त्यादिविरहव्याप्यवत्ताधीः व्याप्त्यादिप्रत्यक्षविरोधितयानुमितिप्रतिबन्धिका व्याप्त्याद्यनुमितिविरोधितया वा। नाद्यः। प्रत्यक्षे प्राह्याभावव्याप्यज्ञानस्याप्रतिबन्धकत्वाद् प्राह्याभावप्रत्यक्षस्यैव तत्र प्रतिबन्धकत्वा-

---

१. 'नस्यासाक' क. पाठः.

दिति बहुशो निवेदितत्वात् । नान्त्य । व्याप्तिव्याप्यपरामर्शासत्त्वे तदभावादेव कार्याभावेन प्रतिबन्धकत्वाभावात् । तत्सत्त्वे च सत्प्रतिपक्ष एवान्तर्भावात् पृथग् हेत्वाभासत्वासम्भवादिति वदन्ति ।

अत्र नव्या — हेतुव्याप्त्यभावव्याप्यस्य हेतुव्याप्त्यनुमितौ सत्प्रतिपक्षत्वेऽपि हेतुना साध्यानुमितावसत्प्रतिपक्षत्वात्, साध्यानुमितौ साध्यविरहव्याप्यस्यैव सत्प्रतिपक्षत्वाद्, व्याप्तिविरहव्याप्त्यादेरनुमितौ परामर्शविघटकतया प्रतिबन्धकत्वेन साक्षात्प्रतिबन्धकत्वाभावेन सत्प्रतिपक्षत्वासम्भवादिति व्याप्त्यभावव्याप्त्यादे साध्यानुमितौ पृथग् हेत्वाभासत्वे बाधकाभाव इति वदन्ति । तच्चिन्त्यम् । विरोधिव्याप्तिग्राहकसामग्र्या प्रतिरुद्धव्याप्तिग्रहत्वस्यासाधारणलक्षणतया तत्रैव व्याप्त्यभावव्याप्यस्यान्तर्भावेन पृथग् हेत्वाभासत्वायोगादिति मिश्राभिसन्धानात् । पक्षधर्मत्वाभावव्याप्यव्यावर्तनाय तु तथापि गत्यन्तर चिन्तनीयमेवेति तु चिन्त्यम् ।

केचित्तु — यज्ज्ञाने सत्यनुमितिप्रतिबन्धनियम , स एव हेत्वाभास । अत एवोपाध्यादिर्न तथा । तथा च व्याप्त्यभावादिन्याप्ये गृहीतेऽपि प्रात्यक्षिकस्य व्याप्त्यादिज्ञानस्य सम्भवेनानुमित्युत्पादाद् न तयोर्हेत्वाभासत्वमिति वदन्ति । तदपि चिन्त्यम् । परामर्शोत्पत्त्यनन्तर व्यभिचारज्ञाने सत्यप्यनुमित्यप्रतिबन्धकत्वात् तस्यापि हेत्वाभासत्वानापत्ते । परामर्शात् पूर्वं यज्ज्ञाने सत्यनुमितिप्रतिबन्धनियम इत्युक्ता च सत्प्रतिपक्षाव्याप्ते । तस्मात् स्वप्रतिबध्यप्रतिबन्धद्वारा हेत्वाभासता । तच्च व्याप्त्यभावादिव्याप्यस्यास्त्येव । व्याप्त्याद्यनुमितिप्रतिबन्धकत्वादिति । वस्तुतस्तु — व्याप्त्यभावादिव्याप्यस्य करणविघटकत्वमापाद्यते हेत्वाभासत्वपर्यन्तमपि वा । आद्य इष्टापत्ति । अन्त्ये ज्ञानविशेषविशेष्यत्वमिति हेत्वाभासलक्षणायोगादप्रसक्तिरेव, सिद्धसाधनोपाध्यादिवत् । (ननु) त(दा ? था) लक्षणमेव किमिति कृतं, येन व्याप्त्यभावादिव्याप्य व्यावर्त्यत इति चेद्, न । स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् । सत्प्रतिपक्षेतरस्यानुमितौ परामर्शे प्राह्याभावानवगाहितया प्रतिबन्धकस्य हेत्वाभासत्वेनासङ्ग्रहात् । अत एव सिद्धसाधनोपाधिपक्षधर्मताभाव[व्याप्यव्याप्त्यभावव्याप्यप्रतिकूलतर्कविषयादीना सर्वेषा व्युदास इति सङ्क्षेप ॥

इत्यसिद्धिग्रन्थ ।

अथ बाधग्रन्थः ।

बाधः साध्याभावस्य प्रमाणविषयत्वमेवेति प्राञ्चः । तन्न । वृक्षः संयोगीत्यादावतिव्याप्तेः । केवलान्वयिसाध्यानाश्रयिण्या तद्भेदाधारितादात्म्यादेरबाधितत्वस्यानाश्रयत्वात् । किन्तु पक्षनिष्ठप्रमाविषयत्वमेकाधारानवच्छेदकप्रतियोगिसाध्यकत्वम् । अन्यथे च प्रतियोगिव्यधिकरणत्व विशेषणम् । तेन न पूर्वोक्तातिव्याप्तिः । केवलान्वयिनि च बाधितत्वस्योक्तरूपस्यान्यत्र प्रसिद्धस्यान्यत्वमस्त्येवेति नाबाधितत्वव्या(पक्षे ! कोपः।) न वा तदर्थकनिगमनवैयर्थ्यमिति ।

अत्र च पक्षे साध्याभावज्ञानदशायां हेतुर्ज्ञातश्चेद् व्यभिचारधीरेव । अथ न ज्ञातस्तदा कारणाभावादेव कार्याभावः । अथ हेत्वभावादनुत्पित्सया स्वरूपासिद्धिरिति बाधो न पृथग् हेत्वाभास इति पूर्वः पक्षः ।

तत्र कश्चित्—पर्वतो वह्निमान् धूमादित्यत्र सन्निकर्षपरामर्शजन्यवह्न्यनुमितौ यत्र वह्न्यंशे उपनीतकाञ्चनमयत्वादिबाधितवस्त्वनुभान, तत्रा(सत्य !)नुमितेरप्रमात्वम् । तच्च हेत्वाभासाधीनम् । न च व्यभिचारधीस्तत्रास्तीति काञ्चनमयवह्न्यभाव एव दोष इत्याह । तन्न । काञ्चनमयवह्नेरप्रसिद्ध्या तदभावासम्भवात् । काञ्चनमयत्वरूपव्यधिकरणधर्मावच्छिन्नवह्न्यभावमादाय बाधोपपादने(पु ! तु) तादृशव्यभिचारस्याप्युपपादयितुं शक्यत्वात् । किञ्चानुमितावुपनीतभानानङ्गीकारात् कथं काञ्चनमयत्वादिभानम् । अथानङ्गीकारमात्र न वस्त्वभावसाधकम्, अतिप्रसङ्गात् । किन्तु प्रमाणाभावः । न चात्र सोऽस्ति । प्रत्यभिज्ञादौ तत्तादिभानानुरोधेनावश्यमुपनीतभानमङ्गीकरणीयम् । तत्र चोपनयस्य प्रत्य(क्ष)मात्रे सहकारिता वा मानमात्रे वेति सशये सामान्यादुत्तरपक्षस्यैव प्रबलत्वादनुमितावप्युपनीतभाने बाधकाभावादिति ।

अत्र मिश्राः—उपनयः प्रत्यक्षे सहकारी सन्निकर्षतया सम्भवति । अनुमाने सन्निकर्षस्यातथ्यतया व्याप्तिपक्षधर्मतोपनीतार्थस्यैव विषयतयोपनीतभानाभावादिति वदन्ति ।

तत्र केचित्—प्रत्यक्षेऽपि ज्ञानं सन्निकर्षतया न हेतुः । किन्तु सविकल्पकानन्तर प्रमाणजन्यज्ञानत्वावच्छेदेनासंस(गैः ! गौ)ग्रहे सति सविकल्पकविषयवैशिष्ट्य भासत इति सामान्यत एव नियमात् तदुपयोगः । तच्चानुमानादिसाधारणमिति तत्राप्युपनीतार्थभाने बाधकाभाव इति ।

अत्रोच्यते — सामान्यनियमस्वीकारेऽपि तत्तादिप्रत्यक्षे तदिन्द्रियसन्निकर्षो वाच्य एव। (अ)सन्निकृष्टस्य प्रत्यक्षविषयत्वात्। तथा च ज्ञानस्येन्द्रियसन्निकर्ष(जन्य)त्वमवश्यमभ्युपेयमेव। तथा च सामान्यनियमस्वीकारो गौरवपराहत इति। नन्वेवं लाघवोपनीतव्याप्त्यनुमितौ भानं न स्यादिति चेद्, न। सम्भवल्लघुगुरुविषयकत्वावच्छेदेनैव लाघवज्ञानस्य सहकारितया लाघवोपनीतस्य सर्वत्र भानसम्भवात्। उपनयान्तरस्य च तथात्वाभावादिति दिक्।

अत्राय सिद्धान्त — साध्याभावज्ञानप्रमात्वज्ञान विना हेतुविषयकमपि साध्याभावज्ञान प्रामाण्यशङ्काकवलित न प्रतिबन्धाय समर्थम्। अतो व्यभिचारज्ञानत्वेनापि प्रतिबन्धकताया साध्याभावज्ञानप्रमात्वज्ञानमवश्यमुपनीव्यम्। तथा च उपनीव्यतया तदेव दोष। न च प्रमात्वज्ञानमपि साध्याभावविषयकतयेव दोष, प्रमात्वस्य विषयघटितमूर्तितया तज्ज्ञाने तज्ज्ञाननियमादिति वाच्यम्। विषयघटितत्वेऽपि ज्ञाननिरूपितस्वरूपसम्बन्धविशेषविषयत्वस्यैव तत्र प्रयोजकत्वात्। साध्याभावविषयत्वस्याप्रामाण्यशङ्काकलङ्कितज्ञानसाधारणतया प्रतिबन्धाप्रयोजकत्वात्। नन्वेवमप्रामाण्यशङ्काशून्यसाध्याभावज्ञान प्रतिबन्धकमस्तु। न तु साध्याभावज्ञानप्रमात्वज्ञानमिति चेद्, न। अप्रामाण्यशङ्काशून्यत्वापेक्षया गृहीतप्रमात्वस्य लघुत्वात्। ननु गृहीतप्रमात्वसाध्याभावज्ञानस्य प्रतिबन्धकत्वे यत्र प्रमात्वज्ञान एवाप्रमात्वशङ्का, तत्रापि प्रतिबन्धापत्ति। न च तत्रापि गृहीतप्रमात्वप्रमात्वज्ञानत्वेन प्रतिबन्धकता। तर्हि तत्राप्येवमेवेत्यनवस्थापात। तस्मादनन्यगत्या कचिद्गत्या अप्रामाण्यशङ्काशून्यत्वमनवस्थाभिया वक्तव्यम्। तर्हि प्रथममेव तदस्तु। किं प्रमात्वज्ञानप्रतिबन्धकत्वेनेति नाय सिद्धान्तो युक्तिसह इति चेद्, न। साध्याभावज्ञानस्य हेतुविषयकतानियमाभावेन बाधस्य व्यभिचारसाङ्कर्यासम्भवात्। परामर्शानन्तर स्मृत्या शब्देन वा यत्र साध्याभावोपस्थितिस्तत्र हेतूपस्थापकाभावात्। न च परामर्शानन्तरमनुमितिसामग्रीबल(ब)त्त्वादनुमितिरेव, न तु साध्याभावस्मृत्यादिकमिति वाच्यम्। यत्र पूर्वक्षणे सिद्ध्यादिप्रतिबन्धकसत्ता, तत्रानुमित्यनुदयेन स्मृत्यादिसम्भवात्। किञ्च, यथा व्यभिचारधी प्रतिबन्धिका, तथा साध्याभावधीरपि। आह्याभावज्ञानस्य शाब्दादौ प्रतिबन्धकत्वकल्पनात्। न चैव साधारणप्रतिबन्धकस्यापि तथा न हेत्वाभासता। साधारणप्रतिबन्धकस्यापि हेत्वाभासलक्षणसत्त्वेन तत्त्वे बाधकाभावाद् हेतुनिष्ठत्वेनासाधारण्य

संशयो न युज्यत इत्यभिप्रेत्यैव मणिकृतोक्तं — 'यद्वा घटादिभिन्नपृथिवीत्वेन पक्षते'ति। अत एव च केवलान्वयिनि प्रमेयत्व घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयः पक्षताघटक उक्तः। समानविषयसंशयत्वेन साध्यसिद्धिनिवर्त्यत्वात्। अन्यथा समानप्रकारकतापक्षे तदसङ्गतेः। वस्तुतस्तु समानविषयत्वेन प्रतिबन्धकत्वमित्युत्सर्गः। स च यावद्विषयबाधेन बाधकेनापोद्यते। तथा च यत्र यावद्विषये विशिष्य बाधग्रहेऽपि सामान्यतो ज्ञानं, तत्रागत्या समानप्रकारकत्वेन प्रतिबन्धकत्वेऽपि लाघवेनोक्तयुक्त्या समानविषयत्वेनैव प्रतिबन्धकत्वमिति विषयविभागः। अत एव पर्वतान्यवह्निः पर्वते नेति ज्ञाने वह्निभिन्ने वह्नित्वं नेति ज्ञाने च भवति वह्न्यनुमितिर्वह्नित्वेन रूपेण बाधितवह्निविषयिण्येवेति न काचिदनुपपत्तिरिति। केचित्तु — गुणानुरोधादत्र परामर्शात् प्रमेत्यसङ्गतमेवेति महानसीयादिवह्निभानं भवेदेवेति समानविषयकत्वेनैव बाधप्रतिबन्धकत्वमङ्गीकार्यम्। न च सत्यपरामर्शस्वभावादेव महानसीयादिवह्निधीर्नेत्येव न कुत इति वाच्यम्। महानसीयादिवह्निभानेऽप्यनुमितौ प्रमात्वसंभवात्। वह्नित्वेन रूपेण महानसीयवह्नेः पर्वते भानात्। यत्र यद्धर्मावच्छिन्नयदभावः, तत्र तद्धर्मावच्छिन्नतज्ज्ञानस्य भ्रमत्वादिति। तच्चिन्त्यम्। यत्र यदस्ति, तत्र तज्ज्ञानस्य प्रमात्वात्। न च पर्वते महानसीयवह्निर्वह्नित्वेनापि रूपेणास्ति। तस्मादत्र तज्ज्ञान भ्रमरूपं भवतु मा वा। प्रमारूप (न) भवतीति निश्चितमेवेति न तदनुरोधात् समानविषयकत्वेन प्रतिबन्धकत्वसिद्धिरिति दिक्।

अन्यच्च बाधासङ्कीर्णस्थलान्तरमुक्तं मणिकृता — 'गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादि'त्यादि। नहि तत्र पृथिवीत्वे गन्धव्याप्यताविरहो न वा पक्षधर्मताविरह इति बाध एव तत्र प्रतिबन्धकोऽसङ्कीर्ण इति।

तत्र केचिद् — गन्धप्रागभावविशिष्टघटस्य पक्षत्वे तत्र गन्धाभावेन हेतोश्च सत्त्वे व्यभिचार एव। हेतोरसत्त्वे चासिद्धिरेव। न च गन्धप्रागभावोपलक्षि(ता! तस्य पक्षत्वम्।) तदा तत्र साध्य(स्य) सिद्धत्वेन सिद्धसाधनमेव, न तु बाध इत्यसङ्गतमिदमिति।

अत्राहुः — गन्धप्रागभावकाल एवात्र विशेषणतया पक्षतावच्छेदकत्वेन विवक्षितः। तद्विशिष्टे च घटेऽस्ति पृथिवीत्व हेतुरिति नासिद्धिः, न वा सिद्धसाधनं, तद्विशिष्टे साध्यासत्त्वात्। अतस्तत्र बाध एव प्रतिबन्धक इति।

अत्र नव्याः — प्रागभावोपलक्षितकालस्य पक्षतावच्छेदकत्वे तद्विशिष्टघटे गन्धवत्त्वस्य सिद्धत्वात् सिद्धसाधनमेव, न बाधः । प्रागभावविशिष्टकालस्य पक्षतावच्छेदकत्वे तादृशकालविशिष्टे पृथिवीत्वहेतोरसिद्धिरेव । प्रागभावांशे तदसत्त्वादिति नैतद्बा(ध ? धा)सङ्कीर्णस्थलमुक्तमिति ।

अत्र प्रतिभाति — प्रागभावः स्वाधारकालविशेषपरिचायकः । तथा च कालविशेषविशिष्टो घटः पक्षः, तत्र पृथिवीत्वं हेतुरस्त्येवेति नासिद्धिर्न वा सिद्धसाधनं, तद्विशिष्टे गन्धाभावादिति बाध एव तत्र दोष इति न किञ्चिदेतत् । अत एव प्रागभावकालावच्छिन्नघटे गन्धरूपसाध्याभावेन हेतोश्च सत्त्वेन व्यभिचार एवात्र, न तु बाध इत्यपि दूषणमपास्तम् । पृथिवीत्वगन्धयोर्ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धस्य समवायतया तत्सम्बन्धावच्छिन्नहेतुमति तत्सम्बन्धावच्छिन्नसाध्यस्यापि सत्त्वेन व्यभिचाराभावात् । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेन हेत्वधिकरणे तत्सम्बन्धारोप्यकसाध्याभावस्यैव व्यभिचा(रि ? र)त्वात् । अन्यथा धूमाधिकरणेऽपि समवायादिना वह्न्यभावेन व्यभिचारप्रसङ्गादिति । यच्चात्र दूषणं — पक्षधर्मतावलाद् अनुमितौ साध्यादिभानं, सा च पक्षे हेतुस्तत्र साध्यं विनानुपपन्न इत्याकारेति पक्षीयसाध्यभाने पक्षतावच्छेदकसाध्यसामानाधिकरण्यमर्यादनुमितिविषय इति प्रकृतेऽपि प्रागभावकालीनत्वसामानाधिकरण्येन घटे गन्धः सिध्यत्येवेति नात्र बाधगन्धोऽपीति । तदपि न । पक्षतावच्छेदकविशिष्टे साध्यसिद्धेरौत्सर्गिकत्वात् । बाधेनैव तस्य बाधनात् । अत एव पर्वतो वह्निमानित्यादावपि पर्वतत्वावयवेऽपि साध्यसिद्धौ बाधः प्रतिबन्धक एव । किं बहुना, प्रमाणमात्रस्यैव विशिष्टवैशिष्ट्यान्वयबोधजनकतायामुत्सर्गः । अत एवारुण्या गवेत्यादावारुण्यादिविशिष्टगोरेव सोमक्रयसाधनत्वमिति सिद्धान्तः । वस्तुतस्तु वृक्षः संयोगी द्रव्यत्वादित्यादावव्याप्यवृत्तिसाध्यके सद्धेतौ साध्याभावप्रदेशे साध्यसिद्धिर्यत्र न भवति, तत्र बाध एव प्रयोजकः । प्रतियोगिविरुद्धसाध्याभावसहचारस्य व्यभिचारतया तत्र तदभावात् । अत एव व्याप्तिलक्षणे पक्षधरमिश्रैरिदमपि बाधासङ्कीर्णस्थलमित्युक्तम् । किञ्च, पक्षतावच्छेदकवति साध्याभावरूपस्य बाधस्य व्यभिचारसङ्करेऽपि साध्यवति पक्षतावच्छेदकाभावज्ञानस्य न व्यभिचारज्ञानसाङ्कर्यम् । साध्याभा(व ? वा)ज्ञानेन तत्र तद्धर्म्यभिचाराज्ञानात् । अन्यच्च ज्ञानासाङ्कर्यं प्रागुक्तमेवास्तीति नेह वितन्यत इति संक्षेपः ॥

इति बाधग्रन्थः ।

अथ हेत्वाभासानामसाधकतासाधनम् ।

हेत्वाभासानामसाधकतासाधकतया सदुत्तरत्वम् । जात्यादीनां चै(स्य? स्वा)साधकतासाधारण्येन परासाधकतासाधकतया असदुत्तरत्वम् । यद्यप्युद्देश्यपरानुमितिप्रतिबन्धो व्यभिचारादिज्ञानादेवेत्यसाधकतानुमितिर्व्यर्था, तथाप्यसाधकतानुमानेनात्यन्तापकर्षः प्रतिवादिनः सूच्यत इति कथकसम्प्रदायसिद्धस्यासाधकत्वसाधनस्याप्युद्देश्यत्वमिति तदपि कार्यम् । न चैवमितरानुमानवदत्रापि पञ्चावयवप्रयोगः किमिति न क्रियत इति वाच्यम् । अत्र दूषणस्यासाधकत्वव्याप्तेः वादिप्रतिवाद्युभयसम्मततया दूषणस्यासाधकत्वव्याप्तिर्मास्त्विति शङ्कोत्थापने व्याघातेन च व्याप्त्युपदर्शकावयवस्य व्यर्थत्वादिति वदन्ति । वस्तुतस्तु कथकसम्प्रदायो यत्र यादृशः, तत्र तथा प्रयोग इत्येव मूलयुक्तिरनुसन्धेया । अन्यथा पक्षधर्मत्वाबाधितत्वादिबोधकयोरुपनयनिगमनयोः करणं कुतोऽत्र न स्यादिति तत्त्वम् । असाधकत्वं चोद्देश्यानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वमेव । स च धर्मो विरुद्धत्वादिरेव । न चैवमिदमसाधकं विरुद्धत्वादित्यादौ साध्याविशेष इति वाच्यम् । रूपान्तरेणैकस्यापि साध्यसाधकभावाविरोधात् । इदं पिपासोपशमनसमर्थतावच्छेदकरूपवत् तोयत्वादित्यादिवत् । समानप्रकारकसिद्ध्यादेरेव प्रतिबन्धकत्वेन साध्याविशेषदोषप्रयोज्यदोषस्यासम्भवादिति दिक् ॥

इति हेत्वाभासानामसाधकतासाधनम् ।

इति श्रीगोपीनाथविरचिते मणिसारेऽनुमानखण्ड ।

शुभं भूयात् ।

---

१. 'चास्य' क. पाठः.

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५	२८	यथ	यद्वा व्य
६	१७	भव्य	(न) भव्य
७	३	सिद्धिनै	सिद्धिरे
९	१८	जनक	जनन
११	२४	(वा)	(त्वा)
१४	२२	दक	दक (विशिष्ट)
२२	११	रिति	रिति(न)
२७	१६	त्मत्व	त्म
,,	१७	त्वमसमानाधिकर-णात्म(त्व)	त्वसमानाधिक-रणात्म
४०	८	आ	(१) आ
५३	२४	सम्बन्धि (क?)	(स) सम्बन्धिक
५९	२५	सुरभित्वा	सुरभि(त्व)त्वा
६४	३	ते	तैं
७१	७	च । ता	च ता
,,	१७	रनेक	रेक
७३	,,	राय	राय (?)
७७	,,	पक्षता	पक्ष (र्म) ता
८९	९	वानिन्न ए	वो भिन्न ए
९५	१७	कस	दृस
१६३	१६	(ज्ञान ज्ञान ?)	ज्ञान (ज्ञान ?)

